पण्डितराज - काव्य - सङ्ग्रहः

(पण्डितराजजगन्नाथविरचितानां पद्यगद्यमयानां निखिलानां काव्यानां समुच्चयः)

PAṆḌITARĀJA-KĀVYA-SAṄGRAHA

(COMPLETE POETICAL WORKS OF PAṆḌITARĀJA JAGANNĀTHA)

पण्डितराज - काव्य - सङ्ग्रहः

(पण्डितराजजगन्नाथविरचितानां पद्यगद्यमयानां
निखिलानां काव्यानां समुच्चयः)

उस्मानियाविश्वविद्यालयसंस्कृतविभागाध्यक्षेण
डा० आर्येन्द्रशर्मणा
संपादितः

हैदराबादनगरे
उस्मानियाविश्वविद्यालयस्थ-
संस्कृतपरिषदा
प्रकाशितः

प्रथमं संस्करणम्
१९५८

SANSKRIT ACADEMY SERIES No. 2.

PAṆḌITARĀJA-KĀVYA-SAṄGRAHA
(COMPLETE POETICAL WORKS OF
PAṆḌITARĀJA JAGANNĀTHA)

Edited by
Dr. Aryendra Sharma,
Head of the Department of Sanskrit,
Osmania University.

THE SANSKRIT ACADEMY,
OSMANIA UNIVERSITY,
HYDERABAD-DECCAN.

First Edition 1958.

Price
Calico bound Rs. 8.00
Wrapper bound Rs. 6.00

Printed at the Osmania University Press, Hyderabad-7.

CONTENTS

INTRODUCTION

I. The present collection of Paṇḍitarāja's poetical works, published for the first time in a single volume, is based upon the following printed works and manuscripts:—

(1) GAṄGĀLAHARĪ, edited with commentary by Lakshmana Shastri Panasikar and published by Nirnayasagara Press, Bombay, 1930.

(2) GAṄGĀLAHARĪ, edited with a Marathi translation by Shri D. G. Padhye and published as Poona Oriental Series No. 63, 1953 (Second Edition).

(3) AMṚTALAHARĪ, SUDHĀLAHARĪ, KARUṆĀLAHARĪ and LAKṢMĪLAHARĪ, published in the Kāvyamālā Series, Nos. 1 and 2, Nirnayasagara Press, Bombay, 1929-1932.

(4) A MANUSCRIPT COPY OF VIṢṆULAHARĪ, with Marathi translation, prepared by Shri D. G. Padhye (editor of No. (2) above) from the Marathi Journal Āryamitra (Vol. I, Nos. 7, 8, 9 and 10), and kindly lent to us. (See III (b), below.)

(5) BHĀMINĪVILĀSA, edited with commentary by Dr. H. D. Sharma and published as No. 50 of the Poona Oriental Series, 1935.

(6) BHĀMINĪVILĀSA, edited with commentary by Acyutaraya Modak and published by Nirnayasagara Press, Bombay, 1933.

(7) A MANUSCRIPT COPY OF ĀSAFAVILĀSA, kindly lent by Shri D. G. Padhye.

(8) A MANUSCRIPT OF ĀSAFAVILĀSA, kindly lent by the Bhandarkar Oriental Research Institute, Poona.

(9) ĀSAFAVILĀSA, printed as an appendix to Muslim Patronage of Sanskrit Learning, Part I, by Shri J. B. Chowdhuri, Calcutta, second edition, 1954. (This is based on No. (8) above.)

(10) PRĀṆĀBHARAṆA, published in the Kāvyamālā Series No. I, Nirnayasagara Press, Bombay, 1929.

(11) COPY OF A MANUSCRIPT OF JAGADĀBHARAṆA, preserved in the Collection of Ānandāśrama, Poona and kindly made available to us by the Trustees.

(12) RASAGAṄGĀDHARA, with Nāgeśa's Commentary, edited by Shri Mathuranatha Shastri and published by Nirnayasagara Press, Bombay, sixth edition, 1947.

(13) RASAGAṄGĀDHARA, with Nāgeśa's Commentary, edited by Pandit Gangadhara Shastri, and published by Braj B. Das and Co., Chowkhamba Sanskrit Book Depot, Banaras, 1903.

(14) A COLLECTION OF ABOUT 1400 ANYOKTIS ascribed to Paṇḍitarāja, printed in 1899 in the Telugu script (published by the Raja of Tuni, Vizag. Dt.).

(15) PAṆḌITARĀJAŚATAKAM (in Telugu script), edited by Shri B. Satyanarayana Sharma and Published by Āndhra Jātīya Maṇḍalī, 1926.

(16) CITRAMĪMĀṀSĀKHAṆḌANA, edited by Pandit Shivadatta and Lakshmana Shastri Panasikar and published by Nirnayasagara Press, Bombay, 1926.

II. This collection includes the following works of Paṇḍitarāja, in the order in which they are given:—

1. Gaṅgālaharī
2. Amṛtalaharī
3. Karuṇālaharī (=Viṣṇulaharī)
4. Lakṣmīlaharī

5. Sudhālaharī
6. Prāstāvika-vilāsa
7. Śṛṅgāra-vilāsa
8. Karuṇa-vilāsa
9. Śānta-vilāsa
(6–9 = Bhāminīvilāsa)
10. Āsafa-vilāsa
11. Verses found exclusively in the Rasagaṅgādhara.
12. Prāṇābharaṇa and Jagadābharaṇa.
13. Additional Anyoktis ascribed to Paṇḍitarāja. (See I (14), above.)
14. Additional verses found exclusively in the Rasagaṅgādhara. (Owing to an oversight these were not included under No. 11).

To the above is appended a complete index of verses and prose passages arranged in alphabetical order.

III. The following remarks with regard to some of the above works may be of interest.

(a) The Gaṅgālaharī (also called Pīyūṣalaharī) is traditionally believed to be the last work of Paṇḍitarāja. This, however, is rendered impossible by the fact that Paṇḍitarāja refers to his five Laharīs in the Rasagaṅgādhara (मन्निर्मिताः पञ्च लहर्यः, p. 134, N. S. Press Edn.), and further, that verses Nos. 1, 15 and 21 of the Gaṅgālaharī are quoted in the Rasagaṅgādhara and verse No. 2 in the Citramīmāṁsākhaṇḍana (Kāvyamālā edition, 1926, p. 17).

(b) The Viṣṇulaharī, as published in the Marathi Journal Āryamitra (see I (4), above), is identical with the Karuṇālaharī, except that the former omits six verses (Nos. 37, 54, 56, 57, 58 and 59) found in the latter, and adds a 'phala-śruti' as follows:—

इमां वै विष्णुलहरीं जगन्नाथेन निर्मिताम् ।
यः पठेत् तस्य सर्वत्र जायन्ते सर्वसम्पदः ॥

(c) Prāstāvika-vilāsa, Śṛṅgāra-vilāsa, Karuṇa-vilāsa and Śānta-vilāsa comprise the Bhāminī-vilāsa. The num-

ber of verses in each of these four Vilāsas (for a detailed discussion regarding which, see Jagannātha Paṇḍita, by V. A. Ramaswami Sastri, P. 66) varies in different editions. The texts as included in the present collection are, with minor adjustments, based upon Dr. H. D. Sharma's edition of Bhāminī-vilāsa (see I (5), above), inclusive of the verses given in the Appendix.

(d) The Āsafa-vilāsa is a eulogy on Asaf Khan (died 1641), brother-in-law of Shahjahan and a patron of Paṇḍitarāja. It is not an elegy bewailing the death of Asaf Khan as supposed by Kane (History of Sanskrit Poetics, p. 132). Asaf Khan is mentioned twice in the Rasagaṅgādhara (verses No. 163 on p. 102 and No. 100 on p. 201 of the present collection, hereafter referred to as PKS = Paṇḍitarāja-Kāvya-Saṅgraha). The Āsafa-vilāsa, however, is so lacunary and ends so abruptly that it is not likely to be complete. Probably the major portion of the work is missing. The Rasagaṅgādhara quotes twice from the Āsafa-vilāsa, a verse (यस्योद्दाम०) on p. 46 (PKS, p. 83) and a prose passage (प्रतिखुरनिकरशिलातल etc.) on p. 417 (PKS, p. 83).

(e) Prāṇābharaṇa and Jagadābharaṇa are essentially identical. The former eulogizes King Prāṇanārāyṇa of Kāmarūpa (Assam) (reigned 1633-1666), and the latter, King Jagatsiṁha of Udaipur (reigned 1628-1654 A.D.)[1].

Paṇḍitarāja has utilized one and the same work to eulogize two patrons, merely by changing names, titles and a few

---

1. The view that the Jagadābharaṇa is a eulogy on Dara Shikoh (see Kane, History of Sanskrit Poetics, P. 311; Das Gupta & De, History of Sanskrit Literature, p. 566: Chaudhuri, Muslim Patronage to Sanskrit learning, Vol. I, pp. 62-63 etc.) is untenable. The last verse and the colophon of the Jagadābharaṇa leave no doubt on this point:—

श्रीराणाकलिकर्णनन्दनजगत्सिंहप्रभोर्वर्णनम् ।
........विनिर्मितं जगदाभरणाख्यं जगत्सिंहवर्णनम् ।

See p. 120 of PKS. See also verses No. 2, 5 and 23 of the Jagadābharaṇa (PKS).

epithets in four verses (Nos. 2, 5, 23 and 53) and adding, in the case of the Prāṇābharaṇa, three verses not found in the Jagadābharaṇa (Nos. 15, 16 and 33). Thus—

Verse No. 2 जागर्तु क्षितिमण्डले चिरमिह श्रीकामरूपेश्वरः। (Prāṇābharaṇa)
जागर्तु क्षितिमण्डलोपरि जगत्सिंहो धराधीश्वरः। (Jagadābharaṇa)

Verse No. 5 दुग्धाब्धे भवता समो विजयते श्रीप्राणनारायणः। (Prāṇābharaṇa)
दुग्धाब्धे भवता समो विजयते श्रीकर्णजन्मार्णवः। (Jagadābharaṇa)

Verse No. 23 नुतो निखिलभूसुरैर्जयति कामरूपेश्वरः। (Prāṇābharaṇa)
नुतो निखिलभूसुरैर्विजयते जगत्केसरी। (Jagadābharaṇa)

Verse No. 53 सन्तुष्टः कमताधिपस्य कवितामाकर्ण्य तद्वर्गनम्। (Prāṇābharaṇa)
श्रीराणाकलिकर्णनन्दनजगत्सिंहप्रभोर्वर्णनम्। (Jagadābharaṇa)

Almost all the verses contained in Prāṇābharaṇa-Jagadābharaṇa are quoted in the Rasagaṅgādhara (except Nos. 1, 2, 3, 10, 32 and 52), and here Paṇḍitarāja has utilised them to please a third patron, Shahjahan (possibly also Jahangir?)! Thus, *e.g.*, the verse माहात्म्यस्य परोऽवधिः (PKS 112.5) would serve as a eulogy on Prāṇanārāyaṇa, Jagatsiṁha or Shahjahan, according as the last word reads—

श्रीप्राणनारायणः (Prāṇābharaṇa),

or श्रीकर्णजन्मार्णवः (Jagadāharaṇa),

or दिल्लीधरावल्लभः (Rasagaṅgādhara).

Similarly, the verse द्विनेत्र इव वासवः (PKS 115.23) would refer to Prāṇanārāyaṇa, Jagatsiṁha and Shahjahan(?), according as the last word reads— कामरूपेश्वरः, जगत्केसरी or कोऽपि भूमीपतिः. The rest of the verses are 'neutral': they could be used for eulogizing any one of his royal patrons.

It is almost certain that the Jagadābharaṇa was written earlier than the Prāṇābharaṇa, since the latter contains three additional verses, and since Paṇḍitarāja is likely to

have migrated to Assam only after the death of Shahjahan in 1658, Jagatsiṁha having died four years earlier in 1654[1].

(f) The additional Anyoktis, 588 in number, have been selected from out of 1400 Anyoktis as printed in the Telugu text (see I, No. 14). The eliminated verses were found either included in the other works of Paṇḍitarāja, as published in the present collection, or they were found to be spurious because of their being ascribed to other poets in such anthologies as Subhāṣitāvalī, Sūktimuktāvalī and Śārṅgadharapaddhati etc., which are prior to Paṇḍitarāja.

In spite of intensive elimination we fear that many spurious verses have found place in the 588 Anyoktis as printed in our collection. We ourselves found 33 Anyoktis which are ascribed to other poets or are anonymously quoted in the Padyāmṛtataraṅgiṇī and the Padyaveṇī (published by J. B. Chowdhuri, 1941 and 1944 respectively = Saṁskṛta-Kośa-Kāvya-Saṅgraha, Vol. Nos. I and III). It is also clear from the style and diction of some of the verses that they are not likely to be Paṇḍitarāja's composition, although the majority of the Anyoktis could be easily from his pen.

We request our readers to help us in tracing other spurious verses so that we can eliminate them in the second edition. (The help, of course, will be duly acknowledged).

IV. Apart from these poetical works, the Rasagaṅgādhara, and the Citramīmāṁsākhaṇḍana, Paṇḍitarāja is known to have written the following works:—

1. Manoramākucamardana
2. Yamunāvarṇanacampū (quoted in the Rasagaṅgādhara)
3. Ākhyāyikā (mentioned in the Rasagaṅgādhara on p. 58, N. S. Press edition).

1. Shri Padhye in his edition of the Gaṅgālaharī says on page 33 that the Prāṇābharaṇa was written in 1627, and on page 34 that the Jagadābharaṇa was written in 1647. He has, however, supplied no evidence to corroborate his statements. See also Jagannātha Paṇḍita by V. A. Ramaswami Sastri, p. 70.

In addition to the above, the following works are also ascribed to Paṇḍitarāja:—

1. Kāvyaprakāśa-ṭīkā (see J. B. Chowdhuri, Muslim Patronage to Sanskrit Learning, pp. 64-70; Descriptive Catalogue of MSS. in Mithila, Vol. II, Nos. 24-25)
2. Śabdakaustubhaśāṇottejana
3. Ratimanmatha-Nāṭaka
4. Vasumatīpariṇaya-Nāṭaka
5. Allopaniṣad
6. Miscellaneous verses.

PAṆḌITARĀJA'S LIFE

V. (a) Paṇḍitarāja Jagannātha was a Tailaṅga Brāhmaṇa belonging to the Veṅgināḍu (Veṅgināṭīya) Kula. His father was Peru Bhaṭṭa or Perama Bhaṭṭa and his mother Lakṣmī.[1] He studied all the Śāstras under his father whom he refers to as 'Mahāguru' (PKS. 89-3) and who had himself acquired proficiency in various Śāstras under Jñānendra Bhikṣu, Mahendra, Khaṇḍadeva and Śeṣa.[2] In the Mnoramā-kuca-mardana, as quoted by Mathuranatha Shastri in his Introduction to Rasagaṅgādhara (Nirnayasagar Press, Sixth Edition) pp. 48-49, Paṇḍitarāja mentions Śeṣavīreśvara as his guru, presumably in Vyākaraṇa.

(b) Paṇḍitarāja mentions, besides Dillīnarapati,[3] Dillīśvara,[4] Dillīdharāvallabha[5] and Dillīvallabha,[6] five pat-

1. PKS. 85, 89.3, and 120.53. According to Mahādeva Dīkṣita, a commentator of Bhāminīvilāsa, who claims to be the grandson of Paṇḍitarāja, the name of Paṇḍitarāja's father was Jāgeśvara Sūri. See B. Satyanārāyana Sharma, Paṇḍitarāja-Jīvitam, p. 3, and V. A. Rāmaswāmy Shāstri, Jagannātha Paṇḍita, p. 11, foot-note 2.

2. PKS. 89.2. According to Nāgeśa, Śeṣa here refers to Śeṣavīreśvara. But since Paṇḍitarāja mentoins Śeṣavīreśvara as his own guru, is it not more likely that by Śeṣa in the above verse is meant Śeṣa Śrikṛṣṇa, the guru of Bhaṭṭoji Dīkṣita who must have been a contemporary of Paṇḍitarāja's father ?

3. PKS. 106.212.

4. PKS. 190.79

5. PKS. 112.5, 114.15.

6. PKS. 78.32.

rons by name—Jahangir[1] (reigned 1605-1627 A.D.), Shahjahan[2] (reigned 1628-1658 A.D.), Asaf Khan[3] (Noor Jahan's brother, died 1641 A.D.), Jagatsiṁha of Udaipur[4] (reigned 1628-1659 A.D.) and Prāṇanārāyṇa of Kāmarūpa[5] (Assam, reigned 1633-1666 A.D.). The epithets Dillīśvara etc. would seem to refer to Shahjahan (or/ and to Jahangir?).[6] In one verse (PKS 201.102) he praises an unidentified King of Nepal (Nepālendra).

On the basis of the dates of these patrons, it is safe to assume that the literary activity of Paṇḍitarāja extended from c. 1620 to c. 1660, as suggested by Kane in History of Sanskrit Poetics (p. 312).

(c) Paṇḍitarāja has criticised Appayya Dīkṣita in the Rasagaṅgādhara and the Citramīmāṁsākhaṇḍana and Bhaṭṭoji Dīkṣita in the Manoramākucamardana. Appayya Dīkṣita is known to have been born in 1520 (or 1523) and to have died in 1593 (or 1626). (See V. A. Ramaswamy Sastry, Jagannātha Paṇḍita, p. 21.) The literary activity of Bhaṭṭoji Dīkṣita extended, according to Kane (ibid, p. 312), from 1580 to 1630. These dates corroborate the dates given for Paṇḍitarāja's literary activity, who must have been considerably junior to both the Dīkṣitas.[7]

(d) Presuming that the well-known Lavaṅgī verses (PKS. 190. 582-588) are genuine (and there is nothing to show that they are not), the story that Paṇḍitarāja fell in

1. PKS. 200.95, where नूरदीन = जहाँगीर.

2. PKS. 83, first para; 85, last para ; 101.150 (शहाबदीन = शाहजहाँ)

3. Āsafavilāsa (PKS. 83.85; PKS. 102.163, 201.100).

4. Jagadābharaṇa (PKS. 111-120), especially 111.2, 112.5, 115.23, 1205.3.

5. Prāṇābharaṇa (PKS. 111.120), especially 111.2, 112.5, 114.15, 115.23, 117.33, 120.53.

6. There is no evidence to show that they refer to Dara Shikoh. See V. A. Ramaswamy Shastri, Jagannātha Paṇḍita, p. 55.

7. For further details, see Kane, History of Sanskrit Poetics p. 312, and V. A. Ramaswamy Shastri, Jagannātha Paṇḍita, pp. 21-23.

love with a Muslim girl in the Moghul Court may also be true.[1]

(e) As Paṇḍitarāja himself says in the Bhāminī-vilāsa (PKS. 78.32), he spent his youth (navīnaṁ vayaḥ) at the Moghul Court (Dillīvallabhapāṇipallavatale) and his later life at Mathura or Banaras, according as we accept the reading " Madhupurī-madhye " or " Andhakaśāsanasya nagare." (Tradition supports the latter).[2]

(f) It is clear from the internal evidence that Paṇḍitarāja lived at the courts of four rulers– Jahangir, Jagatsiṁha, Shahjahan and Prāṇanārāyaṇa. Jahangir reigned from 1605 to 1627, and Shahjahan succeeded him in 1628. Jagatsiṁha became the ruler of Udaipur also in 1628. Shahjahan reigned for about 30 years. His death in 1658 was followed by a war of succession. Prāṇanārāyaṇa reigned from 1633 to 1666, except for a short break of two years (1659 to 1661) when he had to flee to Bhutan to escape capture at the hands of Mirjumla, Governor of Bengal.[3] In all likelihood, therefore, Paṇḍitarāja spent the first few years of his literary activity at the court of Jahangir. After his death in 1627 all was not well at Agra, and Paṇḍitarāja probably migrated to Udaipur (court of Jagatsiṁha). There would be otherwise no occasion for him to write a eulogy on Jagatsiṁha. After things had settled down at Agra and Shahjahan become the ruler, Paṇḍitarāja probably returned to the Moghul court, perhaps at the invitation of Shahjahan. Apparently he remained at Agra until Shahjahan's death in 1658. The Rasagaṅgādhara and the Citramīmāṁsākhaṇḍana as well as the Āsafavilāsa must have been written during this period.[4]

1. For a full discussion regarding the Lavaṅgī episode, see V. A. Ramaswamy Shastri, Jagannātha Paṇḍita, pp. 19-21.

2. See Pandit Mathuranatha Shastri, Introduction to Rasagaṅgādhara (6th Edition), p. 47, f.n. 9. The verse is undoubtedly genuine.

3. See V. A. Ramaswamy Shastri, Jagannātha Paṇḍita, pp. 59-61.

4. This is corroborated by the fact that we have a manuscript of Citramīmāṁsākhaṇḍana dated 1652-53 A.D. Citramīmāṁsākhaṇḍana was, of course, written after the Rasagaṅgādhara. See Kane, History of Sanskrit Poetics, p. 312.

It can be safely assumed that he migrated to Prāṇanārāyaṇa's court somewhere about 1658. But he could not have remained there for long, since in 1659 Prāṇanārāyaṇa himself had to flee to Bhutan. From the Assam Court Paṇḍitarāja appears to have gone to Banaras where he lived a quiet life of meditation and devotion.

(g) That Paṇḍitarāja spent his last days at Banaras rather than at Mathura, is not only supported by tradition, but would also seem probable, because it is hardly likely that he would return to the vicinity of Agra where political conditions were still unsettled. There is enough evidence to show that his father had his education and lived at Banaras. Paṇḍitarāja also must have spent his boyhood days there, and it would be only natural for him to return to Banaras, which was more or less his home, rather than to Mathura. We may also assume that he wrote the Manoramākucamardana and the Śabdakaustubhaśāṇottejana during this period. Banaras, rather than Mathura or Agra, would provide the necessary incentive and atmosphere for writing works on Grammar. The Bhāminīvilāsa, as is evident from the verse referred to above (PKS. 78.32), was compiled after Paṇḍitarāja had retired from a courtier's life.

(h) Thus, the sequence in which Paṇḍitarāja wrote the thirteen works would seem to be as follows:—

First period: before joining Shahjahan's court—the five Laharīs and the Jagadābharaṇa.

Second period: at Shahjahan's Court—Āsafavilāsa, Rasagaṅgādhara and Citramīmāṁsākhṇḍana.

Third period: at Prāṇanārāyaṇa's Court—Prāṇābharaṇa.

Fourth period: at Banaras—Manoramākucamardana, Śabdakaustubhaśāṇottejana and Bhāminīvilāsa (compilation).

(i) The exact date of Paṇḍitarāja's death as well as of his birth cannot be ascertained. If we accept the tradition that he died an old man, we may roughly put his date of birth around 1590 and his death around 1670.

ACKNOWLEDGEMENTS

We gratefully acknowledge the help rendered by the following :

1. Dr. S. Bhagavantam, former Vice-Chancellor of the Osmania University and Vice-President of the Sanskrit Academy, for kindly placing at our disposal a printed copy of Paṇḍitarāja's Anyoktis (in Telugu script).

2. Shri D. G. Padhye, for kindly supplying us with a hand-written copy of the Āsafavilāsa and other material.

3. The Bhandarkar Oriental Research Institute, Poona, for kindly lending to us their manuscript of the Āsafavilāsa.

4. The Managing Trustees of the Ānandāśrama, Poona, for kindly allowing us to copy their manuscript of the Jagadābharaṇa.

BIBLIOGRAPHY

1. Anyoktiaśatakasaṅgraha, ed. by Pratibha D. Trivedi, Bharatiya Vidya Bhavan Series No. II, Bombay, 1946.

2. Anyoktistabaka of Vaṁśīdhara Miśra, ed. by J. J. Parikh, and R. G. Asti, Chunnilal Gandhi Vidya Bhavan, Surat, 1955.

3. Bhāminīvilāsa, ed. Dr. Haradatta Sharma, Poona Oriental Series No. 50, 1935.

4. Bhāminīvilāsa, ed. Acyutaraya Modak, Nirnaya Sagara Press, Bombay, 1894.

5. Bhartṛhari-Śatakatrayam, Lakshmi Venkateswara Steam Press, Bombay, 1867.

6. History of Classical Sanskrit Literature, M. K. Acharya, Tirumalai Temple Devasthanam Press, 1937.

7. Descriptive Catalogue of MSS. in Mithilā, Vol. II, ed. K. P. Jayaswal, Bihar and Orrissa Research Society, Patna, 1933.

8. Gaṅgālaharī, ed. D. G. Padyhe, Poona Orienta Series No. 63, 1953.

9. Gaṅgālaharī, edited with Commentary by Pandit Lakshmana Shastri Panashikar, Nirnayasagara Press, Bombay, 1930.

10. History of Sanskrit Literature, Das Gupta and De, Vol. I, Calcutta University, 1947.

11. History of Sanskrit Poetics, P. V. Kane, 1951.

12. Jagannātha Paṇḍita, V. A. Ramaswamy Sastri, Annamalai University Sanskrit Series No. 8, 1942.

13. Kane Memorial Volume, ed. P. K. Gode, Poona Oriental Series, 1941.

14. Kāvyamālā Series, Nos. 1 to 14, Nirnayasagara Press, Bombay.

15. Kuvalayānanda, ed. Narayana Ramacarya, Nirnayasagara Press, Bombay, 1942.

16. Muslim Patronage to Sanskrit Learning, J. B. Chaudhuri, II Edition, Prācya Vāṇī Research Series, No. 3, Calcutta, 1954.

17. Padyāmṛtataraṅgiṇī, of Haribhāskara, ed. J. B. Chaudhuri, Calcutta, 1941.

18. Padyaveṇī of Veṇīdatta, ed. Chaudhuri, Prācyavāṇī Mandira Saṁskṛta Granthamālā, Vol. I, Calcutta 1944.

19. Pañcatantra, ed. Narayana Ramacarya, Nirnayasagara Press, Bombay, 1950.

20. Paṇḍitarāja Jīvitam, (Telugu), B. Satyanarayana Sarma, Albert Power Printing Press, Kakinada, 1926.

21. Rasagaṅgādhara, ed. Mathuranatha Sastri, Nirnayasagara Press, Bombay, 1947.

22. Sabhyālaṁkaraṇa, ed. J. B. Chaudhuri, Calcutta 1947.

23. Saṁskṛta-Kavi-Jīvitam, (in Telugu) Malladi Suryanarayana Sastri, Dhavaleswaram, 1910.

24. Sārṅgadharapaddhati, MS. in the Osmania University Collection.

25. Subhāṣitaratnabhāṇḍāgāra, Nirnayasagara Press, Bombay, 1935.

26. Subhāṣitaratnakośa of Vidyākara, Harvard University Press, 1957.

27. Subhāṣitāvalī, ed. Peterson & Durgaprasad, Education Society Press, Byculla, Bombay, 1886.

28. Sūktimuktāvalī, ed. E. Krisnamacarya, Gaikwad Oriental Series No. 82. Baroda, 1938.

29. Sūktimuktāvalī or Harihara-Subhāṣita, ed. Ramananda Jha, Newspapers & Publications Press Patna, 1949.

पण्डितराज - काव्य - सङ्ग्रहः

(१) गङ्गालहरी

(१) गङ्गालहरी

समृद्धं सौभाग्यं सकलवसुधायाः किमपि तन्
महैश्वर्यं लीलाजनितजगतः खण्डपरशोः ।
श्रुतीनां सर्वस्वं सुकृतमथ मूर्तं सुमनसां
सुधासौन्दर्यं ते सलिलमशिवं नः शमयतु ॥१॥

दरिद्राणां दैन्यं दुरितमथ दुर्वासनहृदां
द्रुतं दूरीकुर्वन् सकृदपि गतो दृष्टिसरणिम् ।
अपि द्रागाविद्याद्रुमदलनदीक्षागुरुरिह
प्रवाहस्ते वारां श्रियमयमपारां दिशतु नः ॥२॥

उदञ्चन्मार्तण्डस्फुटकपटहेरम्बजननी-
कटाक्षव्याक्षेपक्षणजनितसंक्षोभनिवहाः ।
भवन्तु त्वङ्गन्तो हरशिरसि गङ्गातनुभुव-
स्तरङ्गाः प्रोत्तुङ्गा दुरितभयभङ्गाय भवताम् ॥३॥

तवालम्बादम्ब स्फुरदलघुगर्वेण सहसा
मया सर्वेऽवज्ञासरणिमथ नीताः सुरगणाः ।
इदानीमौदास्यं भजसि यदि भागीरथि तदा
निराधारो हा रोदिमि कथय केषामिह पुरः ॥४॥

स्मृतिं याता पुंसामकृतसुकृतानामपि च या
हरत्यन्तस्तन्द्रां तिमिरमिव चन्द्रांशुसरणिः ।
इयं सा ते मूर्तिः सकलसुरसंसेव्यसलिला
ममान्तःसंतापं त्रिविधमपि पापं च हरताम् ॥५॥

अपि प्राज्यं राज्यं तृणमिव परित्यज्य सहसा
विलोलद्वानीरं तव जननि तीरं श्रितवताम् ।
सुधातः स्वादीयः सलिलभरमातृप्ति पिबतां
जनानामानन्दः परिहसति निर्वाणपदवीम् ॥६॥

प्रभाते स्नान्तीनां नृपतिरमणीनां कुचतटी-
गतो यावन् मातर्मिलति तव तोयैर्मृगमदः ।
मृगास्तावद् वैमानिकशतसहस्रैः परिवृता
विशन्ति स्वच्छन्दं विमलवपुषो नन्दनवनम् ॥७॥

स्मृतं सद्यः स्वान्तं विरचयति शान्तं सकृदपि
प्रगीतं यत् पापं झटिति भवतापं च हरति ।

इदं तद् गङ्गेति श्रवणरमणीयं खलु पदं
मम प्राणप्रान्तर्वदनकमलान्तर्विलसतु ॥८॥

यदन्तः खेलन्तो बहुलतरसंतोषभरिता
न काका नाकाधीश्वरनगरसाकाङ्क्षमनसः ।
निवासाल् लोकानां जनिमरणशोकापहरणं
तदेतत् ते तीरं श्रमशमनधीरं भवतु नः ॥९॥

न यत् साक्षाद् वेदैरपि गलितभेदैरवसितं
न यस्मिन् जीवानां प्रसरति मनोवागवसरः ।
निराकारं नित्यं निजमहिमनिर्वासिततमो
विशुद्धं यत् तत्त्वं सुरतटिनि तत् त्वं न विषयः ॥१०॥

महादानैर्ध्यानैर्बहुविधवितानैरपि च यन्
न लभ्यं घोराभिः सुविमलतपोराशिभिरपि ।
अचिन्त्यं तद् विष्णोः पदमखिलसाधारणतया
ददाना केनासि त्वमिह तुलनीया कथय नः ॥११॥

नृणामीक्षामात्रादपि परिहरन्त्या भवभयं
शिवायास्ते मूर्तेः क इह महिमानं निगदतु ।
अमर्षम्लानायाः परममनुरोधं गिरिभुवो
विहाय श्रीकण्ठः शिरसि नियतं धारयति याम् ॥१२॥

विनिन्द्यान्युन्मत्तैरपि च परिहार्याणि पतितै-
रवाच्यानि व्रात्यैः सपुलकमपास्यानि पिशुनैः ।
हरन्ती लोकानामनवरतमेनांसि कियतां
कदाप्यश्रान्ता त्वं जगति पुनरेका विजयसे ॥१३॥

स्खलन्ती स्वर्लोकादवनितलशोकापहृतये
जटाजूटग्रन्थौ यदसि विनिबद्धा पुरभिदा ।
अये निर्लोभानामपि मनसि लोभं जनयतां
गुणानामेवायं तव जननि दोषः परिणतः ॥१४॥

जडानन्धान् पङ्गून् प्रकृतिबधिरानुक्तिविकलान्
ग्रहग्रस्तानस्ताखिलदुरितनिस्तारसरणीन् ।
निलिम्पैर्निर्मुक्तानपि च निरयान्तर्निपततो
नरानम्ब त्रातुं त्वमिह परमं भेषजमसि ॥१५॥

स्वभावस्वच्छानां सहजशिशिराणामयमपा-
मपारस्ते मातर्जयति महिमा कोऽपि जगति ।

मुदा यं गायन्ति द्युतलमनवद्यद्युतिभृतः
समासाद्याद्यापि स्फुटपुलकसान्द्राः सगरजाः ॥१६॥

कृतक्षुद्राघौघानथ सपदि संतप्तमनसः
समुद्धर्तुं सन्ति त्रिभुवनतले तीर्थनिवहाः ।
अपि प्रायश्चित्तप्रसरणपथातीतचरितान्
नरानूरीकर्तुं त्वमिव जननि त्वं विजयसे ॥१७॥

निधानं धर्माणां किमपि च विधानं नवमुदां
प्रधानं तीर्थानाममलपरिधानं त्रिजगतः ।
समाधानं बुद्धेरथ खलु तिरोधानमधियां
श्रियामाधानं नः परिहरतु तापं तव वपुः ॥१८॥

पुरो धावंधावं द्रविणमदिराघूर्णितदृशां
महीपानां नानातरुणतरखेदस्य नियतम् ।
ममैवायं मन्तुः स्वहितशतहन्तुर्जडधियो
वियोगस्ते मातर्यदिह करुणातः क्षणमपि ॥१९॥

मरुल्लीलालोलल्लहरिलुलिताम्भोजपटली-
स्खलत्पांसुव्रातच्छुरणविसरत्कौङ्कुमरुचि ।
सुरस्त्रीवक्षोजक्षरदगुरुजम्बालजटिलं
जलं ते जम्बालं मम जननजालं जरयतु ॥२०॥

समुत्पत्तिः पद्मारमणपदपद्मामलनखान्
निवासः कन्दर्पप्रतिभटजटाजूटभवने ।
अथायं व्यासङ्गः पतितजननिस्तारणविधौ
न कस्मादुत्कर्षस्तव जननि जागर्ति जगति ॥२१॥

नगेभ्यो यान्तीनां कथय तटिनीनां कतमया
पुराणां संहर्तुः सुरधुनि कपर्दोऽधिरुरुहे ।
कया वा श्रीभर्तुः पदकमलमक्षालि सलिलै-
स्तुलालेशो यस्यां तव जननि दीयेत कविभिः ॥२२॥

विधत्तां निःशङ्कं निरवधि समाधिं विधिरहो
सुखं शेषे शेतां हरिरविरतं नृत्यतु हरः ।
कृतं प्रायश्चित्तैरलमथ तपोदानयजनैः
सवित्री कामानां यदि जगति जागर्ति भवती ॥२३॥

अनाथः स्नेहार्द्रां विगलितगतिः पुण्यगतिदां
पतन् विश्वोद्धर्त्रीं गदविगलितः सिद्धभिषजम् ।

सुधासिन्धुं तृष्णाकुलितहृदयो मातरमयं
शिशुः संप्राप्तस्त्वामहमिह विदध्याः समुचितम् ॥२४॥

विलीनो वै वैवस्वतनगरकोलाहलभरो
गता दूता दूरं क्वचिदपि परेतान् मृगयितुम् ।
विमानानां व्रातो विदलयति वीथीर्दिविषदां
कथा ते कल्याणी यदवधि महीमण्डलमगात् ॥२५॥

स्फुरत्कामक्रोधप्रबलतरसंजातजटिल-
ज्वरज्वालाजालज्वलितवपुषां नः प्रतिदिनम् ।
हरन्तां संतापं कमपि मरुदुल्लासलहरि-
च्छटाश्चञ्चत्पाथःकणसरणयो दिव्यसरितः ॥२६॥

इदं हि ब्रह्माण्डं सकलभुवनाभोगभवनं
तरङ्गैर्यस्यान्तर्लुठति परितस्तिन्दुकमिव ।
स एष श्रीकण्ठप्रविततजटाजूटजटिलो
जलानां संघातस्तव जननि तापं हरतु नः ॥२७॥

त्रपन्ते तीर्थानि त्वरितमिह यस्योद्धृतिविधौ
करं कर्णे कुर्वन्त्यपि किल कपालिप्रभृतयः ।
इमं तं मामम्ब त्वमियमनुकम्पार्द्रहृदये
पुनाना सर्वेषामघमथनदर्पं दलयसि ॥२८॥

श्वपाकानां व्रातैरमितविचिकित्साविचलितै-
र्विमुक्तानामेकं किल सदनमेनःपरिषदाम् ।
मुदा मामुद्धर्तुं जननि घटयन्त्याः परिकरं
तव श्लाघां कर्तुं कथमिव समर्थो नरपशुः ॥२९॥

न कोऽप्येतावन्तं खलु समयमारभ्य मिलितो
यदुद्धारादाराद् भवति जगतो विस्मयभरः ।
इतीमामीहां ते मनसि चिरकालं स्थितवती-
मयं संप्राप्तोऽहं सफलयितुमम्ब प्रणय नः ॥३०॥

श्ववृत्तिव्यासङ्गो नियतमथ मिथ्याप्रलपनं
कुतर्केष्वभ्यासः सततपरपैशुन्यमननम् ।
अपि श्रावंश्रावं मम तु पुनरेवंविधगुणा-
नृते त्वत् को नाम क्षणमपि निरीक्षेत वदनम् ॥३१॥

विशालाभ्यामाभ्यां किमिह नयनाभ्यां फलमसौ
न याभ्यामालीढा परमरमणीया तव तनुः ।

अयं तु न्यक्कारः श्रवणयुगलस्य त्रिपथगे
यदन्तर्नायातस्तव लहरिलीलाकलकलः ॥३२॥

विमानैः स्वच्छन्दं सुरपुरमयन्ते सुकृतिनः
पतन्ति द्राक् पापा जननि नरकान्तः परवशाः ।
विभागोऽयं तस्मिन्नशुभमयमूर्तौ जनपदे
न यत्र त्वं लीलादलितमनुजाशेषकलुषा ॥३३॥

अपि घ्नन्तो विप्रानविरतमुशन्तो गुरुसतीः
पिबन्तो मैरेयं पुनरपहरन्तश्च कनकम् ।
विहाय त्वय्यन्ते तनुमतनुदानाध्वरजुषा-
मुपर्यम्ब क्रीडन्त्यखिलसुरसंभावितपदाः ॥३४॥

अलभ्यं सौरभ्यं हरति सततं यः सुमनसां
क्षणादेव प्राणानपि विरहशस्त्रक्षतभृताम् ।
त्वदीयानां लीलाचलितलहरीणां व्यतिकरात्
पुनीते सोऽपि द्रागहह पवमानस्त्रिभुवनम् ॥३५॥

कियन्तः सन्त्येके नियतमिह लोकार्थघटकाः
परे पूतात्मानः कति च परलोकप्रर्णायिनः ।
सुखं शेते मातस्तव खलु कृपातः पुनरयं
जगन्नाथः शश्वत् त्वयि निहितलोकद्वयभरः ॥३६॥

भवत्या हि व्रात्याधमपतितपाखण्डपरिषत्-
परित्राणस्नेहः श्लथयितुमशक्यः खलु यथा ।
ममाप्येवं प्रेमा दुरितनिवहेष्वम्ब जगति ·
स्वभावोऽयं सर्वैरपि खलु यतो दुष्परिहरः ॥३७॥

प्रदोषान्तर्नृत्यत्पुरमथनलीलोद्धृतजटा-
तटाभोगप्रेङ्खल्लहरिभुजसंतानविधुतिः ।
बिलक्रोडक्रीडज्जलडमरुडंकारसुभग-
स्तिरोधत्तां तापं त्रिदशतटिनीताण्डवविधिः ॥३८॥

सदैव त्वय्येवार्पितकुशलचिन्ताभरमिमं
यदि त्वं मामम्ब त्यजसि समयेऽस्मिन् सुविषमे ।
तदा विश्वासोऽयं त्रिभुवनतलादस्तमयते
निराधारा चेयं भवति खलु निर्व्याजकरुणा ॥३९॥

कपर्दादुल्लस्य प्रणयमिलदर्धाङ्गयुवतेः
पुरारेः प्रेङ्खन्त्यो मृदुलतरसीमन्तसरणौ ।

भवान्या सापत्न्यस्फुरितनयनं कोमलरुचा
करेणाक्षिप्तास्ते जननि विजयन्तां लहरयः ॥४०॥

प्रपद्यन्ते लोकाः कति न भवतीमत्रभवती-
मुपाधिस्तत्रायं स्फुरति यदभीष्टं वितरसि ।
शपे तुभ्यं मातर्मम तु पुनरात्मा सुरधुनि
स्वभावादेव त्वय्यमितमनुरागं विधृतवान् ॥४१॥

ललाटे या लोकैरिह खलु सलीलं तिलकिता
तमो हन्तुं धत्ते तरुणतरमार्तण्डतुलनाम् ।
विलुम्पन्ती सद्यो विधिलिखितदुर्वर्णसरणिं
त्वदीया सन्मृत्स्ना मम हरतु कृत्स्नामपि शुचम् ॥४२॥

नरान् मूढांस्तत्तज्जनपदसमासक्तमनसो
हसन्तः सोल्लासं विकचकुसुमव्रातमिषतः ।
पुनानाः सौरभ्यैः सततमलिनो नित्यमलिनान्
सखायो नः सन्तु त्रिदशतटिनीतीरतरवः ॥४३॥

यजन्त्येके देवान् कठिनतरसेवांस्तदपरे
वितानव्यासक्ता यमनियमरक्ताः कतिपये ।
अहं तु त्वन्नामस्मरणभृतकामस्त्रिपथगे
जगज्जालं जाने जननि तृणजालेन सदृशम् ॥४४॥

अविश्रान्तं जन्मावधि सुकृतजन्मार्जनकृतो
सतां श्रेयः कर्तुं कति न कृतिनः सन्ति विबुधाः ।
निरस्तालम्बानामकृतसुकृतानां तु भवतीं
विनामुष्मिँल्लोके न परमवलोके हितकरम् ॥४५॥

पयः पीत्वा मातस्तव सपदि यातः सहचरै-
र्विमूढैः संरन्तुं क्वचिदपि न विश्रान्तिमगमम् ।
इदानीमुत्सङ्गे मृदुपवनसंचारशिशिरे
चिरादुन्निद्रं मां सदयहृदये शायय चिरम् ॥४६॥

बधान द्रागेव द्रढिमरमणीयं परिकरं
किरीटे बालेन्दुं नियमय पुनः पन्नगगणैः ।
न कुर्यास्त्वं हेलामितरजनसाधारणतया
जगन्नाथस्यायं सुरधुनि समुद्धारसमयः ॥४७॥

शरच्चन्द्रश्वेतां शशिशकलश्वेतालमुकुटां
करैः कुम्भाम्भोजे वरभयनिरासौ च दधतीम् ।

सुधाधाराकाराभरणवसनां शुभ्रमकर-
स्थितां त्वां ये ध्यायन्त्युदयति न तेषां परिभवः ॥४८॥

दरस्मितसमुल्लसद्वदनकान्तिपूरामृतै-
र्भवज्वलनभर्जितानिशमूर्जयन्ती नरान् ।
चिदेकमयचन्द्रिकाचयचमत्कृतिं तन्वती
तनोतु मम शं तनोः सपदि शन्तनोरङ्गना ॥४९॥

मन्त्रैर्मीलितमौषधैर्मुकुलितं त्रस्तं सुराणां गणैः
स्रस्तं सान्द्रसुधारसैर्विदलितं गारुत्मतैर्ग्रावभिः
वीचिक्षालितकालियाहितपदे स्वर्लोककल्लोलिनि
त्वं तापं तिरयाधुना मम भवज्वालावलीढात्मनः ॥५०॥

द्यूते नागेन्द्रकृत्तिप्रमथगणमणिश्रेणिनन्दीन्दुमुख्यं
सर्वस्वं हारयित्वा स्वमथ पुरभिदि द्राक् पणीकर्तुकामे ।
साकूतं हैमवत्या मृदुलहसितया वीक्षितायास्तवाम्ब
व्यालोलोल्लासिवल्गल्लहरिनटघटीताण्डवं नः पुनातु ॥५१॥

विभूषितानङ्गरिपूत्तमाङ्गा
सद्यःकृतानेकजनार्तिभङ्गा ।
मनोहरोत्तुङ्गचलत्तरङ्गा
गङ्गा ममाङ्गान्यमलीकरोतु ॥५२॥

इमां पीयूषलहरीं जगन्नाथेन निर्मिताम् ।
यः पठेत् तस्य सर्वत्र जायन्ते सुखसंपदः ॥५३॥

---

(२) अमृतलहरी

(२) अमृतलहरी

मातः पातकपातकारिणि तव प्रातः प्रयातस्तटं
यः कालिन्दि महेन्द्रनीलपटलस्निग्धां तनुं वीक्षते ।
तस्यारोहति किं न धन्यजनुषः स्वान्तं नितान्तोल्लस-
न्नीलाम्भोधरवृन्दवन्दितरुचिर्देवो रमावल्लभः ॥१॥

नित्यं पातकभङ्गसङ्गलजुषां श्रीकण्ठकण्ठत्विषां
तोयानां यमुने तव स्तवविधौ को याति वाचालताम् ।
येषु द्राग् विनिमज्ज्य सज्जतितरां रम्भाकराम्भोरुह-
स्फूर्जच्चामरवीजितामरपदं जेतुं वराको नरः ॥२॥

दानान्धीकृतगन्धसिन्धुरघटागण्डप्रणालीमिलद्-
भृङ्गालीमुखरीकृताय नृपतिद्वाराय बद्धोऽञ्जलिः ।
त्वत्कूले फलमूलशालिनि मम श्लाघ्यामुरीकुर्वतो
वृत्तिं हन्त मुनेः प्रयान्तु यमुने वीतज्वरा वासराः ॥३॥

अन्तर्मौक्तिकपुञ्जमञ्जिम बहिः स्निग्धेन्द्रनीलप्रभं
मातर्मे मुदमातनोतु करुणावत्या भवत्याः पयः ।
यद् रूपद्वयधारणादिव नृणामाचूडमामज्जतां
तत्कालं तनुतेतरां हरिहराकारामुदारां तनुम् ॥४॥

तावत् पापकदम्बडम्बरमिदं तावत् कृतान्ताद् भयं
तावन् मानसपद्मसद्मनि भवभ्रान्तेर्महानुत्सवः ।
यावल्लोचनयोः प्रयाति न मनागम्भोजिनीबन्धुजे
नृत्यत्तुङ्गतरङ्गभङ्गिरुचिरो वारां प्रवाहस्तव ॥५॥

कालिन्दीति कदापि कौतुकवशात् त्वन्नामवर्णानिमान्
व्यस्तानालपतां नृणां यदि करे खेलन्ति संसिद्धयः ।
अन्तर्ध्वान्तकुलान्तकारिणि तव क्षिप्तामृते वारिणि
स्नातानां पुनरन्वहं स महिमा केनाधुना वर्ण्यते ॥६॥

स्वर्णस्तेयपरानपेयरसिकान् पाथःकणास्ते यदि
ब्रह्मघ्नान् गुरुतल्पगानपि परित्रातुं गृहीतव्रताः ।
प्रायश्चित्तकुलैरलं तदधुना मातः परेताधिप-
प्रौढाहंकृतिहारिहुंकृतिमुचामग्रे तव स्रोतसाम् ॥७॥

पायंपायमपायहारि जननि स्वादु त्वदीयं पयो
नायंनायमनायनीमकृतिनां मूर्ति दृशोः कैशवीम् ।
स्मरंस्मारमपारपुण्यविभवं कृष्णेति वर्णद्वयं
चारंचारमितस्ततस्तव तटे मुक्तो भवेयं कदा ॥८॥

मातर्वारिणि पापहारिणि तव प्राणप्रयाणोत्सवं
सम्प्राप्तेन कृतां नरेण सहतेऽवज्ञां कृतान्तोऽपि यत् ।
यद्वा मण्डलभेदनादुदयिनीश्चण्डद्युतिर्वेदना-
श्चित्रं तत्र किमप्रमेयमहिमा प्रेमा यदौत्पत्तिकः ॥९॥

संज्ञाकान्तसुते कृतान्तभगिनि श्रीकृष्णनित्यप्रिये
पापोन्मूलिनि पुण्यधात्रि यमुने कालिन्दि तुभ्यं नमः ।
एवं स्नानविधौ पठन्ति खलु ये नित्यं गृहीतव्रता-
स्तानामन्त्रितसंख्यजन्मजनितं पापं क्षणादुज्झति ॥१०॥

अयं पण्डितराजेन श्रीजगन्नाथशर्मणा ।
स्तवः कलिन्दनन्दिन्या निर्मलो निरमीयत ॥११॥

(३) करुणालहरी

(३) करुणालहरी

विषीदता नाथ विषानलोपमे विषादभूमौ भवसागरे विभो ।
परं प्रतीकारमपश्यताधुना मयायमात्मा भवते निवेदितः ॥१॥

भवानलज्वालविलुप्तचेतनः शरण्य तेऽङ्घ्रिं शरणं भयादयाम् ।
विभाव्य भूयोऽपि दयासुधाम्बुधे विधेहि मे नाथ यथा यथेच्छसि ॥२॥

विहाय संसारमहासरुस्थलीमलीकदेहादिमिलन्मरीचिकाम् ।
कृपातरङ्गाकुलमन्मनोमृगो विगाढुमीश त्वयि गाढमीहते ॥३॥

त्वदङ्घ्रिफुल्लाम्बुजमध्यनिर्गलन्मरन्दनिःस्यन्दनितान्तलम्पटः ।
मनोमिलिन्दो मम मुक्तचापलस्त्वदन्यमीशान तृणाय मन्यते ॥४॥

जगत्त्रयत्राणविधौ धृतव्रतं तवाङ्घ्रिराजीवमपास्य ये जनाः ।
शरण्यमन्यन् मृगयन्ति यान्ति ते नितान्तमीशान कृतान्तदेहलीम् ॥५॥

रमामुखाम्भोजविकासनक्षमो जगत्त्रयोद्बोधविधानदीक्षितः ।
कदा मदज्ञानविभावरीं हरे हरिष्यति त्वन्नयनारुणोदयः ॥६॥

सुरासुरस्वान्तचकोरचुम्बिता समस्तसंतापचयापनोदिनी ।
महानिशीथे मम मानसे कदा स्फुरिष्यति त्वन्मुखचन्द्रचन्द्रिका ॥७॥

सुयौवनापाण्डुरगण्डमण्डलप्रतिस्फुरत्कुण्डलताण्डवाद्भुतम् ।
गदाग्रज त्वन्मुखफुल्लपङ्कजं कदा मदक्ष्णोरतिथीभविष्यति ॥८॥

सुरापगातुङ्गतरङ्गचालितां सुरासुरानीकललाटलालिताम् ।
कदा दधे देव दयामृतोदधे भवत्पदाम्भोरुहधूलिधोरणीम् ॥९॥

महाजवाश्छिन्नविवेकरश्मयो मदोद्धता देव मदक्षवाजिनः ।
हरे समासाद्य तवाङ्घ्रिमन्दुरामपास्तवेगा दधतां सुशीलताम् ॥१०॥

पुरातनानां वचसामगोचरं महेशितारं पुरुषोत्तमं पतिम् ।
अपास्य तं त्वां निरपत्रपा सती सती मतिर्मे कथमन्यमेष्यति ॥११॥

न जाग्रता स्वप्नगतेन वा मया समीहितं ते करुणालवादृते ।
गिरं मदीयां यदि वेत्सि तात्त्विकीं तदा जगन्नायक मामुरीकुरु ॥१२॥

अयि दीनतरं दयानिधे दुरवस्थं सकलैः समुज्झितम् ।
अधुनापि न मां निभालयन् भजसे हा कथमश्मचित्तताम् ॥१३॥

सुमहन्ति जगन्ति बिभ्रतस्तव यो नाविरभून् मनागपि ।
स कथं परमाप्त देहिनां परमाणोर्मम धारणे श्रमः ॥१४॥

नितरां विनयेन पृच्छते सुविचार्योत्तरमत्र यच्छ मे ।
करितो गिरितोऽप्यहं गुरुस्त्वरितो नोद्धरसे यदद्य माम् ॥१५॥

न धनं न च राज्यसंपदं नहि विद्यामिदमेकमर्थये ।
मयि धेहि मनागपि प्रभो करुणाभङ्गितरङ्गितां दृशम् ॥१६॥

अयमत्यधमोऽपि निर्गुणो दयनीयो भवता दयानिधे ।
वमतां फणिनां विषानलं किमु नानन्दयिता हि चन्दनः ॥१७॥

क्षुधितस्य नहि त्रपास्ति मे प्रतिरथ्यं प्रतिगृह्णतः कणान् ।
अकलङ्क यशस्करं न ते भवदीयोऽपि यदन्यमृच्छति ॥१८॥

नितरां नरकेऽपि सीदतः किमु हीनं गलितत्रपस्य मे ।
भगवन् कुरु सूक्ष्ममीक्षणं परतस्त्वां जनता किमालपेत् ॥१९॥

नरके निजकर्मकल्पिता भजतो मे महतीरपि व्यथाः ।
इदमेकमसह्यमीक्षका यदनाथं निगदन्ति मां विभो ॥२०॥

मृगदन्तिमुखान् मया सह प्रतिरुद्धान् भवजालबन्धने ।
तव मामपहाय मुञ्चतः करुणा किं न भिनत्ति मानसम् ॥२१॥

निरुपाधिजनार्तिहारिणं भगवंस्त्वामवगत्य तत्त्वतः ।
कृतपुण्यचयावहेलनं कथमब्जेक्षण मामुपेक्षसे ॥२२॥

सततं निगमेषु शृण्वता वरद त्वां पतितानुपावनम् ।
पुरु पापमुपास्यतेऽनिशं त्वयि विश्वासधिया मया विभो ॥२३॥

सुकृतं न कृतं पुरा कदाप्यथ सर्वं कृतमेव दुष्कृतम् ।
अधुना गलितह्रिया मया भगवंस्त्वां प्रति किं निगद्यताम् ॥२४॥

मदकामविमोहमत्सरा रिपवस्त्वत्पुर एव तावकम् ।
धृतशार्ङ्गगदारिनन्दक प्रतिकर्षन्ति कथं न वीक्षसे ॥२५॥

अयि गर्तमुखे गतः शिशुः पथिकेनापि निवार्यते जवात् ।
जनकेन पतन् भवार्णवे न निवार्यो भवता कथं विभो ॥२६॥

सुकृतप्रिय मान्यथास्तु ते सुकृतिभ्यः सुखदस्य सुप्रथा ।
अपि पापमबिभ्रतस्तु मां तव विश्वंभरनाम दुर्लभम् ॥२७॥

वचनैः परुषैरिह प्रभो यदि रोषं समुपागतोऽसि मे ।
मुखरं कृतकोटिकल्मषं करुणाब्धे जगतोऽपसारय ॥२८॥

यदि वीक्ष्य ददासि मत्कृतिं न मयैव प्रतिगृह्यते तदा ।
अथ चेन् निजमाशयं प्रभो परितुष्टः शिरसा वहामि तत् ॥२९॥

पतितोऽप्यतिदुर्गतोऽपि सन्नकृतज्ञो निखिलागसां पदम् ।
भवदीय इतीरयंस्त्वया दयनीयस्त्रपयैव केवलम् ॥३०॥

सुकृतप्रकृतौ जने त्वया कृतया किं कृपया कृपानिधे ।
यदि मादृशि सा विधीयते तव कीर्तिर्वद कीदृशी तदा ॥३१॥

अयि शैशवलालितः शिशुः प्रतिबुद्धो जनकेन ताड्यते ।
न कदापि च लालितस्त्वया किमु ताड्यो भगवन् कुकर्मभिः ॥३२॥

अहमेव हि दोषदूषितो भगवंस्त्वां समुपालभे मुधा ।
रमणीविरहज्वरज्वलन्नमृतांशुं कुमतिर्विनिन्दति ।।३३।।

करुणाकर दुर्दशाकुलं पतितालम्बन पापपञ्जरम् ।
अमृताम्बुनिधे महाज्वरं नहि जह्या जगदीश जातु माम् ।।३४।।

कटुजल्पनमल्पकस्य मे नहि ते कल्पयतु क्रुधं विभो ।
कुपितातुरबालभाषितं किमु गृह्णन्ति मनाङ् महाशयाः ।।३५।।

भुजगाहितकल्पितध्वज स्फुरदाशाभुजगालिवेल्लितम् ।
जटिलज्वरकुञ्जराङ्कुश ज्वरजुष्टं न जहीहि जातु माम् ।।३६।।

न वदामि न दुष्कृतं मया कृतमित्युक्तिमिमां तु मे शृणु ।
मम भीतिमनीनशद् विभो पतितोद्धारक नाम तावकम् ।।३७।।

अपि शर्वपितामहादिभिर्भजनीयः पुरुषोत्तमो हि यः ।
तमुपालभमानमुद्धतं धिगिमं मां धिगिमां धियं मम ।।३८।।

अथ सर्वमिदं मयोज्झितं भवतोऽन्यन् नहि किंचिदर्थये ।
मम मानसगोचरीभवत्वरविन्दाक्ष तवाद्भुतं वपुः ।।३९।।

हरिनीलमयावनीतले वरवृन्दाविपिने विलासिनि ।
मणिमण्डपमध्यविस्फुरद्विबुधक्ष्मारुहमूलमाश्रितम् ।।४०।।

शिखिपिच्छमहामणिस्फुरन्मुकुटाकुञ्चितकान्तकुन्तलम् ।
कमनीयतरालकावलिभ्रमणभ्राजिललाटसुन्दरम् ।।४१।।

शरदिन्दुसहोदराननं दलदम्भोजपलाशलोचनम् ।
अरुणाधरकान्तिदन्तुरस्फुटदन्तांशुविकासिताम्बरम् ।।४२।।

दरपाण्डुरगण्डमण्डलप्रतिसर्पत्कमनीयकुण्डलम् ।
मणिमौक्तिकमञ्जुमञ्जरीमहनीयद्युतिरञ्जितश्रुति ।।४३।।

पृथुवर्तुलमौक्तिकावलीसुषमावेल्लितकान्तकन्धरम् ।
हरिनीलगिरिद्युतिद्रुहा कमलामन्दिरवक्षसाञ्चितम् ।।४४।।

चरणाब्जनखावलम्बिनीं भुजगाकारभुजान्तरागताम् ।
निबिडाभ्रमिव क्षणप्रभां वहदुत्फुल्लवनामलस्रजम् ।।४५।।

मणिकङ्कणकान्तिमांसलं दरफुल्लाम्बुजसुन्दरद्युति ।
पतितोद्धरणे दृढव्रतं कमनीयं करयोर्युगं दधत् ।।४६।।

वररत्नमयाङ्गुलीयकावलिशोभामिलिताङ्गुलीगणैः ।
मुहुराकुलितेन वेणुना वशयत् प्राणभृतां मनःश्रुतीः ।।४७।।

उदरद्युतिनिम्नगोच्छलल्लहरीरूपकरोमराजिकम् ।
पशुपालविलासिनीलसन्नयनाकर्षणनाभिनिम्नितम् ।।४८।।

कनकद्रवगौरमम्बरं दधतोरुद्वितयेन सुन्दरम् ।
उदयन्मणिनूपुरप्रभासरणिश्रेणिजटालजानुकम् ।।४९।।

अरिगीर्णगजेन्द्रगोपने दधता जाङ्घिकतामलौकिकीम् ।
त्रिजगन्महनीयमूर्तिना वरजङ्घायुगलेन शोभितम् ॥५०॥

कुलिशाङ्कुशकम्बुसाम्बुजध्वजचक्राद्यभिरामलक्ष्मणा ।
अरुणारुणकोमलत्विषा कमनीयेन तलेन राजितम् ॥५१॥

विधिशर्वमुखामरस्फुरन्मुकुटोन्निद्रमणिप्रभाकुलम् ।
नखचन्द्रमयूखमूर्च्छिताखिलतापं पदयोर्युगं दधत् ॥५२॥

सरतः सरणौ सतो बहिः स्वपतो वालपतो गृहान्तरे ।
वपुरीदृशमीश तावकं हृदयालम्बनमस्तु मे सदा ॥५३॥ (कुलकम्)

नवनीरदनीलिमद्युतिर्नमनीयो निगमैर्निरन्तरम् ।
निरये निपतन्तमाशु मां नयनेनापि सनाथयेद् विभुः ॥५४॥

प्रणिपत्य विधे भवन्तमद्धा विनिबद्धाञ्जलिरेकमेव याचे ।
जनुरस्तु कुले कृषीवलानामपि गोविन्दपदारविन्दभाजाम् ॥५५॥

------

(४) लक्ष्मीलहरी

(४) लक्ष्मीलहरी

समुन्मीलन्नीलाम्बुजनिकरनीराजितरुचा-
मपाङ्गानां भङ्गैरमृतलहरीश्रेणिमसृणैः ।
ह्रिया हीनं दीनं भृशमुदरलीनं करुणया
हरिश्यामा सा मामवतु जडसामाजिकमपि ॥१॥

समुन्मीलत्वन्तःकरणकरुणोद्गारचतुरः
करिप्राणत्राणप्रणयिनि दृगन्तस्तव मयि ।
यमासाद्योन्माद्यद्द्विपनियुतगण्डस्थलगल-
न्मदक्लिन्नद्वारो भवति सुखसारो नरपतिः ॥२॥

उरस्यस्य भ्रश्यत्कबरभरनिर्यत्सुमनसः
पतन्ति स्वर्बालाः स्मरशरपराधीनमनसः ।
सुरास्तं गायन्ति स्फुरिततनु गङ्गाधरमुखा-
स्तवायं दृक्पातो यदुपरि कृपातो विलसति ॥३॥

समीपे संगीतस्वरमधुरभङ्गी मृगदृशां
विदूरे दानान्धद्विरदकलभोद्दामनिनदः ।
बहिर्द्वारि तेषां भवति हयहेषाकलकलो
दृगेषा ते येषामुपरि कमले देवि सदया ॥४॥

अगण्यैरिन्द्राद्यैरिह परमपुण्यैः परिचितो
जगज्जन्मस्थानप्रलयरचनाशिल्पनिपुणः ।
प्रसर्पत्पीयूषाम्बुधिलहरिलीलाविलसितो
दृगन्तस्तेऽमन्दं मम कलुषवृन्दं दलयतु ॥५॥

नमन्मौलिश्रेणित्रिपुरपरिपन्थिप्रतिलसत्-
कपर्दव्यावृत्तिस्फुरितफणिफूत्कारचकितः ।
लसत्फुल्लाम्भोजम्रदिमहरणः कोऽपि चरण-
श्चिरं चेतश्चारी मम भवतु वारीशदुहितुः ॥६॥

प्रवालानां दीक्षागुरुरपि च लाक्षारुणरुचां
नियन्त्री बन्धूकद्युतिनिकरबन्धूकृतिपटुः ।
नृणामन्तर्ध्वान्तं निबिडमपहर्तुं तव किल
प्रभातश्रीवेषा चरणरुचिरेषा विजयते ॥७॥

प्रभातप्रोन्मीलत्कमलवनसंचारसमये
शिखाः किंजल्कानां विदधति रुजं यत्र मृदुलाः ।

तदेतन् मातस्ते चरणमरुणश्लाघ्यकरुणं
कठोरा मद्वाणी कथमियमिदानीं प्रविशतु ॥८॥

स्मितज्योत्स्नामज्जद्द्विजमणिमयूखामृतझरै-
र्निषिञ्चन्तीं विश्वं तव विमलमूर्तिं स्मरति यः ।
अमन्दं स्यन्दन्ते वदनकमलादस्य कृतिनो
विविक्तौ वैकल्पाः सततमविकल्पा नवगिरः ॥९॥

शरौ मायाबीजौ हिमकरकलाक्रान्तशिरसौ
विधायोर्ध्वं बिन्दुं स्फुरितमिति बीजं जलधिजे ।
जपेद् यः स्वच्छन्दं स हि पुनरमन्दं गजघटा-
मदभ्राम्यद्भृङ्गैर्मुखरयति वेश्मानि विदुषाम् ॥१०॥

स्मरो नामंनामं त्रिजगदभिरामं तव पदं
प्रपेदे सिद्धिं यां कथमिव नरस्तां कथयतु ।
यया पातंपातं पदकमलयोः पर्वतचरो
हरो हा रोषार्द्रामनुनयति शैलेन्द्रतनयाम् ॥११॥

हरन्तो निःशङ्कं हिमकरकलानां रुचिरतां
किरन्तः स्वच्छन्दं किरणमयपीयूषनिकरम् ।
विलुम्पन्तु प्रौढा हरिहृदयहाराः प्रियतमा
ममान्तःसंतापं तव चरणशोणाम्बुजनखाः ॥१२॥

मिषान् माणिक्यानां विगलितनिमेषं निमिषता-
ममन्दं सौन्दर्यं तव चरणयोरम्बुधिसुते ।
पदालंकाराणां जयति कलनिक्वाणनपटु-
रुदञ्चन्नुद्दामः स्तुतिवचनलीलाकलकलः ॥१३॥

मणिज्योत्स्नाजालैर्निजतनुरुचां मांसलतया
जटालं ते जङ्घायुगलमघभङ्गाय भवतु ।
भ्रमन्ती यन्मध्ये दरदलितशोणाम्बुजरुचां
दृशां माला नीराजनमिव विधत्ते मुररिपोः ॥१४॥

हरद् गर्वं सर्वं करिपतिकराणां मृदुतया
भृशं भाभिर्दम्भं कनकमयरम्भावनिरुहाम् ।
लसज्जानुज्योत्स्नातरणिपरिणद्धं जलधिजे
तवोरुद्वन्द्वं नः श्लथयतु भवोरुज्वरभयम् ॥१५॥

कलक्वाणां काञ्चीं मणिगणजटालामधिवहन्
वसानः कौसुम्भं वसनमसनं कौस्तुभरुचाम् ।
मुनिव्रातैः प्रातः शुचिवचनजातैरतिनुतं
नितम्बस्ते बिम्बं हसति नवमम्बाम्बरमणेः ॥१६॥

जगत् मिथ्याभूतं मम निगदतां वेदवचसा-
मभिप्रायो नाद्यावधि हृदयमध्याविशदयम् ।
इदानीं विश्वेषां जनकमुदरं ते विमृशतो
विसंदेहं चेतोऽजनि गरुडकेतोः प्रियतमे ॥१७॥

अनल्पैर्वादीन्द्रैरगणितमहायुक्तिनिवहै-
र्निरस्ता विस्तारं क्वचिदकलयन्ती तनुमपि ।
असत्ख्यातिव्याख्याधिकचतुरिमाख्यातमहिमा
वलग्ने लग्नेयं सुगतमतसिद्धान्तसरणिः ॥१८॥

निदानं शृङ्गारप्रकरमकरन्दस्य कमले
महानेवालम्बो हरिनयनरोलम्बवरयोः ।
निदानं शोभानां निधनमनुतापस्य जगतो
जवेनाभीतिं मे दिशतु तव नाभीसरसिजम् ॥१९॥

गभीरामुद्वेलां प्रथमरसकल्लोलमिलितां
विगाढुं ते नाभीविमलसरसीं गौर्मम मनाक् ।
पदं यावन् न्यस्यत्यहह विनिमग्नैव सहसा
नहि क्षेमं सूते गुरुमहिमभूतेष्वविनयः ॥२०॥

कुचौ ते दुग्धाम्भोनिधिकुलशिखामण्डनमणे
हरेते सौभाग्यं यदि सुरगिरेश्चित्रमिह किम् ।
त्रिलोकीलावण्याहरणनवलीलानिपुणयो-
र्ययोर्दत्ते भूयः करमखिलनाथो मधुरिपुः ॥२१॥

हरक्रोधत्रस्यन्मदननवदुर्गद्वयतुलां
दधत् कोकद्वन्द्वद्युतिदमनदीक्षाधिगुरुताम् ।
तवैतद् वक्षोजद्वितयमरविन्दाक्षमहिले
मम स्वान्तध्वान्तं किमपि च नितान्तं गमयतु ॥२२॥

अनेकब्रह्माण्डस्थितिनियमलीलाविलसिते
दयापीयूषाम्भोनिधिसहजसंवासभवने ।
विधेश्चित्तायामे हृदयकमले ते तु कमले
मनाङ् मन्निस्तारस्मृतिरपि च कोणे निवसतु ॥२३॥

मृणालीनां लीलाः सहजलवणिम्ना लघयतां
चतुर्णां सौभाग्यं तव जननि दोष्णां वदतु कः ।
लुठन्ति स्वच्छन्दं मरकतशिलामांसलरुचः
श्रुतीनां स्पर्धां ये दधत इव कण्ठे मधुरिपोः ॥२४॥

अलभ्यं सौरभ्यं कविकुलनमस्या रुचिरता
तथापि त्वद्धस्ते निवसदरविन्दं विकसितम् ।

कलापे काव्यानां प्रकृतिकमनीयस्तुतिविधौ
गुणोत्कर्षाधानं प्रथितमुपमानं समजनि ॥२५॥

अनल्पं जल्पन्तु प्रतिहतधियः पल्लवतुलां
रसज्ञामज्ञानां क इव कमले मन्थरयतु ।
त्रपन्तु श्रीभिक्षावितरणवशीभूतजगतां
कराणां सौभाग्यं तव तुलयितुं तुङ्गरसनाः ॥२६॥

समाहारः श्रीणां विरचितविहारो हरिदृशां
परीहारो भक्तप्रभवभवसंतापसरणेः ।
प्रहारः सर्वासामपि च विपदां विष्णुदयिते
ममोद्धारोपायं तव सपदि हारो विमृशतु ॥२७॥

अलंकुर्वाणानां मणिगणघृणीनां लवणिमा
यदीयाभिर्भाभिर्भजति महिमानं लघुरपि ।
सुपर्वश्रेणीनां जनितपरसौभाग्यविभवा-
स्तवाङ्गुल्यस्ता मे ददतु हरिवामेऽभिलषितम् ॥२८॥

तपस्तेपे तीव्रं किमपि परितप्य प्रतिदिनं
तव ग्रीवालक्ष्मीलवपरिचयादाप्तविभवम् ।
हरिः कम्बुं चुम्बत्यथ वहति पाणौ किमधिकं
वदामस्तत्रायं प्रणयवशतोऽस्यै स्पृहयति ॥२९॥

अभूदप्रत्यूहः सकलहरिदुल्लासनविधि-
र्विलीनो लोकानां स हि नयनतापोऽपि कमले ।
तवास्मिन् पीयूषं किरति वदने रम्यवदने
कुतो हेतोश्चेतो विधुरयमुदेति स्म जलधेः ॥३०॥

मुखाम्भोजे मन्दस्मितमधुरकान्त्या विकसतां
द्विजानां ते हीरावलिविहितनीराजनरुचाम् ।
इयं ज्योत्स्ना कापि स्रवदमृतसंदोहसरसा
ममोद्यद्दारिद्र्यज्वरतरुणतापं तिरयतु ॥३१॥

कुलैः कस्तूरीणां भृशमनिशमाशास्यमपि च
प्रभातप्रोन्मीलन्नलिननिवहैरश्रुतचरम् ।
वहन्तः सौरभ्यं मृदुगतिविलासा मम शिवं
तव श्वासा नासापुटविहितवासा विदधताम् ॥३२॥

कपोले ते दोलायितललितलोलालकवृते
विमुक्ता धम्मिल्लादभिलसति मुक्तावलिरियम् ।
स्वकीयानां बन्दीकृतमसहमानैरिव बलात्
निबध्योर्ध्वं कृष्टा तिमिरनिकुरम्बैर्विधुकला ॥३३॥

प्रसादो यस्यायं नमदमितगीर्वाणमुकुट-
प्रसर्पज्ज्योत्स्नाभिश्चरणतलपीठार्चितविधिः ।

दृगम्भोजं तत् ते गतिहसितमत्तेभगमने
वने लीनैर्दीनैः कथय कथमीयादिह तुलाम् ।।३४।।

दुरापा दुर्वृत्तैर्दुरितदमने दारणभरा
दयार्द्रा दीनानामुपरि दलदिन्दीवरनिभा ।
वहन्ती दारिद्र्यद्रुमकुलमुदारद्रविणदा
त्वदीया दृष्टिर्मे जननि दुरदृष्टं दलयतु ।।३५।।

तव श्रोत्रे फुल्लोत्पलसकलसौभाग्यजयिनी
सदैव श्रीनारायणगुणगणौघप्रणयिनी ।
रवैर्दीनां लीनामनिशमवधानातिशयिनी
ममाप्येतां वाचं जलधितनये गोचरयताम् ।।३६।।

प्रभाजालैः प्राभातिकदिनकराभापनयनं
तवेदं खेदं मे विघटयतु ताटङ्कयुगलम् ।
महिम्ना यस्यायं प्रलयसमयेऽपि क्रतुभुजां
जगत् पायंपायं स्वपिति निरपायं तव पतिः ।।३७।।

निवासो मुक्तानां निबिडतरनीलाम्बुदनिभ-
स्तवायं धम्मिल्लो विमलयतु मल्लोचनयुगम् ।
भृशं यस्मिन् कालागुरुबहुलसौरभ्यनिवहैः
पतन्ति श्रीभिक्षार्थिन इव मदान्धा मधुलिहः ।।३८।।

विलग्नौ ते पार्श्वद्वयपरिसरे मत्तकरिणौ
करोन्नीतैरञ्चन्मणिकलशमुग्धास्यगलितैः ।
निषिञ्चन्तौ मुक्तामणिगणजयैस्त्वां जलकणै-
र्नमस्यामो दामोदरगृहिणि दारिद्र्यदलिताः ।।३९।।

अये मातर्लक्ष्मि त्वदरुणपदाम्भोजनिकटे
लुठन्तं बालं मामविरलगलद्बाष्पजटिलम् ।
सुधासेकस्निग्धैरतिमसृणमुग्धैः करतलैः
स्पृशन्ती मा रोदीरिति वद समाश्वास्यसि कदा ।।४०।।

रमे पद्मे लक्ष्मि प्रणतजनकल्पद्रुमलते
सुधाम्भोधेः पुत्रि त्रिदशनिकरोपास्तचरणे ।
परे नित्यं मातर्गुणमयि परब्रह्ममहिले
जगन्नाथस्याकर्णय मृदुलवर्णावलिमिमाम् ।।४१।।

---

(५) सुधालहरी

(५) सुधालहरी

उल्लासः फुल्लपङ्केरुहपटलपतन्मत्तपुष्पंधयानां
निस्तारः शोकदावानलविकलहृदां कोकसीमन्तिनीनाम् ।
उत्पातस्तामसानामुपहतमहसां चक्षुषां पक्षपातः
संघातः कोऽपि धाम्नामयमुदयगिरिप्रान्ततः प्रादुरासीत् ॥१॥

पद्मद्रोहोद्धुराणां धवलितहरितामैन्दवीनां द्युतीनां
दर्पं द्राग् द्रावयन्तो विदलदरुणिमोद्रेकदेदीप्यमानाः ।
दूरादेवान्धकारान्धितधरणितलद्योतने बद्धदीक्षा-
स्ते दैन्यध्वंसदक्षा मुदमुदयदिनोद्वेलदुस्रा दिशन्तु ॥२॥

त्रातामीवार्तलक्षाः प्रतिदिनविहितानेकगीर्वाणरक्षा
भक्तानां कल्पवृक्षाः स्फुरदनलगतस्वर्णभासां सदृक्षाः ।
लोकक्षेमात्तदीक्षा नलिनपरिषदां दत्तसौभाग्यलाक्षा
दुर्वृत्तध्वंसदक्षा मम रविकिरणाः सन्त्वघानां विपक्षाः ॥३॥

प्रालेयानां करालाः कवलितजगतीमण्डलध्वान्तजालाः
त्रातस्वर्लोकपाला विदलदरुणिमक्षिप्तबालप्रवालाः ।
विश्लिष्यत्कोकबालाज्वरहरणभवत्कीर्तिजालैर्जटाला
व्योमव्याप्तौ विशालास्त्वयि दधतु शिवं भास्वतो भानुमालाः ॥४॥

निर्भिद्य क्ष्मारुहाणामतिघनमुदरं येषु गोत्रां''गतेषु
द्राघिष्ठस्वर्णदण्डभ्रमभृतमनसो हन्त धित्सन्ति पादान् ।
यैः संभिन्ने दलाग्रप्रचलहिमकणे दाडिमीबीजबुद्ध्या
चञ्चूचाञ्चल्यमञ्चन्ति च शुकशिशवस्तेऽशवः पान्तु भानोः ॥५॥

अह्नि क्रीडोचितानां सरसिरुहलसन्मन्दिराणां प्रभाते
प्रोद्घाटच द्राक् कपाटान्यथ कुमुदगृहान् मुद्रयन्तो विमुक्तान् ।
सिञ्चन्तः किं च भूमीतलमखिलमपि क्षुण्णकाश्मीरनीरैः
पायासुः श्रीसपर्याविरचनपटवः पद्मबन्धोः करा नः ॥६॥

आलेपा हिङ्गुलीनामिव धरणिभुजामच्छसौधाग्रमौलि-
ष्वग्रेषु क्ष्मारुहाणामभिनवविदलत्पल्लवोल्लासलीलाः ।
प्रौढप्रालेयपुञ्जोपरि चितखदिराङ्गारभारा इवारात्
पारावारात् प्रयान्तो दिनकरकिरणा मङ्गलं नः कृषीरन् ॥७॥

कीलालैः कुङ्कुमानां निखिलमपि जगज्जालमेतन् निषिक्तं
मुक्ताश्चोन्मत्तभृङ्गा विदलितकमलक्रोडकारागृहेभ्यः ।

उत्सृष्टं गोसहस्रं बहलकलकलः श्रूयते च द्विजानां
भाग्यैर्वृन्दारकाणां हरिहयहरिता सूयते पुत्ररत्नम् ॥८॥

या सूते सर्वभूतेष्वनुदिनमुदये चेतनाया विलासान्
यान्ती सायं निकायं जलनिधिजठरं संजरीहर्ति सद्यः ।
अत्यर्थं वर्धयन्ती मणिगणसुषमासंपदं रत्नसानोः
सा नो भानोः प्रभा नो नयनसरणितो दूरतो जातु यातु ॥९॥

नीहारैर्नीरजानां निबिडतमतमोराशिभिर्लोचनानां
श्रौतस्मार्तक्रियाणामपि खलु निशया नाशमालक्ष्य दूरात् ।
सद्यः सिन्धोः सकाशादधिकतरजवेनागता वासवाशा-
माशापाशानशेषानपहरतुतरां तीक्ष्णभानोः प्रभा नः ॥१०॥

शीते शोकं शशाङ्के कृशतमरुचिताभाशु नाशं निशायां
धिक्कारं ध्वान्तवर्गे कुमुदपरिषदि प्रोद्गमं दीनतायाः ।
पाण्डित्यं पुण्डरीकेष्वनुदिनमधिकां कान्तिमाशासु तन्व-
न्नन्वञ्चत्यन्वहं द्यामुषसि करुणया विश्ववन्द्यो विवस्वान् ॥११॥

स्वापं स्वापाकुलानां गदमथ गदिनामन्धकारं त्रिलोक्याः
पापं पापाविलानां सपदि परिहरन्नागतो वासवाशाम् ।
नित्यप्रस्थानलीलाकुपितकमलिनीनर्मनिर्माणकर्मा
विश्वार्तित्राणधर्मा गगनमणिरसौ पातु शर्मानिशं वः ॥१२॥

अन्तर्नीरं नदीनामनुदिनमुदये बिम्बिता ये समन्ताद्
गीर्वाणाद्रेरुदञ्चन्मणिगणजटिलां मेदिनीं दर्शयन्ति ।
विप्रप्रोक्षिप्तसन्ध्याञ्जलिजलकणिकाजालसाकाशमध्ये
माणिक्यव्रातयन्तो मम मिहिरकरा मान्द्यमुन्मूलयन्तु ॥१३॥

प्रत्यग्रोढाः प्रगल्भा युवतिपरिषदः प्रोषितप्राणनाथा
यस्मिन्नस्ताद्रिमौलेरुपरिमणिमयच्छत्रलीलां दधाने ।
सत्रासं सप्रसादं परिणतकरुणं लोचनान्युत्क्षिपन्ति
स्थेमानं स प्रियाणां घटयतु भगवान् पद्मिनीवल्लभो वः ॥१४॥

अन्तर्द्यावापृथिव्योरधिरजनि भृतानन्धकारानुदारान्
विद्राव्य द्राक् तदीयैरिव जगदरुणं शोणितैर्यद् विधत्ते ।
सायं प्रातश्च सन्ध्याञ्जलिमवनिसुराः सम्प्रयच्छन्ति यस्मै
तस्मै कस्मैचिदेतन् मम परमहसे देवतायै नमोऽस्तु ॥१५॥

त्राणं त्रैविष्टपानां तरणमथ पयस्तोमताम्यत्तनूनां
नद्यन्तानामतर्क्यं त्रिगुणमयतया यत् त्रयाणां तुरीयम् ।
तत् तादृक् तुन्दिलायास्तरुणतरतमःसन्ततेरन्तकृत् त्वां
तेजस्त्रैलोक्यताम्रीकरणचतुरिम त्रायतां तीक्ष्णभानोः ॥१६॥

गीर्वाणग्रामणीभिर्गगनतलगतैर्गीर्भिरुद्गीथगाभि-
गन्धर्वैश्चापि गीता गुणगणगरिमोद्गारिगाथासहस्रैः ।
गाहंगाहं गृहालीरगतिकगदिनां गन्धयन्तो गदार्तिं
ग्लानिग्रामं ग्रसन्तां ग्रहरुचिगुरवो गोपतेर्गोविलासाः ॥१७॥

जीवातुर्जाड्यजालाधिकजनितरुजां तप्तजाम्बूनदाभं
जङ्घालं जाङ्घिकानां जलधिजठरतो जृम्भमाणं जगत्याम् ।
जीवाधानं जनानां जनकमथ रुचो जीवजैवातृकादे-
र्ज्योतिर्जाज्वल्यमानं जलजहितकृतो जायतां वो जयाय ॥१८॥

प्रातर्निर्गत्य गोभिः सह रुचिविषये संचरन्त्योऽह्नि ताभिः
साकं सायं निकायं प्रति पुनरपि याः सम्प्रयातुं त्वरन्ते ।
यासां दिव्यप्रभावस्त्रिजगदघवनश्रेणिदाहैकदावः
क्षेमं तन्वन्तु ता वः शिवमयवपुषो वासरेशस्य गावः ॥१९॥

वृन्दैर्वृन्दारकाणां दनुजतनुजुषां रक्षसां च क्षपान्ते
गन्धर्वाणां धुरीणैः प्रणतमहिवरैः किन्नरैर्यन् नरैश्च ।
विद्यां हृद्यां निजेभ्यो वितरदविरतं दीप्तिभिर्दीपयद् द्या-
मद्यादाद्यामविद्यामिदमुदयगिरेरुद्यदर्कस्य बिम्बम् ॥२०॥

आपाथोजासनायुः क्षणलवघटिकाद्यात्मकं कालचक्रं
प्राहुः पूर्वे पुराणागमविषयविदो यस्य लीलाविलासम् ।
भावानां षड् विकारानथ खलु गतिभिर्यश्च नित्यं प्रसूते
स प्रातः पौरुहूते परिलसति हरिन्मण्डले चण्डभानुः ॥२१॥

अङ्गानि ब्राह्मणानामुषसि हिमभरासङ्गतो भङ्गुराणि
व्यालक्ष्य द्राक् प्रयाता रिपुजनितरुषेवारुणा वासवाशाम् ।
धर्मध्वंसोद्धुराणामखिलमपि कुलं जक्षतः शोभितक्ष्मा
यक्ष्माणं मे हरन्तु त्वरितमघभिदो भानवश्चण्डभानोः ॥२२॥

विश्रान्तिं ब्राह्मणानां सुखमतिशयितं कामिनां स्थायिलीला-
मम्भोजानां प्रबोधं कुसुमपरिषदां यश्चिकीर्षन् दयार्द्रः ।
निर्यात्यन्तःसमुद्रं सकलमपि नृणां भारमाधाय वह्ना-
वह्नायाह्नामधीशः स भवतु भवतां भूयसे मङ्गलाय ॥२३॥

द्रागाहृत्य प्रभाते रजनिहिमवतः कौमुदीः कौतुकेन
प्रोद्यत्प्रौढानुकम्पाः पुनरपि खलु ये सायमुज्जीवयन्ति ।
आरुण्ये पल्लवानामथ गुरुचरणाः शक्रगोपावलीनां
ते युष्मद्भावलीनां दिनकरकिरणाः क्लान्तिमुन्मूलयन्तु ॥२४॥

द्रागद्वैतं वितन्वंस्त्रिभुवनमभितः कौङ्कुमीनां द्युतीनां
न्यक्कुर्वन् मान्द्यमुद्रामथ रजनिरुजां कोकसीमन्तिनीनाम् ।
तन्द्रान्धानान्ध्यसिन्धोरिह विततरैरुद्दधानं कराग्रैः
स्वान्तध्वान्तं धुनीतामुदयगिरिशिरश्चुम्बि मार्तण्डबिम्बम् ॥२५॥

शुद्धं ब्रह्मालवालं प्रकृतिशबलितं यस्य मूलं करास्त-
द्राघिष्ठस्वर्णशाखा विकसदरुणिमा पल्लवानां विलासः ।
नीलं व्योमालिमाला सुरसफलभरो धर्मकामार्थमोक्षाः
स श्रीमान् वाञ्छितार्थं वितरतु सततं सूर्यकल्पद्रुमो वः ॥२६॥

नीहारं निम्नगाभ्यो निखिलनयनतो नीरजेभ्यश्च निद्रां
नीडेभ्यो नीडजानां निकरमुषसि ये नित्यमुद्वासयन्ति ।
सायं तेष्वेव तेषां पुनरपि घृणया कल्पयन्ते च वासं
ते वः सन्तु प्रसादं घृणिघनघृणयो हन्तुमाबद्धकक्षाः ॥२७॥

संहृत्य द्राग् बहिःस्थं तिमिरकुलमथाभ्यन्तरं हर्तुकामा
रन्ध्रालीभिर्गृहाणामुदरमनुदिनं येऽविशङ्कं विशन्ति ।
भानोस्तेऽमी हृषीकाण्यखिलतनुभृतां हर्षयन्तो हितेहा
हृद्रोगं संहरन्तां हिममहिमहृतो हेमहृद्याः करा नः ॥२८॥

ब्रह्माण्डं मण्डयन्तो वियति वलयिनो मण्डलैरण्डजानां
पाखण्डान् दण्डयन्तो दनुतनुजनुषां शोभिताखण्डलाशाः ।
ये षण्डान् पौण्डरीकान् विदलयितुमथोद्दण्डपाण्डित्यभाज-
स्ते चण्डांशोरचण्डास्त्वरितमिह कराः पाण्डुतां खण्डयन्तु ॥२९॥

ऊर्ध्वं पापावलिभ्यः स्थित इति जगदे यस्य वेदैरुदाख्या
निन्युः कप्यासनाभं खलु सहचरतां नेत्रयोः पुण्डरीकम् ।
गेष्णावृक्साम यस्य द्रुतकनकनिभश्मश्रुकेशाखिलाङ्गः
सोऽयं सर्वान्तरात्मा तव दिशतुतरां वासरेशः शिवानि ॥३०॥

---

(६) प्रास्ताविकविलासः

(६) प्रास्ताविकविलासः

दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं
नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः ॥१॥

पुरा सरसि मानसे विकचसारसालिस्खलत्-
परागसुरभीकृते पयसि यस्य यातं वयः ।
स पल्वलजलेऽधुना मिलदनेकभेकाकुले
मरालकुलनायकः कथय रे कथं वर्तताम् ॥२॥

तृष्णालोलविलोचने कलयति प्राचीं चकोरीगणे
मौनं मुञ्चति किं च कैरवकुले कामे धनुर्धुन्वति ।
माने मानवतीजनस्य सपदि प्रस्थातुकामेऽधुना
धातः किं नु विधौ विधातुमुचितो धाराधराडम्बरः ॥३॥

अयि दलदरविन्द स्यन्दमानं मरन्दं
तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः ।
दिशि दिशि निरपेक्षस्तावकीनं विवृण्वन्
परिमलमयमन्यो बान्धवो गन्धवाहः ॥४॥

समुपागतवति दैवादवहेलां कुटज मधुकरे मा गाः ।
मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः ॥५॥

तावत् कोकिल विरसान् यापय दिवसान् वनान्तरे निवसन् ।
यावन् मिलदलिमालः कोऽपि रसालः समुल्लसति ॥६॥

नितरां नीचोऽस्मीति त्वं खेदं कूप मा कदापि कृथाः ।
अत्यन्तसरसहृदयो यतः परेषां गुणग्रहीतासि ॥७॥

कमलिनि मलिनीकरोषि चेतः
किमिति बकैरवहेलितानभिज्ञैः ॥
परिणतमकरन्दमार्मिकास्ते
जगति भवन्तु चिरायुषो मिलिन्दाः ॥८॥

येनामन्दमरन्दे दलदरविन्दे दिनान्यनायिषत ।
कुटजे खलु तेनेहा तेने हा मधुकरेण कथम् ॥९॥

अयि मलयज महिमायं कस्य गिरामस्तु विषयस्ते ।
उद्गिरतो यद् गरलं फणिनः पुष्णासि परिमलोद्गारैः ॥१०॥

पाटीर तव पटीयान् कः परिपाटीमिमामुरीकर्तुम् ।
यत् पिंषतामपि नृणां पिष्टोऽपि तनोषि परिमलैः पुष्टिम् ॥११॥

नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत् ।
विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः ॥१२॥

उपरि करवालधाराकाराः क्रूरा भुजङ्गमपुङ्गवात् ।
अन्तः साक्षाद् द्राक्षादीक्षागुरवो जयन्ति केऽपि जनाः ॥१३॥

स्वच्छन्दं दलदरविन्द ते मरन्दं
विन्दन्तो विदधतु गुञ्जितं मिलिन्दाः ।
आमोदानथ हरिदन्तराणि नेतुं
नैवान्यो जगति समीरणात् प्रवीणः ॥१४॥

याते मय्यचिरान् निदाघमिहिरज्वालाशतैः शुष्कतां
गन्ता कं प्रति पान्थसंततिरसौ संतापमालाकुला ।
एवं यस्य निरन्तराधिपटलैर्नित्यं वपुः क्षीयते
धन्यं जीवनमस्य मार्गसरसो धिग् वारिधीनां जनुः ॥१५॥

आपेदिरेऽम्बरपथं परितः पतङ्गा
भृङ्गा रसालमुकुलानि समाश्रयन्ति ।
संकोचमञ्चति सरस्त्वयि दीनदीनो
मीनो नु हन्त कतमां गतिमभ्युपैतु ॥१६॥

मधुप इव मारुतेऽस्मिन् मा सौरभलोभमम्बुजिनि मंस्थाः ।
लोकानामेव मुदे महितोऽप्यात्मामुनार्थितां नीतः ॥१७॥

गुञ्जति मञ्जु मिलिन्दे मा मालति मौनमुपयासीः ।
शिरसा वदान्यगुरवः सादरमेनं वहन्ति सुरतरवः ॥१८॥

यैस्त्वं गुणगणवानपि सतां द्विजिह्वैरसेव्यतां नीतः ।
तानपि वहसि पटीरज किं कथयामस्त्वदीयमौन्नत्यम् ॥१९॥

अपनीतपरिमलान्तरकथे पदं न्यस्य देवतरुकुसुमे ।
पुष्पान्तरेऽपि गन्तुं वाञ्छसि चेद् भ्रमर धन्योऽसि ॥२०॥

तटिनि चिराय विचारय विन्ध्यभुवस्तव पवित्रायाः ।
शुष्यन्त्या अपि युक्तं किं खलु रथ्योदकादानम् ॥२१॥

पत्रफलपुष्पलक्ष्म्या कदाप्यदृष्टं वृतं च खलु शूकैः ।
उपसर्पेम भवन्तं बर्बुर वद कस्य लोभेन ॥२२॥

एकस्त्वं गहनेऽस्मिन् कोकिल न कलं कदाचिदपि कुर्याः ।
साजात्यशङ्कयामी न त्वां निघ्नन्ति निर्दयाः काकाः ॥२३॥

तरुकुलसुषमापहरां जनयन्तीं जगति जीवजातार्तिम् ।
केन गुणेन भवानीतात हिमानीमिमां वहसि ॥२४॥

कलभ तवान्तिकमागतमलिमेनं मा कदाप्यवज्ञासीः ।
अपि दानसुन्दराणां द्विपधुर्याणामयं शिरोधार्यः ॥२५॥

अमरतरुकुसुमसौरभसेवनसंपूर्णसकलकामस्य ।
पुष्पान्तरसेवेयं भ्रमरस्य विडम्बना महती ॥२६॥

पृष्टाः खलु परपुष्टाः परितो दृष्टाश्च विटपिनः सर्वे ।
माकन्द न प्रपेदे मधुपेन तवोपमा जगति ॥२७॥

तोयैरल्पैरपि करुणया भीमभानौ निदाघे
मालाकार व्यरचि भवता या तरोरस्य पुष्टिः ।
सा किं शक्या जनयितुमिह प्रावृषेण्येन वारां
धारासारानपि विकिरता विश्वतो वारिदेन ॥२८॥

आरामाधिपतिर्विवेकविकलो नूनं रसा नीरसा
वात्याभिः परुषीकृता दश दिशश्चण्डातपो दुःसहः ।
एवं धन्वनि चम्पकस्य सकले संहारहेतावपि
त्वं सिञ्चन्नमृतेन तोयद कुतोऽप्याविष्कृतो वेधसा ॥२९॥

न यत्र स्थेमानं दधुरतिभयभ्रान्तनयना
गलद्दानोद्रेकभ्रमदलिकदम्बाः करटिनः ।
लुठन्मुक्ताभारे भवति परलोकं गतवतो
हरेरद्य द्वारे शिव शिव शिवानां कलकलः ॥३०॥

दधानः प्रेमाणं तरुषु समभावेन विपुलं
न मालाकारोऽसावकृत करुणां बालबकुले
अयं तु द्रागुद्यत्कुसुमनिकराणां परिमलै-
र्दिगन्तानातेने मधुपकुलझङ्कारभरितान् ॥३१॥

मूलं स्थूलमतीव बन्धनदृढं शाखाः शतं मांसला
वासो दुर्गमहीधरे तरुपते कुत्रास्ति भीतिस्तव ।

एकः किंतु मनागयं जनयति स्वान्ते ममाधिज्वरं
ज्वालालीवलयीभवन्नकरुणो दावानलो घस्मरः ॥३२॥

ग्रीष्मे भीष्मतरैः करैर्दिनकृता दग्धोऽपि यश्चातक-
स्त्वां ध्यायन् घन वासरान् कथमपि द्राघीयसो नीतवान् ।
दैवाल् लोचनगोचरेण भवता तस्मिन्निदानीं यदि
स्वीचक्रे करकानिपातनकृपा तत् कं प्रति ब्रूमहे ॥३३॥

दवदहनजटालज्वालजालाहतानां
परिगलितलतानां म्लायतां भूरुहाणाम् ।
अयि जलधर शैलश्रेणिशृङ्गेषु तोयं
वितरसि बहु कोऽयं श्रीमदस्तावकीनः ॥३४॥

शृण्वन् पुरः परुषगर्जितमस्य हन्त
रे पान्थ विह्वलमना न मनागपि स्याः ।
विश्वार्तिवारणसमर्पितजीवनोऽयं
नाकर्णितः किमु सखे भवताम्बुवाहः ॥३५॥

सौरभ्यं भुवनत्रयेऽपि विदितं शैत्यं तु लोकोत्तरं
कीर्तिः किं च दिगङ्गनाङ्गणगता किं त्वेतदेकं शृणु ।
सर्वानेव गुणानियं निगिरति श्रीखण्ड ते सुन्दरान्
उज्झन्ती खलु कोटरेषु गरलज्वालां द्विजिह्वावली ॥३६॥

नापेक्षा न च दाक्षिण्यं न प्रीतिर्न च सङ्गतिः ।
तथापि हरते तापं लोकानामुन्नतो घनः ॥३७॥

समुत्पत्तिः स्वच्छे सरसि हरिहस्ते निवसनं
निवासः पद्मायाः सुरहृदयहारी परिमलः ।
गुणैरेतैरन्यैरपि च ललितस्याम्बुज तव
द्विजोत्तंसे हंसे यदि रतिरतीवोन्नतिरियम् ॥३८॥

साकं ग्रावगणैर्लुठन्ति मणयस्तीरेऽर्कबिम्बोपमा
नीरे नीरचरैः समं स भगवान् निद्राति नारायणः ।
एवं वीक्ष्य तवाविवेकमपि च प्रौढिं परामुन्नतेः
किं निन्दाम्यथवा स्तवानि कथय क्षीरार्णव त्वामहम् ॥३९॥

किं खलु रत्नैरेतैः किं पुनरभ्रायितेन वपुषा ते ।
सलिलमपि यन् न तावकमर्णव वदनं प्रयाति तृषितानाम् ॥४०॥

इयत्यां संपत्तावपि च सलिलानां त्वमधुना
न तृष्णामार्तानां हरसि यदि कासार सहसा ।

निदाघे चण्डांशौ किरति परितोऽङ्गारनिकरान्
कृशीभूतः केषामहह परिहर्तासि खलु ताम् ॥४१॥

अयि रोषमुरीकरोषि नो चेत्
किमपि त्वां प्रति वारिधे वदामः ।
जलदेन तवार्थिना विमुक्ता-
न्यपि तोयानि महान् न हा जहासि ॥४२॥

न वारयामो भवतीं विशन्तीं वर्षानदि स्रोतसि जह्नुजायाः ।
न युक्तमेतत् तु पुरो यदस्यास्तरङ्गभङ्गान् प्रकटीकरोषि ॥४३॥

पौलोमीपतिकानने विलसतां गीर्वाणभूमीरुहां
येनाघ्रातसमुज्झितानि कुसुमान्याजघ्रिरे निर्जरैः ।
तस्मिन्नद्य मधुव्रते विधिवशान् माध्वीकमाकाङ्क्षति
त्वं चेदञ्चसि लोभमम्बुज तदा किं त्वां प्रति ब्रूमहे ॥४४॥

भुक्ता मृणालपटली भवता निपीता-
न्यम्बूनि यत्र नलिनानि निषेवितानि ।
रे राजहंस वद तस्य सरोवरस्य
कृत्येन केन भवितासि कृतोपकारः ॥४५॥

प्रारम्भे कुसुमाकरस्य परितो यस्योल्लसन्मञ्जरी-
पुञ्जे मञ्जुलगुञ्जितानि रचयंस्तानातनोरुत्सवान् ।
तस्मिन्नद्य रसालशाखिनि दशां दैवात् कृशामञ्चति
त्वं चेन् मुञ्चसि चञ्चरीक विनयं नीचस्त्वदन्योऽस्ति कः ॥४६॥

एणीगणेषु गुरुगर्वनिमीलिताक्षः
किं कृष्णसार खलु खेलसि काननेऽस्मिन् ।
सीमामिमां कलय भिन्नकरीन्द्रकुम्भ-
मुक्तामयीं हरिविहारवसुंधरायाः ॥४७॥

जठरज्वलनज्वलताप्यपगतशङ्कं समागतापि पुरः ।
करिणामरिणा हरिणा हरिणाली हन्यतां नु कथम् ॥४८॥

येन भिन्नकरिकुम्भविस्खलन्मौक्तिकावलिभिरञ्चिता मही ।
अद्य तेन हरिणान्तिके कथं कथ्यतां नु हरिणा पराक्रमः ॥४९॥

स्थितिं नो रे दध्याः क्षणमपि मदान्धेक्षण सखे
गजश्रेणीनाथ त्वमिह जटिलायां वनभुवि ।
असौ कुम्भिभ्रान्त्या खरनखरविद्रावितमहा-
गुरुग्रावग्रामः स्वपिति गिरिगर्भे हरिपतिः ॥५०॥

गिरिगह्वरेषु गुरुगर्वगुम्फितो
गजराजपोत न कदापि संचरेः ।
यदि बुध्यते हरिशिशुः स्तनंधयो
भविता करेणुपरिशेषिता मही ॥५१॥

निसर्गादारामे तरुकुलसमारोपसुकृती
कृती मालाकारो बकुलमपि कुत्रापि निदधे ।
इदं को जानीते यदयमिह कोणान्तरगतो
जगज्जालं कर्ता कुसुमभरसौरभ्यभरितम् ॥५२॥

यस्मिन् खेलति सर्वतः परिचलत्कल्लोलकोलाहलै-
र्मन्थाद्रिभ्रमणभ्रमं हृदि हरिद्दन्तावलाः पेदिरे ।
सोऽयं तुङ्गतिमिङ्गिलाङ्गकवलीकारक्रियाकोविदः
क्रोडे क्रीडतु कस्य केलिकलहत्यक्तार्णवो राघवः ॥५३॥

लूनं मत्तगजैः कियत् कियदपि च्छिन्नं तुषारार्दितैः
शिष्टं ग्रीष्मजभीष्मभानुकिरणैर्भस्मीकृतं काननम् ।
एषा कोणगता मुहुः परिमलैरामोदयन्ती दिशो
हा कष्टं ललिता लवङ्गलतिका दावाग्निना दह्यते ॥५४॥

स्वर्लोकस्य शिखामणिः सुरतरुग्रामस्य धामाद्भुतं
पौलोमीपुरुहूतयोः परिणतिः पुण्यावलीनामसि ।
सत्यं नन्दन किं त्विदं सहृदयैर्नित्यं विधिः प्रार्थ्यते
त्वत्तः खाण्डवरङ्गताण्डवनटो दूरेऽस्तु वैश्वानरः ॥५५॥

स्वस्वव्यापृतिमग्नमानसतया मत्तो निवृत्ते जने
चञ्चूकोटिविपाटितारपुटो यास्याम्यहं पञ्जरात् ।
एवं कीरवरे मनोरथमयं पीयूषमास्वादय-
त्यन्तः संप्रविवेश वारणकराकारः फणिग्रामणीः ॥५६॥

रे चाञ्चल्यजुषो मृगाः श्रितनगाः कल्लोलमालाकुला-
मेतामम्बुधिकामिनीं व्यवसिताः संगाहितुं वा कथम् ।
अत्रैवोच्छलदम्बुनिर्भरमहावर्तैः समावर्तितो
यद् ग्रावेव रसातलं पुनरसौ यातो गजग्रामणीः ॥५७॥

पिब स्तन्यं पोत त्वमिह मददन्तावलधिया
दृगन्तानाधत्से किमिति हरिदन्तेषु परुषान् ।
त्रयाणां लोकानामपि हृदयतापं परिहर-
न्नयं धीरं धीरं ध्वनति नवनीलो जलधरः ॥५८॥

धीरध्वनिभिरलं ते नीरद मे मासिको गर्भः ।
उन्मदवारणबुद्ध्या मध्येजठरं समुच्छलति ॥५९॥

वेतण्डगण्डकण्डूतिपाण्डित्यपरिपन्थिना ।
हरिणा हरिणालीषु कथ्यतां कः पराक्रमः ॥६०॥

नीरान् निर्मलतो जनिर्मधुरता रामामुखस्पर्धिनी
वासः किञ्च हरेः करे परिमलो गीर्वाणचेतोहरः ।
सर्वस्वं तदहो महाकविगिरां कामस्य चाम्भोरुह
त्वं चेत् प्रीतिमुरीकरोषि मधुपे तत् त्वां किमाचक्ष्महे ॥६१॥

लीलामुकुलितनयनं किं सुखशयनं समातनुषे ।
परिणामविषमहरिणा करिनायक वर्धते वैरम् ॥६२॥

विदुषां वदनाद् वाचः सहसा यान्ति नो बहिः ।
याताश्चेन् न पराञ्चन्ति द्विरदानां रदा इव ॥६३॥

औदार्यं भुवनत्रयेऽपि विदितं संभूतिरम्भोनिधे-
र्वासो नन्दनकानने परिमलो गीर्वाणचेतोहरः ।
एवं दातृगुरोर्गुणाः सुरतरोः सर्वेऽपि लोकोत्तराः
स्यादर्थिप्रवरार्थितार्पणविधावेको विवेको यदि ॥६४॥

एको विश्वसतां हराम्यपघृणः प्राणानहं प्राणिना-
मित्येवं परिचिन्त्य मात्ममनसि व्याधानुतापं कृथाः ।
भूपानां भवनेषु किं च विमलक्षेत्रेषु गूढाशयाः
साधूनामरयो वसन्ति कति न त्वत्तुल्यकक्षा नराः ॥६५॥

विश्वास्य मधुरवचनैः साधून् ये वञ्चयन्ति नम्रतमाः ।
तानपि दधासि मातः काश्यपि यातस्तवापि च विवेकः ॥६६॥

अन्या जगद्धितमयी मनसः प्रवृत्ति-
रन्यैव कापि रचना वचनावलीनाम् ।
लोकोत्तरा च कृतिराकृतिरार्तहृद्या
विद्यावतां सकलमेव गिरां दवीयः ॥६७॥

आपद्गतः खलु महाशयचक्रवर्ती
विस्तारयत्यकृतपूर्वमुदारभावम् ।
कालागुरुर्दहनमध्यगतः समन्ताल्
लोकोत्तरं परिमलं प्रकटीकरोति ॥६८॥

विश्वाभिरामगुणगौरवगुम्फितानां
रोषोऽपि निर्मलधियां रमणीय एव ।
लोकंपृणैः परिमलैः परिपूरितस्य
काश्मीरजस्य कटुतापि नितान्तरम्या ॥६९॥

लीलालुण्ठितशारदापुरमहासंपद्भराणां पुरो
विद्यासद्मविनिर्गलत्कणमुषो वल्गन्ति चेत् पामराः ।
अद्य श्वः फणिनां शकुन्तशिशवो दन्तावलानां शशाः
सिंहानां च सुखेन मूर्धसु पदं धास्यन्ति शालावृकाः ॥७०॥

गीर्भिर्गुरूणां परुषाक्षराभि-
स्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां
न जातु मौलौ मणयो वसन्ति ॥७१॥

वहति विषधरान् पटीरजन्मा शिरसि मषीपटलं दधाति दीपः ।
विधुरपि भजतेतरां कलङ्कं पिशुनजनं खलु बिभ्रति क्षितीन्द्राः ॥७२॥

सत्पूरुषः खलु हिताचरणैरमन्द-
मानन्दयत्यखिललोकमनुक्त एव ।
आराधितः कथय केन करैरुदारै-
रिन्दुर्विकासयति कैरविणीकुलानि ॥७३॥

परार्थव्यासङ्गादुपजहदथ स्वार्थपरता-
मभेदैकत्वं यो वहति गुणभूतेषु सततम् ।
स्वभावाद् यस्यान्तः स्फुरति ललितोदात्तमहिमा
समर्थो यो नित्यं स जयतितरां कोऽपि पुरुषः ॥७४॥

वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः ।
न हि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमानम् ॥७५॥

अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति ।
निखिलरसायनमहितो गन्धेनोग्रेण लशुन इव ॥७६॥

उपकारमेव तनुते विपद्गतः सद्गुणो नितराम् ।
मूर्च्छां गतो मृतो वा निदर्शनं पारदोऽत्र रसः ॥७७॥

वनान्ते खेलन्ती शशकशिशुमालोक्य चकिता
भुजप्रान्तं भर्तुर्भजति भयहर्तुः सपदि या ।
अहो सेयं सीता दशवदननीता हलरदैः
परीता रक्षोभिः श्रयति विवशा कामपि दशाम् ॥७८॥

पुरो गीर्वाणानां निजभुजबलाहोपुरुषिका-
महो कारंकारं पुरभिदि शरं संमुखयतः ।
स्मरस्य स्वर्बालानयनसुममालार्चनपदं
वपुः सद्यो भालानलभसितजालास्पदमभूत् ॥७९॥

युक्तं सभायां खलु मर्कटानां शाखास्तरूणां मृदुलासनानि ।
सुभाषितं चीत्कृतिरातिथेयी दन्तैर्नखाग्रैश्च विपाटितानि ॥८०॥

किं तीर्थं हरिपादपद्मभजनं किं रत्नमच्छा मतिः
किं शास्त्रं श्रवणेन यस्य गलति द्वैतान्धकारोदयः ।
किं मित्रं सततोपकाररसिकं तत्त्वावबोधः सखे
कः शत्रुर्वद खेददानकुशलो दुर्वासनानां चयः ॥८१॥

निष्णातोऽपि च वेदान्ते साधुत्वं नैति दुर्जनः ।
चिरं जलनिधौ मग्नो मैनाक इव मार्दवम् ॥८२॥

नैर्गुण्यमेव साधीयो धिगस्तु गुणगौरवम् ।
शाखिनोऽन्ये विराजन्ते खण्ड्यन्ते चन्दनद्रुमाः ॥८३॥

परोपसर्पणानन्तचिन्तानलशिखाशतैः ।
अचुम्बितान्तःकरणाः साधु जीवन्ति पादपाः ॥८४॥

शून्येऽपि च गुणवत्तामातन्वानः स्वकीयगुणजालैः ।
विवराणि मुद्रयन् द्रागूर्णायुरिव सुजनो जयति ॥८५॥

खलः सज्जनकार्पासरक्षणैकहुताशनः
परदुःखाग्निशमनो मारुतः केन वर्ण्यताम् ॥८६॥

परगुह्यगुप्तिनिपुणं गुणमयमखिलैः समीहितं नितराम् ।
ललिताम्बरमिव सज्जनमाखव इव दूषयन्ति खलाः ॥८७॥

यशःसौरभ्यलशुनः शान्तिशैत्यहुताशनः ।
कारुण्यकुसुमाकाशः खलः सज्जनदुःखदः ॥८८॥

धत्ते भरं कुसुमपत्रफलावलीनां
घर्मव्यथां वहति शीतभवां रुजं च ।
यो देहमर्पयति चान्यसुखस्य हेतो-
स्तस्मै वदान्यगुरवे तरवे नमोऽस्तु ॥८९॥

हालाहलं खलु पिपासति कौतुकेन
कालानलं परिचुचुम्बिषति प्रकामम् ।

व्यालाधिपं च यतते परिरब्धुमद्धा
यो दुर्जनं वशयितुं तनुते मनीषाम् ॥९०॥

दीनानामिह परिहाय शुष्कसस्या-
न्यौदार्यं प्रकटयतो महीधरेषु ।
औन्नत्यं विपुलमवाप्य दुर्मदस्य
ज्ञातोऽयं जलधर तावको विवेकः ॥९१॥

गिरयो गुरवस्तेभ्योऽप्युर्वी गुर्वी ततोऽपि जगदण्डम् ।
तस्मादप्यतिगुरवः प्रलयेऽप्यचला महात्मानः ॥९२॥

व्योमनि बीजाकुरुते चित्रं निर्माति सुन्दरं पवने ।
रचयति रेखाः सलिले यस्तु खले चरति सत्कारम् ॥९३॥

हारं वक्षसि केनापि दत्तमज्ञेन मर्कटः ।
लेढि जिघ्रति संक्षिप्य करोत्युन्नतमासनम् ॥९४॥

मलिनेऽपि रागपूर्णां विकसितवदनामनल्पजल्पेऽपि ।
त्वयि चपलेऽपि च सरसां भ्रमर कथं वा सरोजिनीं त्यजसि ॥९५॥

स्वार्थं धनानि धनिकात् प्रतिगृह्णतो य-
दास्यं भजेन् मलिनतां किमिदं विचित्रम् ।
गृह्णन् परार्थमपि वारिनिधेः पयोऽपि
मेघोऽयमेति सकलोऽपि च कालिमानम् ॥९६॥

जनकः सानुविशेषो जातिः काष्ठं भुजङ्गमैः सङ्गः ।
स्वगुणैरेव पटीरज यातोऽसि तथापि महिमानम् ॥९७॥

कस्मै हन्त फलाय सज्जन गुणग्रामार्जने सज्जसि
स्वात्मोपस्करणाय चेन् मम वचः पथ्यं समाकर्णय ।
ये भावा हृदयं हरन्ति नितरां शोभाभरैः संभृता-
स्तैरेवास्य कलेः कलेवरपुषो दैनंदिनं वर्तनम् ॥९८॥

धूमायिता दश दिशो दलितारविन्दा
देहं दहन्ति दहना इव गन्धवाहाः ।
त्वामन्तरेण मृदुताम्रदलाम्र मञ्जु-
गुञ्जन्मधुव्रत मधो किल कोकिलस्य ॥९९॥

भिन्ना महागिरिशिलाः करजाग्रजाग्र-
दुद्दामशौर्यनिकरैः करटिभ्रमेण ।
दैवे पराचि करिणामरिणा तथापि
कुत्रापि नापि खलु हा पिशितस्य लेशः ॥१००॥

गर्जितमाकर्ण्य मनागङ्के मातुर्निशार्धजातोऽपि ।
हरिशिशुरुत्पतितुं द्रागङ्गान्याकुञ्च्य लीयते निभृतम् ॥१०१॥

किमहं वदामि खल दिव्यमते गुणपक्षपातमभितो भवतः ।
गुणशालिनो निखिलसाधुजनान् यदहर्निशं न खलु विस्मरसि ॥१०२॥

रे खल तव खलु चरितं विदुषामग्रे विविच्य वक्ष्यामि ।
अथवालं पापात्मन् कृतया कथयापि ते हतया ॥१०३॥

आनन्दमृगदावाग्निः शीलशाखिमदद्विपः ।
ज्ञानदीपमहावायुरयं खलसमागमः ॥१०४॥

खलास्तु कुशलाः साधुहितप्रत्यूहकर्मणि ।
निपुणाः फणिनः प्राणानपहर्त्तुं निरागसाम् ॥१०५॥

वदने विनिवेशिता भुजङ्गी पिशुनानां रसनामिषेण धात्रा ।
अनया कथमन्यथावलीढा न हि जीवन्ति जना मनागमन्त्राः ॥१०६॥

कृतं त्वयोन्नतं कृत्यमर्जितं चामलं यशः ।
यावज्जीवं सखे तुभ्यं दास्यामो विपुलाशिषः ॥१०७॥

अविरतं परकार्यकृतां सतां मधुरिमातिशयेन वचोऽमृतम् ।
अपि च मानसमम्बुनिधिर्यशो विमलशारदचन्दिरचन्द्रिका ॥१०८॥

निर्गुणः शोभते नैव विपुलाडम्बरोऽपि ना ।
आपातरम्यपुष्पश्रीशोभितः शाल्मलिर्यथा ॥१०९॥

पङ्कैर्विना सरो भाति सदः खलजनैर्विना ।
कटुवर्णैर्विना काव्यं मानसं विषयैर्विना ॥११०॥

तत्त्वं किमपि काव्यानां जानाति विरलो भुवि ।
मार्मिकः को मरन्दानामन्तरेण मधुव्रतम् ॥१११॥

सरजस्कां पाण्डुवर्णां कण्टकप्रकरान्विताम् ।
केतकीं सेवसे हन्त कथं रोलम्ब निस्त्रपः ॥११२॥

यथा तानं विना रागो यथा मानं विना नृपः ।
यथा दानं विना हस्ती तथा ज्ञानं विना यतिः ॥११३॥

सन्तः स्वतः प्रकाशन्ते गुणा न परतो नृणाम् ।
आमोदो न हि कस्तूर्याः शपथेन विभाव्यते ॥११४॥

अयि बत गुरुगर्वं मा स्म कस्तूरि यासी-
रखिलपरिमलानां मौलिना सौरभेण ।
गिरिगहनगुहायां लीनमत्यन्तदीनं
स्वजनकममुनैव प्राणहीनं करोषि ॥११५॥

दूरीकरोति कुमतिं विमलीकरोति चेतश्चिरन्तनमघं चुलुकीकरोति ।
भूतेषु किं च करुणां बहुलीकरोति सङ्गः सतां किमु न मङ्गलमातनोति ।।११६।।

अविरतपरोपकरणव्यग्रीभवदमलचेतसां महताम् ।
आपातकाटवानि स्फुरन्ति वचनानि भेषजानीव ।।११७।।

व्यागुञ्जन्मधुकरपुञ्जमञ्जुगीतामाकर्ण्य स्तुतिमुदयन्नयातिरेकात् ।
आभूमीतलनतकन्धराणि मन्येऽरण्येऽस्मिन्नवनिरुहां कुटुम्बकानि ।।११८।।

मृतस्य लिप्सा कृपणस्य दित्सा विमार्गगायाश्च रुचिः स्वकान्ते ।
सर्पस्य शान्तिः कुटिलस्य मैत्री विधातृसृष्टौ न हि दृष्टपूर्वा ।।११९।।

उत्तमानामपि स्त्रीणां विश्वासो नैव विद्यते ।
राजप्रियाः कैरविण्यो रमन्ते मधुपैः सह ।।१२०।।

अयाचितः सुखं दत्ते याचितश्च न यच्छति ।
सर्वस्वं चापि हरते विधिरुच्छृङ्खलो नृणाम् ।।१२१।।

खण्डितानेत्रकञ्जालिमञ्जुरञ्जनपण्डिताः ।
मण्डिताखिलदिक्प्रान्ताश्चण्डांशोः पान्तु भानवः ।।१२२।।

---

(७) शृङ्गारविलासः

(७) शृङ्गारविलासः

न मनागपि राहुरोषशङ्का
न कलङ्कानुगमो न पाण्डुभावः ।
उपचीयत एव कापि शोभा
परितो भामिनि ते मुखस्य नित्यम् ॥१॥

नितरां परुषा सरोजमाला
न मृणालानि विचारपेशलानि ।
यदि कोमलता तवाङ्गकाना-
मथ का नाम कथापि पल्लवानाम् ॥२॥

स्वेदाम्बुसान्द्रकणशालिकपोलपाली-
दोलायितश्रवणकुण्डलमण्डनीया ।
आनन्दमङ्कुरयति स्मरणेन कापि
रम्या दशा मनसि मे मदिरेक्षणायाः ॥३॥

कस्तूरिकातिलकमालि विधाय सायं
स्मेरानना सपदि शीलय सौधमौलिम् ।
प्रौढिं भजन्तु कुमुदानि मुदामुदारा-
मुल्लासयन्तु परितो हरितो मुखानि ॥४॥

तन्मञ्जु मन्दहसितं श्वसितानि तानि
सा वै कलङ्कविधुरा मधुराननश्रीः ।
अद्यापि मे हृदयमुन्मदयन्ति हन्त
सायंतनाम्बुजसहोदरलोचनायाः ॥५॥

प्रातस्तरां प्रणमने विहिते गुरूणा-
माकर्ण्य वाचममलां भव पुत्रिणीति ।
नेदीयसि प्रियतमे परमप्रमोद-
पूर्णादरं दयितया दधिरे दृगन्ताः ॥६॥

गुरुजनभयमद्विलोकनान्तःसमुदयदाकुलभावमावहन्त्याः ।
दरदलदरविन्दसुन्दरं हा हरिणदृशो नयनं न विस्मरामि ॥७॥

बदरामलकाम्रदाडिमानामपहृत्य श्रियमुन्नतौ क्रमेण ।
अधुना हरणे कुचौ यतेते दयिते ते करिशावकुम्भलक्ष्म्याः ॥८॥

कपोलपालिं तव तन्वि मन्ये
लावण्यधन्ये दिशमुत्तराख्याम् ।
विभाति यस्यां ललितालकायां
मनोहरा वैश्रवणस्य लक्ष्मीः ॥९॥

नीवीं नियम्य शिथिलामुषसि प्रकाश-
मालोक्य वारिजदृशः शयनं जिहासोः ।
नैवावरोहति कदापि च मानसान् मे
नाभेः प्रभा सरसिजोदरसोदरायाः ॥१०॥

आलीषु केलीरभसेन बाला मुहुर्ममालापमुपालपन्ती ।
आराढुपाकर्ण्य गिरं मदीयां सौदामिनीयां सुषमामयासीत् ॥११॥

मुधैव मन्तुं परिकल्प्य गन्तुं मृषैव रोषादुपजल्पतो मे ।
उदश्रुचञ्चन्नयना नताङ्गी गिरं न कां कामुररीकरोति ॥१२॥

तदवधि कुशली पुराणशास्त्र-
स्मृतिशतचारुविचारजो विवेकः ।
यदवधि न पदं दधाति चित्ते
हरिणकिशोरदृशो दृशोर्विलासः ॥१३॥

आगतः पतिरितीरितं जनैः शृण्वती चकितमेत्य देहलीम् ।
कौमुदीव शिशिरीकरिष्यते लोचने मम कदा मृगेक्षणा ॥१४॥

अवधौ दिवसावसानकाले भवनद्वारि विलोचने दधाना ।
अवलोक्य समागतं तदा मामथ रामा विकसन्मुखी बभूव ॥१५॥

वक्षोजाग्रं पाणिनामृश्य दूरं
यातस्य द्रागाननाब्जं प्रियस्य ।
शोणाग्राभ्यां भामिनी लोचनाभ्यां
जोषं जोषं जोषमेवावतस्थे ॥१६॥

गुरुभिः परिवेल्लितापि गण्डस्थलकण्डूयनचारुकैतवेन ।
दरदर्शितहेमबाहुनाला मयि बाला नयनाञ्चलं चकार ॥१७॥

गुरुमध्यगता मया नताङ्गी निहता नीरजकोरकेण मन्दम् ।
दरकुण्डलताण्डवं नतभ्रूलतिकं मामवलोक्य घूर्णितासीत् ॥१८॥

विनये नयनारुणप्रसाराः प्रणतौ हन्त निरन्तराश्रुधाराः ।
अपि जीवितसंशयः प्रयाणे नहि जाने हरिणाक्षि केन तुष्येः ॥१९॥

अकरुण मृषाभाषासिन्धो विमुञ्च ममाञ्चलं
  तव परिचितः स्नेहः सम्यङ्ङ मयेत्यभिधायिनीम् ।
अविरलगलद्बाष्पां तन्वीं निरस्तविभूषणां
  क इह भवतीं भद्रे निद्रे विना विनिवेदयेत् ॥२०॥

तीरे तरुण्या वदनं सहासं
  नीरे सरोजं च मिलद्विकासम् ।
आलोक्य धावत्युभयत्र मुग्धा
  मरन्दलुब्धालिकिशोरमाला ॥२२॥

वीक्ष्य वक्षसि विपक्षकामिनीहारलक्ष्म दयितस्य भामिनी ।
अंसदेशविनिवेशितां क्षणादाचकर्ष निजबाहुवल्लरीम् ॥२३॥

दरानमत्कंधरबन्धमीषन्निमीलितस्निग्धविलोचनाब्जम् ।
अनल्पनिःश्वासभरालसाङ्गं स्मरामि सङ्गं चिरमङ्गनायाः ॥२३॥

रोषावेशान् निर्गतं यामयुग्मादेत्य द्वारं कांचिदाख्यां गृणन्तम् ।
मामाज्ञायैवाययौ कातराक्षी मन्दं मन्दं मन्दिरादिन्दिरेव ॥२४॥

हृदये कृतशैवलानुषङ्गा मुहुरङ्गानि यतस्ततः क्षिपन्ती ।
प्रियनामपरे मुखे सखीनामतिदीनामियमादधाति दृष्टिम् ॥२५॥

इत एव निजालयं गताया वनिताया गुरुभिः समावृतायाः ।
परिवर्तितकंधरं नतभ्रु स्मयमानं वदनाम्बुजं स्मरामि ॥२६॥

कथय कथमिवाशा जायतां जीविते मे
  मलयभुजगवान्ता वान्ति वाताः कृतान्ताः ।
अयमपि खलु गुञ्जन् मञ्जु माकन्दमौलौ
  चुलुकयति मदीयां चेतनां चञ्चरीकः ॥२७॥

निरुध्य यान्तीं तरसा कपोतीं कूजत्कपोतस्य पुरो दधाने ।
मयि स्मितार्द्रं वदनारविन्दं सा मन्दमन्दं नमयांबभूव ॥२८॥

तिमिरं हरन्ति हरितां पुरःस्थितं
  तिरयन्ति तापमथ तापशालिनाम् ।
वदनत्विषस्तव चकोरलोचने
  परिमुद्रयन्ति सरसीरुहश्रियः ॥२९॥

कुचकलशयुगान्तर्मामकीनं नखाङ्कं
  सपुलकतनु मन्दं मन्दमालोकयन्ती ।

विनिहितवदनं मां वीक्ष्य बाला गवाक्षे
चकितनतनताङ्गी सद्म सद्यो विवेश ॥३०॥

विधाय सा मद्वदनानुकूलं कपोलमूलं हृदये शयाना ।
तन्वी तदानीमतुलं बलारेः साम्राज्यलक्ष्मीमधरीचकार ॥३१॥

मुहुरर्थितयाद्य निद्रया मे
बत यामे चरमे निवेदितायाः ।
चिबुकं सुदृशो मृशामि यावन्
मयि तावन् मुदिरोऽपि निर्दयोऽभूत् ॥३२॥

श्रुतिशतमपि भूयः शीलितं भारतं वा
विरचयति तथा नो हन्त सन्तापशान्तिम् ।
अयि सपदि यथायं केलिविश्रान्तकान्ता-
वदनकमलवल्गत्कान्तिसान्द्रो नकारः ॥३३॥

लवलीं तव लीलया कपोले
कवलीकुर्वति कोमलत्विषा ।
परिपाण्डुरपुण्डरीकखण्डे
परिपेतुः परितो महाधयः ॥३४॥

यौवनोद्गमनितान्तशङ्किताः शीलशौर्यबलकान्तिलोभिताः ।
संकुचन्ति विकसन्ति राघवे जानकीनयननीरजश्रियः ॥३५॥

अधिरोप्य हरस्य हन्त चापं
परितापं प्रशमय्य बान्धवानाम् ।
परिणेष्यति वा युवा न वायं
निरपायं मिथिलाधिनाथपुत्रीम् ॥३६॥

भुजपञ्जरे गृहीता नवपरिणीता वरेण रहसि वधूः ।
तत्कालजालपतिता बालकुरङ्गीव वेपते नितराम् ॥३७॥

उपनिषदः परिपीता गीतापि च हन्त मतिपथं नीता ।
तदपि न हा विधुवदना मानससदनाद् बहिर्याति ॥३८॥

अकरुणहृदय प्रियतम मुञ्चामि त्वामितः परं नाहम् ।
इत्यालपति कराम्बुजमादायालीजनस्य विकला सा ॥३९॥

लोभाद् वराटिकानां विक्रेतुं तक्रमक्रममटन्त्या ।
लब्धो गोपकिशोर्या मध्येरथ्यं महेन्द्रनीलमणिः ॥४०॥

रूपाशंच निरसितुं रसयन्त्या हरिमुखस्य लावण्यम् ।
शिव शिव सुदृशः सकले जाता सकलेवरे जगत्यरुचिः ॥४१॥

किं जल्पसि मुग्धतया हन्त ममाङ्गं सुवर्णमिति ।
तद् यदि पतति हुताशे तदा हताशे तुलां तवारोहेत् ॥४२॥

औत्सुक्यात् परिमिलतां त्रपया संकोचमञ्चतां च मुहुः ।
नवसंगमयोर्यूनोर्नयनानामुत्सवो जयति ॥४३॥

गरिमाणमर्पयित्वा लघिमानं कुचतटात् कुरङ्गदृशाम् ।
स्वीकुर्वते नमस्ते यूनां धैर्याय निर्विवेकाय ॥४४॥

न्यञ्चति वयसि प्रथमे समुदञ्चति किञ्च तरुणिमनि सुदृशः ।
दधति स्म मधुरिमाणं वाचो गतयश्च विभ्रमाश्च भृशम् ॥४५॥

निःसीमशोभासौभाग्यं नताङ्ग्या नयनद्वयम् ।
अन्योन्यालोकनानन्दविरहादिव चञ्चलम् ॥४६॥

गुरुमध्ये हरिणाक्षी मार्तिकशकलैर्निहन्तुकामं माम् ।
रदयन्त्रितरसनाग्रं तरलितनयनं निवारयांचक्रे ॥४७॥

नयनाञ्चलावमर्शं या न कदाचित् पुरा सेहे ।
आलिङ्गितापि जोषं तस्थौ सा गन्तुकेन दयितेन ॥४८॥

मानपराग्वदनापि प्रिया शयानेव दयितकरकमले ।
उद्वेल्लद्भुजमलसग्रीवाबन्धं कपोलमाधत्ते ॥४९॥

लोचनफुल्लाम्भोजद्वयलोभान्दोलितैकमनाः ।
कस्तूरीतिलकमिषादयमलिकेऽलिस्तवोल्लसति ॥५०॥

अधिरजनि प्रियसविधे कथमपि संवेशिता गुरुभिः ।
किं भवितेति सशङ्कं पङ्कजनयना परामृशति ॥५१॥

चिन्तामीलितमानसो मनसिजः सख्यो विहीनप्रभाः
प्राणेशः प्रणयाकुलः पुनरसावास्तां समस्ता कथा ।
एतत् त्वां विनिवेदयामि मम चेदुक्तिं हितां मन्यसे
मुग्धे मा कुरु मानमाननमिदं राकापतिर्जेष्यति ॥५२॥

अलंकर्तुं कर्णौ भृशमनुभवन्त्या नवरुजं
ससीत्कारं तिर्यग्वलितवदनाया मृगदृशः ।
कराब्जव्यापारानतिसुकृतसारान् रसयतो
जनुः सर्वश्लाघ्यं जयति ललितोत्तंस भवतः ॥५३॥

आयातैव निशा निशापतिकरैः पूर्णं दिशामन्तरं
भामिन्यो भवनेषु भूषणगणैरङ्गान्यलंकुर्वते ।
मुग्धे मानमपाकरोषि न मनागद्यापि रोषेण ते
हा हा बालमृणालतोऽप्यतितरां तन्वी तनुः क्षाम्यति ।।५४।।

वाचो माङ्गलिकीः प्रयाणसमये जल्पत्यनल्पं जने
केलीमन्दिरमारुतायनमुखे विन्यस्तवक्त्राम्बुजम् ।
निःश्वासग्लपिताधरं परिपतद्बाष्पार्द्रवक्षोरुहा
बाला लोलविलोचना शिव शिव प्राणेशमालोकते ।।५५।।

दारिद्र्यं भजते कलानिधिरयं राकाधुना ग्लायति
स्वैरं कैरवकाननेषु परितो मालिन्यमुन्मीलति ।
द्योतन्ते हरिदन्तराणि सुहृदां वृन्दं समानन्दति
त्वं चेदञ्चसि काञ्चनाङ्गि वदनाम्भोजे विकासश्रियम् ।।५६।।

पाटीरद्रुभुजङ्गपुङ्गवमुखायाता इवातापिनो
वाता वान्ति दहन्ति लोचनममी ताम्रा रसालद्रुमाः ।
एते हन्त किरन्ति कूजितमयं हालाहलं कोकिला
बाला बालमृणालकोमलतनुः प्राणान् कथं रक्षतु ।।५७।।

आयातैव निशा मनो मृगदृशामुन्निद्रमातन्वती
मानो मे कथमेष संप्रति निरातङ्कं हृदि स्थास्यति ।
ऊहापोहमिमं सरोजनयना यावद् विधत्तेतरां
तावत् कामनृपातपत्रसुषमं बिम्बं बभासे विधोः ।।५८।।

प्रभातसमयप्रभां प्रणयिनि ह्नुवाना रसा-
दमुष्य निजपाणिना दृशममीलयल् लीलया ।
अयं तु खलु पद्मिनीपरिमलालिपाटच्चरै
रवेरुदयमध्यगादधिकचारु तैर्मारुतैः ।।५९।।

विदूरादाश्चर्यस्तिमितमथ किंचित्परिचया-
दुदञ्चच्चाञ्चल्यं तदनु परितः स्फारितरुचि ।
गुरूणां संघातं सपदि मयि याते समजनि
त्रपाघूर्णत्तारं नयनमिह सारङ्गजदृशः ।।६०।।

कपोलावुन्मीलत्पुलकनिकुरम्बौ मयि मनाक्
स्पृशत्यन्तःस्मेरस्तबकितमुखाम्भोरुहरुचः ।
कथंकारं शक्याः परिगदितुमिन्दीवरदृशो
दलद्द्राक्षानिर्यद्रसभरसपक्षा भणितयः ।।६१।।

राजानं जनयांबभूव सहसा जैवातृक त्वां तु यः
सोऽयं कुण्ठितसर्वशक्तिनिकरो जातो जरातो विधिः ।
संप्रत्युन्मदखञ्जरीटनयनावक्त्राय नित्यश्रिये
दाता राज्यमखण्डमस्य जगतो धाता नवो मन्मथः ॥६२॥

आविर्भूता यदवधि मधुस्यन्दिनी नन्दसूनोः
कान्तिः काचिन् निखिलनयनाकर्षणे कार्मणज्ञा ।
श्वासो दीर्घस्तदवधि मुखे पाण्डिमा गण्डमूले
शून्या वृत्तिः कुलमृगदृशां चेतसि प्रादुरासीत् ॥६३॥

प्रसङ्गे गोपानां गुरुषु महिमानं यदुपते–
रुपाकर्ण्य स्विद्यत्पुलकितकपोला कुलवधूः ।
विषज्वालाजालं झटिति वमतः पन्नगपतेः
फणायां साश्चर्यं कथयतितरां ताण्डवविधिम् ॥६४॥

कैशोरे वयसि क्रमेण तनुतामायाति तन्व्यास्तना–
वागामिन्यखिलेश्वरे रतिपतौ तत्कालमस्याज्ञया ।
आस्ये पूर्णशशाङ्कता नयनयोस्तादात्म्यमम्भोरुहां
किं चासीदमृतस्य भेदविगमः साचिस्मिते तात्त्विकः ॥६५॥

शयिता शैवलशयने सुषमाशेषा नवेन्दुलेखेव ।
प्रियमागतमपि सविधे सत्कुरुते मधुरवीक्षणेनैव ॥६६॥

विरहेण विकलहृदया विलपन्ती दयित दयितेति ।
आगतमपि सा सविधे परिचयहीनेव वीक्षते बाला ॥६७॥

अधरद्युतिरस्तपल्लवा मुखशोभा शशिकान्तिलङ्घिनी ।
तनुरप्रतिमा च सुभ्रुवो न विधेरस्य कृतिं विवक्षति ॥६८॥

व्यत्यस्तं लपति क्षणं क्षणमहो मौनं समालम्बते
सर्वस्मिन् विदधाति किं च विषये दृष्टिं निरालम्बनाम् ।
श्वासं दीर्घमुरीकरोति न मनागङ्गेषु धत्ते धृतिं
वैदेहीविरहव्यथाविकलितो हा हन्त लङ्केश्वरः ॥६९॥

उदितं मण्डलमिन्दो रुदितं सद्यो वियोगिवर्गेण ।
मुदितं च सकलललनाचूडामणिशासनेन मदनेन ॥७०॥

इदमप्रतिमं पश्य सरः सरसिजैर्वृतम् ।
सखे मा जल्प नारीणां नयनानि दहन्ति माम् ॥७१॥

मुञ्चसि नाद्यापि रुषं भामिनि मुदिरालिरुदियाय ।
इति सुदृशः प्रियवचनैरपायि नयनाब्जकोणशोणरुचिः ।।७२।।

आलोक्य सुन्दरि मुखं तव मन्दहासं
नन्दन्त्यमन्दमरविन्दधिया मिलिन्दाः ।
किं चासिताक्षि मृगलाञ्छनसम्भ्रमेण
चञ्चूपुटं चटुलयन्ति चिरं चकोराः ।।७३।।

स्मितं नैतत् किन्तु प्रकृतिरमणीयं विकसितं
मुखं ब्रूते को वा कुसुममिदमुद्यत्परिमलम् ।
स्तनद्वन्द्वं मिथ्या कनकनिभमेतत् फलयुगं
लता रम्या सेयं भ्रमरकुलनम्या न रमणी ।।७४।।

संग्रामाङ्गणसंमुखाहतकियद्विश्वंभराधीश्वर–
व्यादीर्णीकृतमध्यभागविवरोन्मीलन्नभोनीलिमा ।
अङ्गारप्रखरैः करैः कवलयन्नेतन् महीमण्डलं
मार्तण्डोऽयमुदेति केन पशुना लोके शशाङ्कीकृतः ।।७५।।

श्यामं सितं च सुदृशो न दृशोः स्वरूपं
किं तु स्फुटं गरलमेतदथामृतं च ।
नो चेत् कथं निपतनादनयोस्तदैव
मोहं मुदं च नितरां दधते युवानः ।।७६।।

अलिर्मृगो वा नेत्रं वा यत्र किंचिद् विभासते ।
अरविन्दं मृगाङ्को वा मुखं वेदं मृगीदृशः ।।७७।।

दयिते रदनत्विषां मिषा–
दयि तेऽमी विलसन्ति केसराः ।
अपि चालकवेषधारिणो
मकरन्दस्पृहयालवोऽलयः ।।७८।।

अनिशं नयनाभिरामया
रमया संमदिनो मुखस्य ते ।
निशि निःसरदिन्दिरं कथं
तुलयामः कलयापि पङ्कजम् ।।७९।।

अङ्गैः सुकुमारतरैः सा कुसुमानां श्रियं हरति ।
विकलयति कुसुमबाणो बाणालीभिर्मम प्राणान् ।।८०।।

खिद्यति सा पथि यान्ती कोमलचरणा नितम्बभारेण ।
खिद्यामि हन्त परितस्तद्रूपविलोकनेन विकलोऽहम् ।।८१।।

मथुरागमनोन्मुखे मुरारा–
वसुभारार्तिभृतां व्रजाङ्गनानाम् ।
प्रलयज्वलनायते स्म राका
भवनाकाशमजायताम्बुराशिः ॥८२॥

केलीमन्दिरमागतस्य शनकैरालीरपास्येङ्गितैः
सुप्तायाः सरुषः सरोरुहदृशः संवीजनं कुर्वतः ।
जानन्त्याप्यनभिज्ञयेव कपटव्यामीलिताक्ष्या सखि
श्रान्तासीत्यभिधाय वक्षसि तया पाणिर्ममासञ्जितः ॥८३॥

मान्थर्यमाप गमनं सह शैशवेन
रक्तं सहैव मनसाधरबिम्बमासीत् ।
किं चाभवन् मृगकिशोरदृशो नितम्बः
सर्वाधिको गुरुरयं सह मन्मथेन ॥८४॥

श्वासोऽनुमानवेद्यः शीतान्यङ्गानि निश्चला दृष्टिः ।
तस्याः सुभग कथेयं तिष्ठतु तावत् कथान्तरं कथय ॥८५॥

पाणौ कृतः पाणिरिलासुतायाः
सस्वेदकम्पो रघुनन्दनेन ।
हिमाम्बुगङ्गानिलविह्वलस्य
प्रभातपद्मस्य बभार शोभाम् ॥८६॥

अरुणमपि विद्रुमद्रुं मृदुलतरं चापि पल्लवं बाले ।
अधरीकरोति नितरां तवाधरो मधुरिमातिशयात् ॥८७॥

नयने वहतां नु खञ्जनानामिह नानाविधमङ्गभङ्गभाग्यम् ।
मुखमेतु तुलां कथं सुशोभं सुदृशो भङ्गुरसम्पदाम्बुजेन ॥८८॥

सुदृशो जितरत्नजालया सुरतान्तश्रमबिन्दुमालया ।
अलिकेन च हेमकान्तिना विदधे कापि रुचिः परस्परम् ॥८९॥

परपूरुषदृष्टिपातवज्राहतिभीता हृदयं प्रियस्य सीता ।
अविशत् परकामिनीभुजङ्गीभयतः सत्वरमेव सोऽपि तस्याः ॥९०॥

जम्बीरश्रियमतिलङ्घ्य लीलयैव
व्यानम्रीकृतकमनीयहेमकुम्भौ ।
नीलाम्भोरुहनयनेऽधुना कुचौ ते
स्पर्धेते किल कनकाचलेन सार्धम् ॥९१॥

अङ्गानि दत्त्वा हेमाङ्गि प्राणान् क्रीणासि चेन् नृणाम् ।
युक्तमेतन् न तु पुनः कोणं नयनपद्मयोः ॥९२॥

जितरत्नरुचां सदा रदानां
सहवासेन परां मुदं दधानाम् ।
विरसादधरीकरोति नासा-
मधुना साहसशालि मौक्तिकं ते ॥९३॥

निभाल्य भूयो निजगौरिमाणं
मा नाम मानं सहसैव यायाः ।
गृहे गृहे पश्य तवाङ्गवर्णा
मुग्धे सुवर्णावलयो लुठन्ति ॥९४॥

करिकुम्भतुलामुरोजयोः क्रियमाणां कविभिर्विशृङ्खलैः ।
कथमालि श्रृणोषि सादरं विपरीतार्थविदो हि योषितः ॥९५॥

तिरस्कृतो रोषवशात् परिष्वजन्
प्रियो मृगाक्ष्या शयितः पराङ्मुखः ।
किं दुःखितोऽसाविति कांदिशीकया
कयाचिदाचुम्ब्य चिराय सस्वजे ॥९६॥

चेलाञ्चलेनाननशीतरश्मि
संवृण्वतीनां हरिदृश्वरीणाम् ।
व्रजाङ्गनानां स्मरजातकम्पा-
दकाण्डसम्पातमियाय नीवी ॥९७॥

अधरेण समागमाद् रदानामरुणिम्ना पिहितोऽपि शुद्धभावः ।
हसितेन सितेन पक्ष्मलाक्ष्याः पुनरुल्लासमवाप जातपक्षः ॥९८॥

सरसिरुहोदरसुरभावधरितबिम्बाधरे मृगाक्षि तव ।
वद वदने मणिरदने ताम्बूलं केन लक्षयेम वयम् ॥९९॥

शयिता सविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान् ।
दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते ॥१००॥

किमिति कृशासि कृशोदरि किं तव परकीयवृत्तान्तैः ।
कथय तथापि मुदे मम कथयिष्यति पथिक तव जाया ॥१०१॥

वदनारविन्दसौरभलोभादिन्दिन्दिरेषु निपतत्सु ।
मय्यधरार्थिनि सुदृशो दृशो जयन्त्यतिरुषा परुषाः ॥१०२॥

यदवधि दयितो विलोचनाभ्यां सहचरि दैववशेन दूरतोऽभूत् ।
तदवधि शिथिलीकृतो मदीयैरथ करणैः प्रणयो निजक्रियासु ॥१०३॥

निखिलां रजनीं प्रियेण दूरादुपयातेन विबोधिता कथाभिः ।
अधिकं न हि पारयामि वक्तुं सखि मा जल्प तवायसी रसज्ञा ॥१०४॥

निपतद्बाष्पसंरोधमुक्तचाञ्चल्यतारकम् ।
कदा नयननीलाब्जमालोकेय मृगीदृशः ॥१०५॥

यदि लक्ष्मण सा मृगेक्षणा न मदीक्षासरणिं समेष्यति ।
अमुना जडजीवितेन मे जगता वा विफलेन किं फलम् ॥१०६॥

भवनं करुणावती विशन्ती गमनाज्ञालवलाभलालसेषु ।
तरुणेषु विलोचनाब्जमालामथ बाला पथि पातयांबभूव ॥१०७॥

पापं हन्त मया हतेन विहितं सीतापि यद् यापिता
सा मामिन्दुमुखी विना बत वने किं जीवितं धास्यति ।
आलोकेय कथं मुखं सुकृतिनां किं ते वदिष्यन्ति मां
राज्यं यातु रसातलं पुनरिदं न प्राणितुं कामये ॥१०८॥

उषसि प्रतिपक्षकामिनीसदनादन्तिकमञ्चति प्रिये ।
सुदृशो नयनाब्जकोणयोरुदियाय त्वरयारुणद्युतिः ॥१०९॥

क्षमापणैकपदयोः पदयोः पतति प्रिये ।
शेमुः सरोजवदनानयनारुणकान्तयः ॥११०॥

निर्वासयन्तीं धृतिमङ्गनानां शोभां हरेरेणदृशो धयन्त्याः ।
चिरापराधस्मृतिमांसलोऽपि रोषः क्षणप्राघुणिको बभूव ॥१११॥

राज्ञो मत्प्रतिकूलान् मे महद् भयमुपस्थितम् ।
बाले वारय पान्थस्य वासदानविधानतः ॥११२॥

मलयानिलमनलीयति मणिभवनं काननीयति क्षणतः ।
विरहेण विकलहृदया निर्जलमीनायते महिला ॥११३॥

कालागुरुद्रवं सा हालाहलवद् विजानती नितराम् ।
अपि नीलोत्पलमालां बाला व्यालावलिं किलामनुते ॥११४॥

विधिवञ्चितया मया न यातं सखि सङ्केतनिकेतनं प्रियस्य ।
अधुना बत किं विधातुकामो मयि कामो नृपतिः पुनर्न जाने ॥११५॥

प्रादुर्भवति पयोदे कज्जलमलिनं बभूव नभः ।
रक्तं च पथिकहृदयं कपोलपाली मृगीदृशः पाण्डुः ॥११६॥

सुविरलमौक्तिकतारे धवलांशुकचन्द्रिकाचमत्कारे ।
वदनपरिपूर्णचन्द्रे सुन्दरि राकासि नात्र संदेहः ॥११७॥

रूपजला चलनयना नाभ्यावर्ता कचावलीभुजगा ।
मज्जन्ति यत्र सन्तः सेयं तरुणी तरङ्गिणी विषमा ॥११८॥

शोणाधरांशुसंभिन्नास्तन्वि ते वदनाम्बुजे ।
केसरा इव काशन्ते कान्तदन्तालिकान्तयः ॥११९॥

तया तिलोत्तमीयन्त्या मृगशावकचक्षुषा ।
ममायं मानुषो लोको नाकलोक इवाभवत् ॥१२०॥

अङ्कायमानमलिके मृगनाभिपङ्कं पङ्केरुहाक्षि वदनं तव वीक्ष्य बिभ्रत् ।
उल्लासपल्लवितकोमलपक्ष्मूलाश्चञ्चूपुटं चटुलयन्ति चिरं चकोराः ॥१२१॥

शिशिरेण यथा सरोरुहं दिवसेनामृतरश्मिमण्डलम् ।
न मनागपि तन्वि शोभते तव रोषेण तथेदमाननम् ॥१२२॥

चलद्भृङ्गमिवाम्भोजमधीरनयनं मुखम् ।
तदीयं यदि दृश्येत कामः क्रुद्धोऽस्तु किं ततः ॥१२३॥

शतकोटिकठिनचित्तः सोऽहं तस्याः सुधैकमयमूर्तेः ।
येनाकारिषि मित्रं स विकलहृदयो विधिर्वाच्यः ॥१२४॥

श्यामलेनाङ्कितं बाले भाले केनापि लक्ष्मणा ।
मुखं तवान्तरासुप्तभृङ्गफुल्लाम्बुजायते ॥१२५॥

अद्वितीयं रुचात्मानं मत्वा किं चन्द्र हृष्यसि ।
भूमण्डलमिदं मूढ केन वा विनिभालितम् ॥१२६॥

नीलाञ्चलेन संवृतमाननमाभाति हरिणनयनायाः ।
प्रतिबिम्बित इव यमुनागभीरनीरान्तरेणाङ्कः ॥१२७॥

स्तनाभोगे पतन् भाति कपोलात् कुटिलोऽलकः ।
शशाङ्कबिम्बतो मेरौ लम्बमान इवोरगः ॥१२८॥

यथा लतायाः स्तबकानतायाः स्तनावनम्रे नितरां समासि ।
तथा लता पल्लविनी सगर्वे शोणाधरायाः सदृशी तवापि ॥१२९॥

इदं लताभिः स्तबकानताभिर्मनोहरं हन्त वनान्तरालम् ।
सदैव सेव्यं स्तनभारवत्यो न चेद् युवत्यो हृदयं हरेयुः ॥१३०॥

सा मदागमनबृंहिततोषा जागरेण गमिताखिलदोषा ।
बोधितापि बुबुधे मधुपैर्न प्रातराननजसौरभलुब्धैः ॥१३१॥

अविचिन्त्यशक्तिविभवेन सुन्दरि प्रथितस्य शम्बररिपोः प्रभावतः ।
विधुभावमञ्चतितमां तवाननं नयने सरोजदलनिर्विशेषताम् ॥१३२॥

मीनवती नयनाभ्यां करचरणाभ्यां प्रफुल्लकमलवती ।
शैवालिनी च केशैः सुरसेयं सुन्दरी सरसी ॥१३३॥

पान्थ मन्दमते किं वा संतापमनुविन्दसि ।
पयोधरं समाशास्व येन शान्तिमवाप्नुयाः ॥१३४॥

संपश्यतां तामतिमात्रतन्वीं शोभाभिराभासितसर्वलोकाम् ।
सौदामिनी वा सितयामिनी वेत्येवं जनानां हृदि संशयोऽभूत् ॥१३५॥

सपल्लवा किं नु विभाति वल्लरी सफुल्लपद्मा किमियं नु पद्मिनी ।
समुल्लसत्पाणिपदां स्मिताननामितीक्षमाणैः समलम्भि संशयः ॥१३६॥

नेत्राभिरामं रामाया वदनं वीक्ष्य तत्क्षणम् ।
सरोजं चन्द्रबिम्बं वेत्यखिलाः समशेरत ॥१३७॥

कनकद्रवकान्तिकान्तया मिलितं राममुदीक्ष्य कान्तया ।
चपलायुतवारिदभ्रमान् ननृते चातकपोतकैर्वने ॥१३८॥

वनितेति वदन्त्येतां लोकाः सर्वे वदन्तु ते ।
यूनां परिणता सेयं तपस्येति मतं मम ॥१३९॥

स्मयमानाननां तत्र तां विलोक्य विलासिनीम् ।
चकोराश्चञ्चरीकाश्च मुदं परतरां ययुः ॥१४०॥

वदनकमलेन बाले स्मितसुषमालेशमादधासि यदा ।
जगदिह तदैव जाने दशार्धबाणेन विजितमिति ॥१४१॥

कलिन्दजानीरभरेऽर्धमग्ना बकाः प्रकामं कृतभूरिशब्दाः ।
ध्वान्तेन वैराद् विनिगीर्यमाणाः क्रोशन्ति मन्ये शशिनः किशोराः ॥१४२॥

परस्परासङ्गसुखान् नतभ्रुवः पयोधरौ पीनतरौ बभूवतुः ।
तयोरमृष्यन्नयमुन्नतिं परामवैमि मध्यस्तनिमानमञ्चति ॥१४३॥

जनमोहकरं तवालि मन्ये चिकुराकारमिदं घनान्धकारम् ।
वदनेन्दुरुचामिहाप्रचारादिव तन्वङ्गि नितान्तकान्तिकान्तम् ॥१४४॥

दिवानिशं वारिणि कण्ठदघ्ने दिवाकराराधनमाचरन्ती ।
वक्षोजतायै किमु पक्ष्मलाक्ष्यास्तपश्चरत्यम्बुजपङ्क्तिरेषा ॥१४५॥

वियोगवह्निकुण्डेऽस्मिन् हृदये ते वियोगिनि ।
प्रियसङ्गसुखायेव मुक्ताहारस्तपस्यति ॥१४६॥

निधिं लावण्यानां तव खलु मुखं निर्मितवतो
महामोहं मन्ये सरसिरुहसूनोरुपचितम् ।
उपेक्ष्य त्वां यस्माद् विधुमयमकस्मादिह कृती
कलाहीनं दीनं विकल इव राजानमकरोत् ॥१४७॥

स्तनान्तर्गतमाणिक्यवपुर्बहिरुपागतम् ।
मनोऽनुरागि ते तन्वि मन्ये वल्लभमीक्षितुम् ॥१४८॥

जगदन्तरममृतमयैरंशुभिरापूरयन् नितराम् ।
उदयति वदनव्याजात् किमु राजा हरिणशावनयनायाः ॥१४९॥

तिमिरशारदचन्दिरचन्द्रिकाः कमलविद्रुमचम्पककोरकाः ।
यदि मिलन्ति कदापि तदाननं खलु तदा कलया तुलयामहे ॥१५०॥

प्रिये विषावं जहिहीति वाचं प्रिये सरागं वदति प्रियायाः ।
वारामुदारा विजगाल धारा विलोचनाभ्यां मनसश्च मानः ॥१५१॥

राज्याभिषेकमाज्ञाय शम्बरासुरवैरिणः ।
सुधाभिर्जगतीमध्यं लिम्पतीव सुधाकरः ॥१५२॥

आननं मृगशावाक्ष्या वीक्ष्य लोलालकावृतम् ।
भ्रमद्भ्रमरसंभारं स्मरामि सरसीरुहम् ॥१५३॥

यान्ती गुरुजनैः साकं स्मयमानाननाम्बुजा ।
तिर्यग्ग्रीवं यदद्राक्षीत् तन्निष्पत्राकरोज् जगत् ॥१५४॥

मृणालमन्दानिलचन्दनानामुशीरशैवालकुशेशयानाम् ।
वियोगदूरीकृतचेतनानां विनैव शैत्यं भवति प्रतीतिः ॥१५५॥

विबोधयन् करस्पर्शैः पद्मिनीं मुद्रिताननाम् ।
परिपूर्णोऽनुरागेण प्रातर्जयति भास्करः ॥१५६॥

आनम्य वल्गुवचनैर्विनिवारितेऽपि
रोषात् प्रयातुमुदिते मयि दूरदेशम् ।
बाला कराङ्गुलिनिदेशवशंवदेन
क्रीडाबिडालशिशुनाशु रुरोध मार्गम् ॥१५७॥

अभूदप्रत्यूहः कुसुमशरकोदण्डमहिमा
विलीनो लोकानां सह नयनतापोऽपि तिमिरैः ।

तवास्मिन् पीयूषं किरति परितस्तन्वि वदने ।
कुतो हेतोः श्वेतो विधुरयमुदेति प्रतिदिनम् ॥१५८॥

विनैव शस्त्रं हृदयानि यूनां विवेकभाजामपि दारयन्त्यः ।
अनल्पमायामयवल्गुलीला जयन्ति नीलाब्जदलायताक्ष्यः ॥१५९॥

यदवधि विलासभवनं यौवनमुदियाय चन्द्रवदनायाः ।
दहनं विनैव तदवधि यूनां हृदयानि दह्यन्ते ॥१६०॥

न मिश्रयति लोचने सहसितं न संभाषते
कथासु तव किं च सा विरचयत्यरालां भ्रुवम् ।
विपक्षसुदृशः कथामिति निवेदयन्त्या पुरः
प्रियस्य शिथिलीकृतः स्वविषयेऽनुरागग्रहः ॥१६१॥

वडवानलकालकूटवन्मकरव्यालगणैः सहैधितः ।
रजनीरमणो भवेन् नृणां न कथं प्राणवियोगकारणम् ॥१६२॥

लभ्येत पुण्यैर्गृहिणी मनोज्ञा तया सुपुत्राः परितः पवित्राः ।
स्फीतं यशस्तैः समुदेति नित्यं तेनास्य नित्यः खलु नाकलोकः ॥१६३॥

प्रभुरपि याचितुकामो भजते वामोरु लाघवं सहसा ।
यदहं त्वयाधरार्थी सपदि विमुख्या निराशतां नीतः ॥१६४॥

जलकुम्भमुम्भितरसं सपदि सरस्याः समानयन्त्यास्ते ।
तटकुञ्जगूढसुरतं भगवानेको मनोभवो वेद ॥१६५॥

त्वमिव पथिकः प्रियो मे विटपिस्तोमेषु गमयति क्लेशम् ।
किमितोऽन्यत् कुशलं मे संप्रति यत् पान्थ जीवामि ॥१६६॥

तुलामनालोक्य निजामखर्वं गौराङ्गि गर्वं न कदापि कुर्याः ।
लसन्ति नानाफलभारवत्यो लताः कियत्यो गहनान्तरेषु ॥१६७॥

इयमुल्लसिता मुखस्य शोभा परिफुल्लं नयनाम्बुजद्वयं ते ।
जलदालिमयं जगद् वितन्वन् कलितः क्वापि किमालि नीलमेघः ॥१६८॥

आसायं सलिलान्तः सवितारमुपास्य सादरं तपसा ।
अधुनाब्जेन मनाक् तव मानिनि तुलना मुखस्यापि ॥१६९॥

अयि मन्दस्मितमधुरं वदनं तन्वङ्गि यदि मनाक् कुरुषे ।
अधुनैव कलय शमितं राकारमणस्य हन्त साम्राज्यम् ॥१७०॥

मधुरतरं स्मयमानः स्वस्मिन्नेवालपञ्छनैः किमपि ।
कोकनदयंस्त्रिलोकीमालम्बनशून्यमीक्षते क्षीबः ।।१७१।।

मधुरसान् मधुरं हि तवाधरं तरुणि मद्वदने विनिवेशय ।
मम गृहाण करेण कराम्बुजं प-प-पतामि ह्-हा भ-भ-भूतले ।।१७२।।

शतेनोपायानां कथमपि गतः सौधशिखरं
सुधाफेनस्वच्छे रहसि शयितां पुष्पशयने ।
विबोध्य क्षामाङ्गीं चकितनयनां स्मेरवदनां
सनिःश्वासं श्लिष्यत्यहह सुकृती राजरमणीम् ।।१७३।।

गुञ्जन्ति मञ्जु परितो गत्वा धावन्ति संमुखम् ।
आवर्तन्ते विवर्तन्ते सरसीषु मधुव्रताः ।।१७४।।

यथा यथा तामरसेक्षणा मया पुनः सरागं नितरां निषेविता ।
तथा तथा तत्त्वकथेव सर्वतो विकृष्य मामेकरसं चकार सा ।।१७५।।

हरिणीप्रेक्षणा यत्र गृहिणी न विलोक्यते ।
सेवितं सर्वसंपद्भिरपि तद् भवनं वनम् ।।१७६।।

लोलालकावलिचलन्नयनारविन्दलीलावशंवदितलोकविलोचनायाः ।
सायाहनि प्राणयिनो भवनं व्रजन्त्याश्चेतो न कस्य हरते गतिरङ्गनायाः ।।१७७।।

दन्तांशुकान्तमरविन्दरसापहारि सान्द्रामृतं वदनमेणविलोचनायाः ।
वेधा विधाय पुनरुक्तमिवेन्दुबिम्बं दूरीकरोति न कथं विदुषां वरेण्यः ।।१७८।।

सानुकम्पाः सानुरागाश्चतुराः शीलशीतलाः ।
हरन्ति हृदयं हन्त कान्तायाः स्वान्तवृत्तयः ।।१७९।।

विलसत्याननं तस्या नासाग्रस्थितमौक्तिकम् ।
आलक्षितबुधाश्लेषं राकेन्दोरिव मण्डलम् ।।१८०।।

———

(८) करुणाविलासः

(८) करुणाविलासः

दैवे पराग्वदनशालिनि हन्त जाते
याते च सम्प्रति दिवं प्रति बन्धुरत्ने ।
कस्मै मनः कथयितासि निजामवस्थां
कः शीतलैः शमयिता वचनैस्तवाधिम् ॥१॥

प्रत्युद्गता सविनयं सहसा पुरेव
स्मेरैः स्मरस्य सचिवैः सरसावलोकैः ।
मामद्य मञ्जुरचनैर्वचनैश्च बाले
हा लेशतोऽपि न कथं शिशिरीकरोषि ॥२॥

सर्वेऽपि विस्मृतिपथं विषयाः प्रयाता
विद्यापि खेदगलिता विमुखीबभूव ।
सा केवलं हरिणशावकलोचना मे
नैवापयाति हृदयादधिदेवतेव ॥३॥

निर्वाणमङ्गलपदं त्वरया विशन्त्या
मुक्ता दयावति दयापि किल त्वयासौ ।
यन् मां न भामिनि निभालयसि प्रभात-
नीलारविन्दमदभङ्गकरैः कटाक्षैः ॥४॥

धृत्वा पदस्खलनभीतिवशात् करं मे
यारूढवत्यसि शिलाशकलं विवाहे ।
सा मां विहाय कथमद्य विलासिनि द्या-
मारोहसीति हृदयं शतधा प्रयाति ॥५॥

निर्दूषणा गुणवती रसभावपूर्णा
सालंकृतिः श्रवणकोमलवर्णराजिः ।
सा मामकीनकवितेव मनोऽभिरामा
रामा कदापि हृदयान् मम नापयाति ॥६॥

चिन्ता शशाम सकलापि सरोरुहाणा-
मिन्दोश्च बिम्बमसमां सुषमामयासीत् ।
अभ्युद्गतः कलकलः किल कोकिलानां
प्राणप्रिये यदवधि त्वमितो गतासि ॥७॥

सौदामिनीविलसितप्रतिमानकाण्डे
दत्वा कियन्त्यपि दिनानि महेन्द्रभोगान् ।

मन्त्रोज्झितस्य नृपतेरिव राज्यलक्ष्मी–
भग्यच्युतस्य करतो मम निर्गतासि ॥८॥

केनापि मे विलसितेन समुद्गतस्य
कोपस्य किं नु करभोरु वशंवदाभूः ।
यन् मां विहाय सहसैव पतिव्रतापि
यातासि मुक्तिरमणीसदनं विदूरम् ॥९॥

काव्यात्मना मनसि पर्यणमन् पुरा मे
पीयूषसारसरसास्तव ये विलासाः ।
तानन्तरेण रमणीरमणीयशीले
चेतोहरा सुकविता भविता कथं नः ॥१०॥

या तावकीनमधुरस्मितकान्तिकान्ता
भूमण्डले विफलतां कविषु व्यतानीत् ।
सा कातराक्षि विलयं त्वयि यातवत्यां
राकाधुना वहति वैभवमिन्दिरायाः ॥११॥

मन्दस्मितेन सुधया परिषिच्य या मां
नेत्रोत्पलैर्विकसितैरनिशं समीजे ।
सा नित्यमङ्गलमयी गृहदेवता मे
कामेश्वरी हृदयतो दयिता न याति ॥१२॥

भूमौ स्थिता रमण नाथ मनोहरेति
सम्बोधनैर्यमधिरोपितवत्यसि द्याम् ।
स्वर्गं गता कथमिव क्षिपसि त्वमेण–
शावाक्षि तं धरणिधूलिषु मामिदानीम् ॥१३॥

लावण्यमुज्ज्वलमपास्ततुलं च शीलं
लोकोत्तरं विनयमर्थमयं नयं च ।
एतान् गुणानशरणानथ मां च हित्वा
हा हन्त सुन्दरि कथं त्रिदिवं गतासि ॥१४॥

कान्त्या सुवर्णवरया परया च शुद्ध्या
नित्यं स्विकाः खलु शिखाः परितः क्षिपन्तीम् ।
चेतोहरामपि कुशेशयलोचने त्वां
जानामि कोपकलुषो दहनो ददाह ॥१५॥

कर्पूरवर्तिरिव लोचनतापहन्त्री
फुल्लाम्बुजस्रगिव कण्ठसुखैकहेतुः ।

चेतश्चमत्कृतिपदं कवितेव रम्या
नम्या नरीभिरमरीव हि सा विरेजे ॥१६॥

स्वप्नान्तरेऽपि खलु भामिनि पत्युरन्यं
या दृष्टवत्यसि न कंचन साभिलाषम् ।
सा सम्प्रति प्रचलितासि गुणैर्विहीनं
प्राप्तुं कथं कथय हन्त परं पुमांसम् ॥१७॥

दयितस्य गुणाननुस्मरन्ती
शयने सम्प्रति या विलोकितासीत् ।
अधुना खलु हन्त सा कृशाङ्गी
गिरमङ्गीकुरुते न भाषितापि ॥१८॥

रीतिं गिराममृतवृष्टिकरीं तदीयां
तां चाकृतिं कृतिवरैरभिनन्दनीयाम् ।
लोकोत्तरामथ कृतिं करुणारसार्द्रां
स्तोतुं न कस्य समुदेति मनःप्रसारः ॥१९॥

---

(६) शान्तविलासः

(६) शान्तविलासः

विशालविषयाटवीवलयलग्नदावानल-
प्रसृत्वरशिखावलीविकलितं मदीयं मनः ।
अमन्दमिलदिन्दिरे निखिलमाधुरीमन्दिरे
मुकुन्दमुखचन्दिरे चिरमिदं चकोरायताम् ॥१॥

अये जलधिनन्दिनीनयननीरजालम्बन
ज्वलज्ज्वलनजित्वरज्वरभरत्वराभङ्गुरम् ।
प्रभातजलजोन्नमद्गरिमगर्वसर्वंकषै-
र्जगत्त्रितयरोचनैः शिशिरयाशु मां लोचनैः ॥२॥

स्मृतापि तरुणातपं करुणया हरन्ती नृणा-
मभङ्गुरतनुत्विषां वलयिता शतैर्विद्युताम् ।
कलिन्दनगनन्दिनीतटसुरद्रुमालम्बिनी
मदीयमतिचुम्बिनी भवतु कापि कादम्बिनी ॥३॥

कलिन्दगिरिनन्दिनीतटवनान्तरं भावयन्
सदा पथि गतागतक्लमभरं हरन् प्राणिनाम् ।
लतावलिशतावृतो मधुरया रुचा संभृतो
ममाशु हरतु श्रमानतितरां तमालद्रुमः ॥४॥

वाचा निर्मलया सुधामधुरया यां नाथ शिक्षामदा-
स्तां स्वप्नेऽपि न संस्मराम्यहमहंभावावृतो निस्त्रपः ।
इत्यागःशतशालिनं पुनरपि स्वीयेषु मां बिभ्रत-
स्त्वत्तो नास्ति दयानिधिर्यदुपते मत्तो न मत्तोऽपरः ॥५॥

पातालं व्रज याहि वा सुरपरीमारोह मेरोः शिरः
पारावारपरम्परास्तर तथाप्याशा न शान्तास्तव ।
आधिव्याधिजरापराहत यदि क्षेमं निजं वाञ्छसि
श्रीकृष्णेति रसायनं रसय रे शून्यैः किमन्यैः श्रमैः ॥६॥

मृद्वीका रसिता सिता समशिता स्फीतं निपीतं पयः
स्वर्यातेन सुधाप्यधायि कतिधा रम्भाधरः खण्डितः ।
सत्यं ब्रूहि मदीय जीव भवता भूयो भवे भ्राम्यता
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः क्वचिल् लक्षितः ॥७॥

वज्रं पापमहीभृतां भवगदोद्रेकस्य सिद्धौषधं
मिथ्याज्ञाननिशाविशालतमसस्तिग्मांशुबिम्बोदयः ।

क्रूरक्लेशमहीरुहामुरुभरज्वालाजटालः शिखी
द्वारं निर्वृतिसद्मनो विजयते कृष्णेति वर्णद्वयम् ॥८॥

रे चेतः कथयामि ते हितमिदं वृन्दावने चारयन्
वृन्दं कोऽपि गवां नवाम्बुदनिभो बन्धुर्न कार्यस्त्वया ।
सौन्दर्यामृतमुद्गिरद्भिरभितः संमोह्य मन्दस्मितै-
रेष त्वां तव वल्लभांश्च विषयानाशु क्षयं नेष्यति ॥९॥

अव्याख्येयां वितरति परां प्रीतिमन्तर्निमग्ना
कण्ठे लग्ना हरति नितरां यान्तरध्वान्तजालम् ।
तां द्राक्षाद्यैरपि बहुमतां माधुरीमुद्गिरन्तीं
कृष्णेत्याख्यां कथय रसने यद्यसि त्वं रसज्ञा ॥१०॥

सन्त्येवास्मिन् जगति बहवः पक्षिणो रम्यरूपा-
स्तेषां मध्ये मम तु महती वासना चातकेषु ।
यैरध्यक्षैरथ निजसखं नीरदं स्मारयद्भि-
श्चित्तारूढं भवति किमपि ब्रह्म कृष्णाभिधानम् ॥११॥

विष्वद्रीच्या भुवनमभितो भासते यस्य भासा
सर्वेषामप्यहमिति विदां प्रत्ययालम्बनं यः ।
तं पृच्छन्ति स्वहृदयतलावेदिनो विष्णुमन्या-
नन्यायोऽयं शिव शिव नृणां केन वा वर्णनीयः ॥१२॥

सेवायां यदि साभिलाषमसि रे लक्ष्मीपतिः सेव्यतां
चिन्तायामसि सस्पृहं यदि तदा चक्रायुधश्चिन्त्यताम् ।
आलापं यदि काङ्क्षसि स्मररिपोर्गाथा तदालप्यतां
स्वापं वाञ्छसि चेन् निरर्गलसुखे चेतः सखे सुप्यताम् ॥१३॥

भवग्रीष्मप्रौढातपनिवहसंतप्तवपुषो
बलादुन्मूल्य द्राङ निगडमविवेकव्यतिकरम् ।
विशुद्धेऽस्मिन्नात्मामृतसरसि नैराश्यशिशिरे
विगाहन्ते दूरीकृतकलुषजालाः सुकृतिनः ॥१४॥

बन्धोन्मुक्त्यै खलु मखमुखान् कुर्वते कर्मपाशा-
नन्तःशान्त्यै मुनिशतमतानल्पचिन्तां भजन्ते ।
तीर्थे मज्जन्त्यशुभजलधेः पारमारोढुकामाः
सर्वं प्रामादिकमिह भवभ्रान्तिभाजां नराणाम् ॥१५॥

प्रथमं चुम्बितचरणा जङ्घाजानूरुनाभिहृदयानि ।
आलिङ्ग्य भावना मे खेलतु विष्णोर्मुखाब्जशोभायाम् ॥१६॥

तरणोपायमपश्यन्नपि मामक जीव ताम्यसि कुतस्त्वम् ।
चेतःसरणावस्यां किं नागन्ता कदापि नन्दसुतः ॥१७॥

श्रियो मे मा सन्तु क्षणमपि च माद्यद्गजघटा–
मदभ्राम्यद्भृङ्गावलिमधुरझंकारसुभगाः ।
निमग्नानां यासु द्रविणरसपर्याकुलदृशां
सपर्यासौकर्यं हरिचरणयोरस्तमयते ॥१८॥

किं निःशंकं शेषे शेषे वयसः समागतो मृत्युः ।
अथवा सुखं शयीथा निकटे जागर्ति जाह्नवी जननी ॥१९॥

संतापयामि किमहं धावं धावं धरातले हृदयम् ।
अस्ति मम शिरसि सततं नन्दकुमारः प्रभुः परमः ॥२०॥

रे रे मनो मम मनोभवशातनस्य
पादाम्बुजद्वयमनारतमानमन्तम् ।
किं मां निपातयसि संसृतिगर्तमध्ये
नैतावता तव गमिष्यति पुत्रशोकः ॥२१॥

मरकतमणिमेदिनीधरो वा तरुणतरस्तरुरेष वा तमालः ।
रघुपतिमवलोक्य तत्र दूरादृषिनिकरैरिति संशयः प्रपेदे ॥२२॥

तरणितनया किं स्यादेषा न तोयमयी हि सा
मरकतमणिज्योत्स्ना वा स्यान् न सा मधुरा कुतः ।
इति रघुपतेः कायच्छायाविलोकनकौतुकै–
र्वनवसतिभिः कैः कैरादौ न संदिदिहे जनैः ॥२३॥

चपला जलदाच् च्युता लता वा तरुमुख्यादिति संशये निमग्नः ।
गुरुनिःश्वसितैः कपिर्मनीषी निरणैषीदथ तां वियोगिनीति ॥२४॥

भूतिर्नीचगृहेषु विप्रसदने दारिद्र्यकोलाहलो
नाशो हन्त सतामसत्पथजुषामायुः शतानां शतम् ।
दुर्नीतिं तव वीक्ष्य कोपदहनज्वालाजटालोऽपि सन्
किं कुर्वे जगदीश यत् पुनरहं दीनो भवानीश्वरः ॥२५॥

आ मूलाद् रत्नसानोर्मलयवलयितादा च कूलात् पयोधे–
र्यावन्तः सन्ति काव्यप्रणयनपटवस्ते विशङ्कं वदन्तु ।
मृद्वीकामध्यनिर्यन्मसृणरसझरीमाधुरीभाग्यभाजां
वाचामाचार्यतायाः पदमनुभवितुं कोऽस्ति धन्यो मदन्यः ॥२६॥

गिरां देवी वीणागुणरणनहीनादरकरा
यदीयानां वाचाममृतमयमाचामति रसम् ।

वचस्तस्याकर्ण्य श्रवणसुभगं पण्डितपते-
रधुन्वन् मूर्धानं नृपशुरथवायं पशुपतिः ॥२७॥

मद्वाणि मा कुरु विषादमनादरेण
मात्सर्यमग्नमनसां सहसा खलानाम् ।
काव्यारविन्दमकरन्दमधुव्रताना-
मास्येषु धास्यसितमां कति नो विलासान् ॥२८॥

मधु द्राक्षा साक्षादमृतमथ वामाधरसुधा
कदाचित् केषांचिन् न खलु विदधीरन्नपि मुदम् ।
ध्रुवं ते जीवन्तोऽप्यहह मृतका मन्दमतयो
न येषामानन्दं जनयति जगन्नाथभणितिः ॥२९॥

निर्माणे यदि मार्मिकोऽसि नितरामत्यन्तपाकद्रवन्-
मृद्वीकामधुमाधुरीमदपरीहारोद्धुराणां गिराम् ।
काव्यं तर्हि सखे सुखेन कथय त्वं संमुखे मादृशां
नो चेद् दुष्कृतमात्मना कृतमिव स्वान्ताद् बहिर्मा कृथाः ॥३०॥

धुर्यैरपि माधुर्यैर्द्राक्षाक्षीरेक्षुमाक्षिकसुधानाम् ।
वन्द्यैव माधुरीयं पण्डितराजस्य कवितायाः ॥३१॥

शास्त्राण्याकलितानि नित्यविधयः सर्वेऽपि संभाविता
दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः ।
संप्रत्युज्झितवासनं मधुपुरीमध्ये हरिः सेव्यते
सर्वं पण्डितराजराजितिलकेनाकारि लोकाधिकम् ॥३२॥

दुर्वृत्ता जारजन्मानो हरिष्यन्तीति शङ्कया ।
मदीयपद्यरत्नानां मञ्जूषैषा कृता मया ॥३३॥

जगज्जालं ज्योत्स्नामयनवसुधाभिर्जटिलयन्
जनानां संतापं त्रिविधमपि सद्यः प्रशमयन् ।
श्रितो वृन्दारण्यं नतनिखिलवृन्दारकवृतो
मम स्वान्तध्वान्तं तिरयतु नवीनो जलधरः ॥३४॥

ग्रीष्मचण्डकरमण्डलभीष्मज्वालसंसरणतापितमूर्तेः ।
प्रावृषेण्य इव वारिधरो मे वेदनां हरतु वृष्णिवरेण्यः ॥३५॥

अपारे संसारे विषमविषयारण्यसरणौ
मम भ्रामं भ्रामं विगलितविरामं जडमतेः ।
परिश्रान्तस्यायं तरणितनयातीरनिलयः
समन्तात् संतापं हरिनवतमालस्तिरयतु ॥३६॥

आलिङ्गितो जलधिकन्यकया सलीलं
लग्नः प्रियङ्गुलतयेव तरुस्तमालः ।
देहावसानसमये हृदये मदीये
देवश्चकास्तु भगवानरविन्दनाभः ॥३७॥

नयनानन्दसंदोहतुन्दिलीकरणक्षमा ।
तिरयत्वाशु संतापं कापि कादम्बिनी मम ॥३८॥

गणिकाजामिलमुख्यानवता भवता बताहमपि ।
सीदन् भवमरुगर्ते करुणामूर्ते न सर्वथोपेक्ष्यः ॥३९॥

मलयानिलकालकूटयो रमणीकुन्तलभोगिभोगयोः ।
श्वपचात्मभुवोर्निरन्तरा मम भूयात् परमात्मनि स्थितिः ॥४०॥

निखिलं जगदेव नश्वरं पुनरस्मिन् नितरां कलेवरम् ।
अथ तस्य कृते कियानयं क्रियते हन्त जनैः परिश्रमः ॥४१॥

प्रतिपलमखिलाल्लोँकान् मृत्युमुखं प्रविशतो निरीक्ष्यापि ।
हा हन्त किमिति चित्तं विरमति नाद्यापि विषयेभ्यः ॥४२॥

सपदि विलयमेतु राज्यलक्ष्मीरुपरि पतन्त्वथवा कृपाणधाराः ।
अपहरतुतरां शिरः कृतान्तो मम तु मतिर्न मनागपैतु धर्मात् ॥४३॥

अपि बहलदहनजालं मूर्ध्नि रिपुर्मे निरन्तरं धमतु ।
पातयतु वासिधारामहमणुमात्रं न किंचिदपि भाषे ॥४४॥

---

(१०) आसफविलासः

(१०) आसफविलासः

श्रीगजवदनाय नमः ॥ अस्ति समस्तप्रशस्तभूपालमस्तकमणिमयूखमालालालित-चरणनखरशरदिन्दुचन्द्रिकाचयचमत्कारचुलुकितचराचरान्तरतिमिरधोरणिः सपुलकसुरासुर-सुन्दरीसमुद्गीयमानस्फारपारदपरम्परासहोदरयशःसुधापटलसङ्गवामाङ्गितवामाङ्गीकवाम-देवकलेवरप्रतिभटीकृतलोकालोकावनिधरो महस्तरुणतरणिकिरणसरणिसमुल्लासितजगदण्ड-मण्डलपुण्डरीकः साहिजहानाभिधश्चक्रवर्त्ती ।

अपि च –

पारीन्द्राणां धुरीणैरवनिधरगुहागर्भतः प्रोत्पतद्भिः
स्वापभ्रंशप्रकोपप्रचलितनयनप्रान्तमाकर्ण्यमानः ।
यत्प्रस्थानान्तरुद्यत्प्रलयजलधरध्वानधिक्कारधीरो
घृष्टक्षीरोदतीरो जगति विजयते दुन्दुभिद्वन्द्वनादः ॥१॥

द्वारान्दोलन्मदान्धद्विरदघनघटागण्डपट्टप्रसर्पद्-
दानोद्दामप्रणालीमिलदलिवलयोद्गीतचापप्रतापाः ।
भूपास्तेऽपि प्रभातोन्मदकमलसमुल्लासिशोभाभिरामां
दैन्यग्रामान्धकारक्रथनदिनकृतो यस्य दृष्टिं श्रयन्ते ॥२॥

यस्योद्दामदिवानिशार्थिविलसद्दानप्रवाहप्रथा-
माकर्ण्यावनिमण्डलागतवियद्वन्दीन्द्रवृन्दाननात् ।
ईर्ष्यानिर्भरफुल्लरोमनिकरव्यावल्गदूधःस्रवत्-
पीयूषप्रसरैः सुरेन्द्रसुरभिः प्रावृट्पयोदायते ॥३॥

रुदतो निशि शैशवेन दूरीकृतनिद्रस्य गजाननस्य गौरी ।
उपगायति भीतये यदुद्यन्मदयूथाधिपयूथदानकीर्त्तिम् ॥४॥

स कदाचिद्विपुलबलवशीभवद्वसुमतीवलयवेल्लनीकृतयशोविमलांशुकः प्रचण्डभुज-दण्डमण्डलीभवत्कोदण्डनिःसरत्काण्डखण्डीकृताशेषशात्रवः करटतटनिर्गलन्मदद्रवनिर्झराणां सम्प्रति संमुत्पन्नानां धराधरशिशूनामिव रिङ्गतां मतङ्गजानां संघट्टैः प्रथमसमागमत्रस्त-नवाङ्गनानासाग्रलम्बिमुक्ताफलचापल्यमलिम्लुचानां प्रतिखुरनिकरशिलातलसंघट्टसमुच्छल-द्विद्युद्वल्लीकृतविपुलविस्फुलिङ्गच्छटापटलानां वाजिनां राजिभिश्च समाकुलया सागरसमा-नया सेनया समावृतो विषमतरारोहावरोहाभिः स्वरावृत्तिभिरिव क्लेशप्रचुरपरिणामसुखाभि-र्वैदिककर्मसरणिभिरिव पद्धतिभिरनाकलितदुःखलेशं कश्मीरदेशमाजगाम ।

यस्मिन्ननवरतमपरिमितपयोदपटलपर्यायितप्रालेयपुञ्जपञ्जरितेन परितः स्फुरता रजतप्राकारेणेव गौरीगुरुणा हिमगिरिणा वेष्टितापरिमितकुसुमामोदमाद्यन्मधुव्रतव्रातगीत-माहात्म्यैः कैरपि परिणतरसभारतुन्दिलानां फलानां प्रकरेणोपनम्रशाखाशतैरातिथेयैरिव

गृहस्थैरसंख्यैः शाखिभिः शोभिता परिफुल्लपद्मिनीपरिषद्विधूननोद्धूतपरागपटलपाण्डुरितैश्च-ञ्चुपुटैरतिरसलम्पटाभिर्वरटाभिः कण्डूयितकपोलानां राजहंसानामावलिभिः सेवितैरेकीभवदिन्द्रनीलमणिमयूखमांसलानामन्तर्विभावनाविशेषविलोकनीयशेषशिखामणीनां सलिलानामाकरैः कमनीयतरा निविडतरशाद्वलश्यामलिम्ना मरकतमणिमयीव समुल्लसति वसुमती ।

अथ तत्र सकलसामन्तचक्रचूडाचुम्बितनिखिलभूमण्डलमण्डनायितचरणकमलपरिमललम्पटीभवद्बहलविबुधजनव्रातमाद्यदिन्दिन्दिरमञ्जुलगुञ्जितैर्मुखरितहरिदन्तरालो विलसितहिमशैलशृङ्गस्खलत्तुङ्गगङ्गातरङ्गाभिरामत्विषा शरदभ्रालिविभ्राजिशुभ्रांशुवरकिरणकान्तिद्विषा चतुरुदधिपारश्लिषा यशःसुधापटलेन परिपाण्डरितजगदण्डमण्डलोऽनवरतविद्वद्द्रुमद्रोहिदारिद्र्यमाद्यद्द्विपोद्दामदर्पौघविद्रावणप्रौढपञ्चाननो महामहीरुह इव द्विजकुलायहितः ऋतुरिव मधुरिव सकलसुमनःप्रसादनोऽपि हिमांशुरिव सकलासुमनःप्रसादनः समरार्चितोप्यमरार्चितः सार्वभौमसंबन्धिषु सकलेषु सामन्तेषु वाङ्मयेष्विव काव्यकलापः काव्यकलापेष्विव ध्वनिः ध्वनिष्विव रसो रसेष्विव शृङ्गारः सकलसहृदयहृदयंगमेन महिम्ना मधुरिम्णा च सम्भावितः सकलशास्त्रसारावगाही नवाबासफजाही ।

कदाचित् कुतुकाकुलतया विविधसुमनःसमूहसुषमासमास्तरणसंभावितविश्वंभरावलयमुपरिमिलदलिपुञ्जमञ्जुलगुञ्जितैर्बन्दिवृन्दवदनविनिर्गतविबुधविटपिविजयबिरुदावलीभिरिवानतकन्धरैरसंख्यैरवनीरुहैः कठिनकरकरनिकरसंत्रासतः शरणागतैरिव तिमिरकुटुम्बैरम्बुनिकुरुम्बैरापूरिताभिर्वापीभिश्च मनोहरमेकीकृतमिव त्रैलोक्यलक्ष्मीलावण्यं निशातोपवनं प्रविशद्भिर्वाङ्मनसवर्त्मातिवर्तिपुञ्जीकृतसकलकुसुमसौकुमार्यसारमयैरवयवैः स्वयमनङ्गेनेव निर्मिताभिः भृशं नयननिपातस्थानीभवदङ्गीभिस्तनुतरतनुच्छायादन्तुरितवनान्तराभिर्निकषशिलातलोल्लिखिताभिरिव काञ्चनरेखाभिः निबिडतरनीलपयोदभ्रमेणागताभिरिव सौदामिनीभिर्दरविकसितरदनमणिकिरणसरणिसमाप्यायितचकोरीभिरुपरिविभ्राम्यमाणेनापि स्वतो नीराजितात्मनेव परिफुल्लकमलेन राजितकरकिसलयाभिर्दूरादुन्मुक्तपाथोरुहाणामुन्मुखं धावतामुन्मत्तमधुव्रतानामालिभिराकुलीकृताभिः काभिरपि किंचिदुच्चपरिणतफलग्रहणलालसातितुङ्गीभवत्कुचतटसमापतत्प्रियनयनसंकोचितेन चोन्नमितपरावर्तितभुजलताभिरन्याभिः करकमलकलितमुकुरमण्डलप्रतिबिम्बितप्रियवदनचुम्बनमुकुलीकृताधराभिः काभिरपि गायन्तीभिः सारिकावलिवृथाङ्गुलीकम्पसम्पादितवीणागीतभ्रमाभिरङ्गनाभिरनङ्गः समुल्लासयाम्बभूवे ।

तं च गुणानां परस्परसंसर्गजनितगुरुगर्वनिर्वासनाय विधिना निर्मितमिव सभामण्डलं परमसौन्दर्यसुन्दरीकरणलालितलोचनलोभनीयमूर्त्ति ताश्चानङ्गसर्वस्वायमानरूपयौवनशालिनीरवधीनभिरामतागुणस्य निदानानि प्रथमरसस्यागोचरं कविगवीनां तच्च निखिलजननयननिर्माणसाफल्यमिव वनमालोक्य चण्डीशकरताण्डवितचण्डदण्डाहतिखण्डीकृतकोटिकोटीरकोटिभिर्धरणितलधूलिधवलीभवदष्टाङ्गाभिरामैः पितामहादिभिरमरनिकरैः सेवितं भगवन्तममरेश्वराख्यं सदाशिवमर्चयितुमायातः कश्मीरमण्डलमाखण्डलो नयनसाहस्रविकृतीकृताननमात्मानं सुकृतिपरम्परोपभोग्यास्त्रिदशतरुणीर्निशातोपवनापहृतरमणीयतया निजनयनानामनानन्दनं नन्दनं च नाति बहु मेने ।

अथ सकललोकनिस्तारविस्तारितमहोपकारपरम्परापराधीनमानसेन प्रतिदिनमुद्यदनवद्यहृद्यगद्यपद्याद्यनेकविद्याविद्योतितान्तःकरणैः कविभिरुपास्यमानेन कृतयुगीकृतकलिकालेन कुमतितृणजालसमाच्छादितवेदवनमार्गविलोकनाय समुद्दीपितसत्तर्कदहनज्वालाजालेन मूर्त्तिमतेव नवाबासफखानमनःप्रसादेन द्विजकुलसेवाहेवाकिवाङ्मनःकायेन माथुरकुलसमुद्रेन्दुना रायमुकुन्देनादिष्टेन श्रीसार्वभौमसाहिजहानप्रसादाधिगतपण्डितरायपदवीविराजितेन तैलङ्गकुलावतंसेन पण्डितजगन्नाथेनासफविलासाख्येयमाख्यायिका निरमीयत । सेयमनुग्रहेण सहृदयानामनुदिनमुल्लसिता भवतात् ।

इति श्रीतैलङ्गवेङ्गिनाटीयकुलोद्भवश्रीपण्डितराजजगन्नाथविरचिता
आख्यायिका समाप्ता ।

---

(११) रसगङ्गाधरमात्रस्थपद्यानि

(११) रसगङ्गाधरमात्रस्थपद्यानि

॥ उपक्रमांशपद्यानि ॥

स्मृतापि तरुणातपं करुणया हरन्ती नृणा-
मभङ्गुरतनुत्विषां वलयिता शतैर्विद्युताम् ।
कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी
मदीयमतिचुम्बिनी भवतु कापि कादम्बिनी ॥१॥

श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतसकलब्रह्मविद्याप्रपञ्चः
काणादीराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत् ।
देवादेवाध्यगीष्ट स्मरहरनगरे शासनं जैमिनीयं
शेषाङ्कप्राप्तशेषामलभणितिरभूत् सर्वविद्याधरो यः ॥२॥

पाषाणादपि पीयूषं स्यन्दते यस्य लीलया ।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम् ॥३॥

निमग्नेन क्लेशैर्मननजलधेरन्तरुदरं
मयोन्नीतो लोके ललितरसगङ्गाधरमणिः ।
हरन्नन्तर्ध्वान्तं हृदयमधिरूढो गुणवता-
मलङ्कारान् सर्वानपि गलितगर्वान् रचयतु ॥४॥

परिष्कुर्वन्त्वर्थान् सहृदयधुरीणाः कतिपये
तथापि क्लेशो मे कथमपि गतार्थो न भविता ।
तिमीन्द्राः संक्षोभं विदधतु पयोधेः पुनरिमे
किमेतेनायासो भवति विफलो मन्दरगिरेः ॥५॥

निर्माय नूतनमुदाहरणानुरूपं
काव्यं मयात्र निहितं न परस्य किंचित् ।
किं सेव्यते सुमनसां मनसापि गन्धः
कस्तूरिकाजननशक्तिभृता मृगेण ॥६॥

मननतरितीर्णविद्यार्णवो जगन्नाथपण्डितनरेन्द्रः ।
रसगङ्गाधरनाम्नीं करोति कुतुकेन काव्यमीमांसाम् ॥७॥

रसगङ्गाधरनामा सन्दर्भोऽयं चिरं जयतु ।
किं च कुलानि कवीनां निसर्गसम्यञ्चि रञ्जयतु ॥८॥

॥ उदाहरणपद्यानि ॥

अगाधं परितः पूर्णमालोक्य स महार्णवम् ।
हृदयं रामभद्रस्य सस्मार पवनात्मजः ॥१॥

अङ्कितान्यक्षसंघातैः सरोगाणि सदैव हि ।
शरीरिणां शरीराणि कमलानि न संशयः ॥२॥

अतिमात्रबलेषु चापलं विदधानः कुमतिर्विनश्यति ।
त्रिपुरद्विषि वीरतां वहन्नवलिप्तः कुसुमायुधो यथा ॥३॥

अपहाय सकलबान्धवचिन्तामुद्वास्य गुरुकुलप्रणयम् ।
हा तनय विनयशालिन् कथमिव परलोकपथिकोऽभूः ॥४॥

अपि वक्ति गिरां पतिः स्वयं यदि तासामधिदेवतापि वा ।
अयमस्मि पुरो हयाननस्मरणोल्लङ्घितवाङ्मयाम्बुधिः ॥५॥

अबलानां श्रियं हृत्वा वारिवाहैः सहानिशम् ।
तिष्ठन्ति चपला यत्र स कालः समुपस्थितः ॥६॥

अभिरामतासदनमम्बुजानने नयनद्वयं जनमनोहरं तव ।
इयति प्रपञ्चविषयेऽपि वेधसे तुलनामुदञ्चति परस्परात्मना ॥७॥

अमृतद्रवमाधुरीभृतः सुखयन्ति श्रवसी सखे गिरः ।
नयने शिशिरीकरोतु मे शरदिन्दुप्रतिमं मुखं तव ॥८॥

अमृतस्य चन्द्रिकाया ललितायाश्चापि कवितायाः ।
सुजनस्य च निर्माणं जनयति नहि कस्य सन्तोषम् ॥९॥

अम्बरत्यम्बरं यद्वत् समुद्रोऽपि समुद्रति ।
विक्रमार्कमहीपाल तथा त्वं विक्रमार्कसि ॥१०॥

अम्भोजिनीबान्धवनन्दनायां कूजन् बकानां समजो विरेजे ।
रूपान्तराक्रान्तगृहः समन्तात् पुञ्जीभवञ्छुक्ल इवाश्रयार्थी ॥११॥

अयं सज्जनकार्पासरक्षणैकहुताशनः ।
परदुःखाग्निशमनमारुतः केन वर्ण्यते ॥१२॥

अयि पवनरयाणां निर्दयानां हयानां श्लथय गतिमहं नो सङ्गरं द्रष्टुमीहे ।
श्रुतिविवरममी मे दारयन्ति प्रकुप्यद्भुजगनिभभुजानां बाहुजानां निनादाः ॥१३॥

अयि लावण्यजलाशय तस्या हा हन्त मीननयनायाः ।
दूरस्थे त्वयि किं वा कथयामो विस्तरेणालम् ॥१४॥

अये राजन्नाकर्णय कुतुकमाकर्णनयन
स्फुरन्ती हस्ताम्भोरुहि तव कृपाणी रणमुखे ।
विपक्षाणां वक्षस्यहह तरुणानां निपतति
प्रगल्भाः श्यामानामनुपरतकामाः प्रकृतयः ।।१५।।

अये राजन्नाकर्णय कुतुकमाकर्णनयन
त्वदाधारा कीर्तिर्वसति किल मौलौ दशदिशाम् ।
त्वदेकालम्बोऽयं गुणगणकदम्बो गुणनिधे
मुखेषु प्रौढानां विलसति कवीनामविरतम् ।।१६।।

अये लीलाभग्नत्रिपुरहरकोदण्डमहिमन्
कथा यन् नोदञ्चत्यतुलबलधैर्यस्य भवतः ।
अयं को वा तत्र प्रसृमरफणाकोणनिहित-
क्षितिः शेषः श्रीमान् कमठकुलचूडामणिरपि ।।१७।।

अर्जुनस्य गुरुर्भार्यामनुजः परमः पुमान् ।
गुञ्जापुञ्जधरः पायादपायादिह कोऽपि वः ।।१८।।

अर्थिनो दातुमेवेति त्रातुमेवेति कातराः ।
जातोऽयं हन्तुमेवेति वीरास्त्वां देव जानते ।।१९।।

अर्थिभिश्छिद्यमानोऽपि स मुनिर्न व्यकम्पत ।
विनाशेऽप्युन्नतः स्थैर्यं न जहाति द्रुमो यथा ।।२०।।

अलकाः फणिशावतुल्यशीला नयनान्ताः परिपुङ्खितेषुलीलाः ।
चपलोपमिता खलु स्वयं या बत लोके सुखसाधनं कथं सा ।।२१।।

आह्लादिनी नयनयो रुचिरैन्दवीव कण्ठे कृतातिशिशिराम्बुजमालिकेव ।
आनन्दिनी हृदि गता रसभावनेव सा नैव विस्मृतिपथं मम जातु याति ।।२२।।

इदमुदधेरुदरं वा नयनं वात्रेरुतेश्वरस्य मनः ।
दशरथगृहे तदानीमेवं संशेरते स्म कवयोऽपि ।।२३।।

इन्दुना परसौन्दर्यसिन्धुना बन्धुना विना ।
ममायं विषमस्तापः केन वा शमयिष्यते ।।२४।।

इन्दुस्तु परमोत्कृष्टो यः क्षीणो वर्धते मुहुः ।
धिगिदं यौवनं तन्वि क्षीणं न पुनरेति यत् ।।२५।।

इयति प्रपञ्चविषये तीर्थानि कियन्ति सन्ति पुण्यानि ।
परमार्थतो विचारे देवी गङ्गा तु गङ्गेव ।।२६।।

ईश्वरेण समो ब्रह्मा पिता साक्षान् महेश्वरः ।
पार्वत्या सदृशी लक्ष्मीर्माता मातुः समा भुवि ॥
पितास्य काष्ठसदृशः स्वयं पावकसन्निभः ॥२७॥

उत्सङ्गे तव गङ्गे पायं पायं पयोऽतिमधुरतरम् ।
शमिताखिलश्रमभरः कथय कदाहं चिराय शयिताहे ॥२८॥

उदुम्बरफलानीव ब्रह्माण्डान्यत्ति यः सदा ।
सर्वगर्वापहः कालस्तस्य के मशका वयम् ॥२९॥

उन्मूलितः सह मदेन बलाद् बलारेरुत्थापितो बलभृतां सह विस्मयेन ।
नीलातपत्रमणिदण्डरुचा सहैव पाणौ धृतो गिरिधरेण गिरिः पुनातु ॥३०॥

उपकारमस्य साधोर्नैवाहं विस्मरामि जलदस्य ।
दृष्टेन येन सहसा निवेद्यते नवघनश्यामः ॥३१॥

उर्वीं शासति मय्युपद्रवलवः कस्यापि न स्यादिति
प्रौढं व्याहरतो वचस्तव कथं देव प्रतीमो वयम् ।
प्रत्यक्षं भवतो विपक्षनिवहैर्द्यामुत्पतद्भिः क्रुधा
यद् युष्मत्कुलकोटिमूलपुरुषो निर्भिद्यते भास्करः ॥३२॥

ऋतुराजं भ्रमरहितं यदाहमाकर्णयामि नियमेन ।
आरोहति स्मृतिपथं तदैव भगवान् मुनिर्व्यासः ॥३३॥

एकीभवत्प्रलयकालपयोधिकल्प-
मालोक्य संगरगतं कुरुवीरसैन्यम् ।
सस्मार तल्पमहिपुङ्गवकायकान्तं
निद्रां च योगकलितां भगवान् मुकुन्दः ॥३४॥

एतावति प्रपञ्चे सुन्दरमहिलासहस्रभरितेऽपि ।
अनुहरति सुभग तस्या वामार्धं दक्षिणार्धस्य ॥३५॥

एतावति प्रपञ्चेऽस्मिन् सदेवासुरमानुषे ।
केनोपमीयतां तज्ज्ञै रामो रामपराक्रमः ॥३६॥

एतावति महीपालमण्डलेऽवनिमण्डन ।
तारकापरिषन्मध्ये राजन् राजेव राजसे ॥३७॥

कटु जल्पति कश्चिदल्पवेदी यदि चेदीदृशमत्र किं विदध्मः ।
कथमिन्दुरिवाननं त्वदीयं सकलङ्कः स कलङ्कहीनमेतत् ॥३८॥

कतिपयदिवसविलासं नित्यसुखासङ्गमङ्गलसवित्री ।
खर्वयति स्वर्वासं गीर्वाणधुनीतटस्थितिर्नितराम् ॥३९॥

कमलति वदनं यस्यामलयन्त्यलका मृणालतो बाहू ।
शैवालति रोमावलिरद्भुतसरसीव सा बाला ॥४०॥

करकलितचक्रघटनो नित्यं पीताम्बरस्तमोऽरातिः ।
निजसेविजाड्यनाशनचतुरो हरिरस्तु भूतये भवताम् ॥४१॥

करतलनिर्गलदविरलदानजलोल्लासितावनीवलयः ।
धनदाग्रमहितमूर्तिर्जयतितरां सार्वभौमोऽयम् ॥४२॥

कलितकुलिशघाताः केऽपि खेलन्ति वाताः कुशलमिह कथं वा जायतां जीविते मे ।
अयमपि बत गुञ्जन्नालि माकन्दमौलौ चुलुकयति मदीयां चेतनां चञ्चरीकः ॥४३॥

कलिन्दशैलादियमाप्रयागं केनापि दीर्घा परिखा निखाता ।
मन्ये तलस्पर्शविहीनमस्यामाकाशमानीलमिदं विभाति ॥४४॥

कस्तृप्येन् मार्मिकस्तन्वि रमणीयेषु वस्तुषु ।
हित्वान्तिकं सरोजिन्याः पश्य याति न षट्पदः ॥४५॥

कातराः परदुःखेषु निजदुःखेष्वकातराः ।
अर्थेष्वलोभा यशसि सलोभाः सन्ति साधवः ॥४६॥

कान्तारे विलपन्तीनां त्वदरातिमृगीदृशाम् ।
देवनानि समाकर्ण्य हरिद्भिरपि चुक्षुभे ॥४७॥

कारुण्यकुसुमाकाशः शान्तिशैत्यहुताशनः ।
यशःसौरभ्यलशुनः पिशुनः साधुदुःखदः ॥४८॥

किं कुर्वते दरिद्राः कासारवती धरा मनोज्ञतरा ।
कोपावनस्त्रिलोक्यां. . . . . ॥४९॥

किं नाम तेन न कृतं सुकृतं पुरारे दासीकृता न खलु का भुवनेषु लक्ष्मीः ।
भोगा न के बुभुजिरे विबुधैरलभ्या येनार्चितोऽसि करुणाकर हेलयापि ॥५०॥

किमहं कथयामि योषितामधरं बिम्बफलं समर्प्य याः ।
सुरसानि हरन्ति हन्त हा विदुषां पुण्यफलानि सत्वरम् ॥५१॥

कियदिदमधिकं मे यद् द्विजायार्थयित्रे कवचमरमणीयं कुण्डले चार्पयामि ।
अकरुणमवकृत्य द्राक् कृपाणेन निर्यद्बहलरुधिरधारं मौलिमावेदयामि ॥५२॥

कुङ्कुमद्रवलिप्ताङ्गः काषायवसनो यतिः ।
कोमलातपबालाभ्रः सन्ध्याकालो न संशयः ॥५३॥

कुचकलशेष्वबलानामलकायामथ पयोनिधेः पुलिने ।
क्षितिपाल कीर्तयस्ते हारन्ति हरन्ति हीरन्ति ॥५४॥

कुचाभ्यामालीढं सहजकठिनाभ्यामपि रणे
न काठिन्यं धत्ते तव हृदयमत्यन्तमृदुलम् ।
मृगाङ्गानामन्तर्जननि निवसन्ती खलु चिरं
न कस्तूरी दूरीभवति निजसौरभ्यविभवात् ॥५५॥

कुण्डलीकृतकोदण्डदोर्दण्डस्य पुरस्तव ।
मृगारातेरिव मृगाः परे नैवावतस्थिरे ॥५६॥

कुत्र शैवं धनुरिदं क्व चायं प्राकृतः शिशुः ।
भङ्गस्तु सर्वसंहर्त्रा कालेनैव विनिर्मितः ॥५७॥

कुलिशमिव कठिनमसतां हृदयं जानीहि हृदयमिव कुलिशम् ।
प्रकृतिः सतां सुमधुरा सुधेव हि प्रकृतिरिव च सुधा ॥५८॥

कुसुमानि शरा मृणालजालान्यपि कालायसकर्कशान्यभूवन् ।
सुदृशो दहनायते स्म राका भवनाकाशमथाभवत् पयोधिः ॥५९॥

कृतमपि महोपकारं पय इव पीत्वा निरातङ्कम् ।
प्रत्युत हन्तुं यतते काकोदरसोदरः खलो जगति ॥६०॥

कृत्वा सूत्रैः सुगूढार्थैः प्रकृतेः प्रत्ययं परम् ।
आगमान् भावयन् भाति वैयाकरणपुङ्गवः ॥६१॥

कृपया सुधया सिञ्च हरे मां तापमूर्च्छितम् ।
जगज्जीवन तेनाहं जीविष्यामि न संशयः ॥६२॥

कृष्णपक्षाधिकरुचिः सदा सम्पूर्णमण्डलः ।
भूपोऽयं निष्कलङ्कात्मा मोदते वसुधातले ॥६३॥

केऽपि स्मरन्त्यनुसरन्ति च केचिदन्ये
पश्यन्ति पुण्यपुरुषाः कति च स्पृशन्ति ।
मातर्मुरारिचरणाम्बुजमाध्वि गङ्गे
भाग्याधिकाः कतिपये भवतीं पिबन्ति ॥६४॥

कोदण्डच्युतकाण्डमण्डलसमाकीर्णत्रिलोकीतलं
रामं दृष्टवतां रणे दशमुखप्राणापहारोद्यतम् ।

दुर्वर्शोऽपि नृणामभूदुरुमरुद्वेगप्रचण्डीकृत-
ज्वालाभिर्जगतीतलं कवलयन् कालानलो गोचरः ॥६५॥

कोपेऽपि वदनं तन्वि तुल्यं कोकनदेन ते ।
उत्तमानां विकारेऽपि नापैति रमणीयता ॥६६॥

कोमलातपशोणाभ्रसन्ध्याकालसहोदरः ।
काषायवसनो याति कुङ्कुमालेपनो यतिः ॥६७॥

कौमुदीव भवती विभाति मे कातराक्षि भवतीव कौमुदी ।
अम्बुजेन तुलितं विलोचनं लोचनेन च तवाम्बुजं समम् ॥६८॥

क्रूरसत्त्वाकुलो दोषाकरभूस्तोयधिर्यथा ।
न तथा त्वं यतो भूप स्थिरधीरसि निर्मलः ॥६९॥

क्वचिदपि कार्ये मृदुलं क्वापि च कठिनं विलोक्य हृदयं ते ।
को न स्मरति नराधिप नवनीतं किं च शतकोटिम् ॥७०॥

क्व वा रामः कामप्रतिभटललाटंतपबल-
स्तव क्वामी वीरा रणशिरसि धीरा मखभुजाम् ।
दिधक्षोस्त्रैलोक्यं प्रलयशिखिनः पद्मसथन-
प्रगल्भैः प्रालेयैः प्रशममसि कर्तुं व्यवसितः ॥७१॥

क्व शुक्तयः क्व वा मुक्ताः क्व पङ्कः क्व च पङ्कजम् ।
क्व मृगाः क्व च कस्तूरी धिग् विधातुर्विदग्धताम् ॥७२॥

क्व सा कुसुमसाराङ्गी सीता चन्द्रकलोपमा ।
क्व रक्षःखदिराङ्गारमध्यसंवासवैशसम् ॥७३॥

खर्वीकृतेन्द्रगर्व त्वरया चक्रेण भिन्नक्रमुख ।
लीलात्तकोलमूर्त्ते मामुद्धर्तुं कथं न शक्तोऽसि ॥७४॥

खलः कापट्यदोषेण दूरेणैव विसृज्यते ।
अपायशङ्किभिर्लोकैर्विषेणाशीविषो यथा ॥७५॥

खलानामुक्तयो हन्त कोमलाः शीतला अपि ।
हृदयानीह साधूनां छिन्दन्त्यथ दहन्ति च ॥७६॥

गगनचरं जलबिम्बं कथमिव पूर्णं वदन्ति विद्वांसः ।
दशरथचत्वरचारी हृज्ज्वरहारी विधुस्तु परिपूर्णः ॥७७॥

गगनाद् गलितो गभस्तिमानुत वाऽयं शिशिरो विभावसुः ।
मुनिरेवमरुन्धतीपतिः सकलज्ञः समशेत राघवे ॥७८॥

गङ्गा हृद्या यथा गङ्गा गङ्गा गङ्गेव पावनी ।
हरिणा सदृशो बन्धुर्हरितुल्यः परो हरिः ॥७९॥

गाम्भीर्येणातिमात्रेण महिम्ना परमेण च ।
राघवस्य द्वितीयोऽब्धिरम्बुधेश्चापि राघवः ॥८०॥

गाहितमखिलं विपिनं परितो दृष्टाश्च विटपिनः सर्वे ।
सहकार न प्रपेदे मधुपेन तथापि ते समं जगति ॥८१॥

गिरं समाकर्णयितुं यदीयां सदा रसज्ञैरनुभावनीयाम् ।
समीहते नित्यमनन्यचेता नभस्वदात्मंभरिवंशनेता ॥८२॥

गिरामविषयो राजन् विस्तारस्तव चेतसः ।
सावकाशतया यत्र शेते विश्वाश्रयो हरिः ॥८३॥

गीष्पतिरप्याङ्गिरसो गदितुं ते गुणगणान् सगर्वो न ।
इन्द्रः सहस्रनयनोऽप्यद्भुतरूपं परिच्छेत्तुम् ॥८४॥

गुणवृद्धी परे यस्मिन् नैव स्तः प्रत्ययात्मके ।
बुधेषु सदिति ख्यातं तद् ब्रह्म समुपास्महे ॥ ८५॥

चकोरनयनानन्दि कह्लाराह्लादकारणम् ।
तमसां कदनं भाति वदनं सुन्दरं तव ॥८६॥

चन्द्रांशुनिर्मलं वारि चन्द्रो हंससमद्युतिः ।
हंसास्तु शरदि स्मेरपुण्डरीकमनोरमाः ॥८७॥

चाञ्चल्ययोगि नयनं तव जलजानां श्रियं हरतु ।
विपिनेऽतिचञ्चलानामपि च मृगाणां कथं हरति ॥८८॥

जगति नरजन्म तस्मिन् वैदुष्यं तत्र सत्कविता ।
कवितायां परिणामो दुष्प्रापः पुण्यहीनेन ॥८९॥

जगत्त्रयत्राणधृतव्रतस्य क्षमातलं केवलमेव रक्षन् ।
कथं समारोहसि हन्त राजन् सहस्रनेत्रस्य तुलां द्विनेत्रः ॥९०॥

जनयन्ति परप्रीतिं नराः सत्कुलसम्भवाः ।
नहि कारस्करः क्वापि तापनिर्वापणक्षमः ॥९१॥

जीवितं मृत्युना लीढं सम्पदः श्वासविभ्रमाः ।
रामाः क्षणप्रभारामाः शल्यान्येतानि देहिनाम् ॥९२॥

ज्योत्स्नाभमञ्जुहसिता सकलकलाकान्तकान्तवदनश्रीः ।
राकेव रम्यरूपा राघवरमणी विराजते नितराम् ॥९३॥

तल्पगतापि च सुतनुः श्वासासङ्गं न या सेहे ।
सम्प्रति सा हृदयगतं प्रियपाणिं मन्दमाक्षिपति ॥९४॥

तापत्रयं खलु नृणां हृदि तावदेव यावन् न ते वलति देव कृपाकटाक्षः ॥
प्राचीललाटपरिचुम्बिनि भानुबिम्बे पङ्केरुहोदरगतानि कुतस्तमांसि ॥९५॥

तीर्थं गङ्गा तदितरदपां निर्मलं सङ्घमात्रं
देवौ तस्याः प्रसवनिलयौ नाकिनोऽन्ये वराकाः ।
सा यत्रास्ते स हि जनपदो मृत्तिकामात्रमन्यत्
तां यो नित्यं नमति स बुधो बोधशून्यस्ततोऽन्यः ॥९६॥

त्वत्प्रतापमहादीपशिखाविपुलकज्जलैः ।
नूनं नभस्तले नित्यं नीलिमा नूतनायते ॥९७॥

त्वदङ्गणसमुद्भूता सिक्ता कुङ्कुमवारिभिः ।
त्वदङ्गतुलनां याति कदाचिल् लवलीलता ॥९८॥

त्वद्विपक्षमहीपालाः स्वर्बालाधरपल्लवम् ।
पीडयन्तितरां तीव्रदारुणैर्दशनक्षतैः ॥९९॥

त्वयि कुपिते रिपुमण्डलखण्डनपाण्डित्यसम्पदुद्दण्डे ।
गिरिगहनेऽरिवधूनां दिवसैः सह लोचनानि वर्षन्ति ॥१००॥

त्वां गीर्वाणगुरुं सर्वे वदन्तु कवयस्तु ते ।
समानकक्षस्तेनासीत्येषोऽर्थस्तु मतो मम ॥१०१॥

त्वामन्तरात्मनि लसन्तमनन्तमज्ञा-
स्तीर्थेषु हन्त मदनान्तक शोधयन्तः ।
विस्मृत्य कण्ठतटमध्यपरिस्फुरन्तं
चिन्तामणिं क्षितिरजःसु गवेषयन्ति ॥१०२॥

दन्तप्रभापुष्पचिता पाणिपल्लवशोभिनी ।
केशपाशालिवृन्देन सुवेषा हरिणेक्षणा ॥१०३॥

दशाननेन दृप्तेन नीयमाना बभौ सती ।
द्विरदेन मदान्धेन कृष्यमाणेव पद्मिनी ॥१०४॥

दूरीकर्तुं प्रियं बाला पद्मेनाताडयद् रुषा ।
स बाणेन हतस्तेन तामाशु परिषस्वजे ॥१०५॥

दृष्टिर्मृगीदृशोऽत्यन्तं श्रुत्यन्तपरिशीलिनी ।
मुच्यन्ते बन्धनात् केशा विचित्रा वैधसी गतिः ॥१०६॥

देव त्वद्दर्शनादेव लीयन्ते पुण्यराशयः ।
किं चादर्शनतः पापमशेषमपि नश्यति ॥१०७॥

द्राक्षेव मधुरं वाक्यं चरितं कौमुदी यथा ।
सदैवार्द्राणि चेतांसि सुधेव सुमहात्मनाम् ॥१०८॥

द्रुमपङ्कजविद्वांसः सर्वसंतोषपोषकाः ।
मुधैव हन्त हन्यन्ते कुठारहिमदुर्जनैः ॥१०९॥

द्रोहो निरागसां लोके हीनो हालाहलादपि ।
अयं हन्ति कुलं साग्रं भोक्तारं केवलं तु सः ॥११०॥

नगरान्तर्महीन्द्रस्य महेन्द्रमहितश्रियः ।
सुरालये खलु क्षीबा देवा इव विरेजिरे ॥१११॥

न नगाः काननगा यद् रुदतीषु त्वदरिभूपसुदतीषु ।
शकलीभवन्ति शतधा शङ्के श्रवणेन्द्रियाभावात् ॥११२॥

नयनानि वहन्तु खञ्जनानामिह नानाविधभङ्गभङ्गभाग्यम् ।
सदृशं कथमाननं सुशोभं सुदृशो भङ्गुरसम्पदाम्बुजेन ॥११३॥

नयनेन्दिन्दिरानन्दमन्दिरं मिलदिन्दिरम् ।
इदमिन्दीवरं मन्ये सुन्दराङ्गि तवाननम् ॥११४॥

नयने सुदृशां पुरो रिपूणां वचने वश्यगिरां महाकवीनाम् ।
मिथिलापतिनन्दिनीभुजान्तःस्थित एव स्थितिमाप रामचन्द्रः ॥११५॥

नवप्रसङ्गं दयितस्य लोभादङ्गीकरोति स्म यदा नताङ्गी ।
श्लथं तदालिङ्गनमप्यकस्माद् घनो निनादैर्घनतां निनाय ॥११६॥

नवाङ्गनेवाङ्गणेऽपि गन्तुमेव प्रकम्पते ।
इयं सौराष्ट्जा नारी महाभट इवोद्भटा ॥११७॥

नवोच्छलितयौवनस्फुरदखर्वगर्वज्वरे
मदीयगुरुकार्मुकं गलितसाध्वसं वृश्चति ।
अयं पततु निर्दयं दलितदृप्तभूभृद्गल-
स्खलद्रुधिरघस्मरो मम परश्वधो भैरवः ॥११८॥

निखिलजगन्महनीया यस्याभा नवपयोधरवत् ।
अम्बुजवद् विपुलतरे नयने तद् ब्रह्म संश्रये सगुणम् ॥११९॥

निखिले निगमकदम्बे लोकेष्वप्येष निर्विवादोऽर्थः ।
शिव इव गुरुर्गरीयान् गुरुरिव सोऽयं सदाशिवोऽपि तथा ॥१२०॥

नितरां धनमाप्तुमर्थिभिः क्षितिप त्वां समुपास्य यत्नतः ।
निधनं समलम्भि तावकी खलु सेवा जनवाञ्छितप्रदा ॥१२१॥

नितरां हितयाद्य निद्रया मे वत यामे चरमे निवेदितायाः ।
सुदृशो वचनं शृणोमि यावन् मयि तावत् प्रचुकोप वारिवाहः ॥१२२॥

नितान्तं यौवनोन्मत्ता गाढरक्ताः सदाहवे ।
वसुन्धरां समालिङ्गच शेरते वीर तेऽरयः ॥१२३॥

नितान्तरमणीयानि वस्तूनि करुणोज्झितः ।
कालः संहरते नित्यमभावादिव चक्षुषः ॥१२४॥

निरपायं सुधापायं पयस्तव पिबन्ति ये ।
जह्नुजे निर्जरावासं वसन्ति भुवि ते नराः ॥१२५॥

निर्मलाम्बररम्यश्रीः किंचिद्दर्शिततारका ।
हंसावलीहारयुता शरद् विजयतेतराम् ॥१२६॥

निशाकरादालि कलङ्कपङ्किलाद्
गुणाधिकं निर्मलमाननं ते ।
अनल्पमाधुर्यकिरोऽधरादिमा
गिरोऽधरा गुप्तरसाः कवीनाम् ॥१२७॥

निष्कलङ्क निरातङ्क चतुःषष्टिकलाधर ।
सदापूर्ण महीप त्वं चन्द्रोऽसीति मृषा वचः ॥१२८॥

नीतो नासान्तिकं तन्व्या मालत्याः कुसुमोत्करः ।
बन्धूकभावमानिन्ये रागेणाधरवर्तिना ॥१२९॥

नृत्यत्त्वद्वाजिराजिप्रखरखुरपुटप्रोद्धतैर्धूलिजालै-
रालोकालोकभूमीधरमतुलनिरालोकभावं प्रयाते ।
विश्रान्तिं कामयन्ते रजनिरिति धिया भूतले सर्वलोकाः
कोकाः क्रन्दन्ति शोकानलविकलतया किं च नन्दन्त्युलूकाः ॥१३०॥

पञ्चशाखः प्रभो यस्ते शाखा सुरतरोरसौ ।
अन्यथानेन पूर्यन्ते कथं सर्वमनोरथाः ॥१३१॥

पद्मपत्रैर्नृणां नेत्रैः सह लोकत्रयश्रिया ।
उन्मीलन्तो निमीलन्तो जयन्ति सवितुः कराः ॥१३२॥

पद्मासनप्रमुखनिर्जरचित्तवृत्ति-
दुष्प्रापदिव्यमहिमन् भवतो गुणौघान् ।
तुष्टूषतो मम नितान्तविशृङ्खलस्य
मन्तुं शिशोः शिव न मन्तुमिहासि योग्यः ॥१३३॥

परिफुल्लाब्जनयना चन्द्रिका चारुहासिनी ।
हंसावलीहारयुता शरद् विजयतेतराम् ॥१३४॥

पाण्डित्यं परिहृत्य यस्य हि कृते बन्दित्वमालम्बितं
दुष्प्रापं मनसापि यो गुरुतरैः क्लेशैः पदं प्रापितः ।
रूढस्तत्र स चेन् निगीर्य सकलां पूर्वोपकारावलीं
दुष्टः प्रत्यवतिष्ठते तदधुना कस्मै किमाचक्ष्महे ॥१३५॥

पूर्वं नयनयोर्लग्ना ततो मग्ना मनस्यभूत् ।
अथ सैव प्रियस्यासीत् सर्ववेदनगोचरा ॥१३६॥

प्रथमं श्रितकञ्जकोरकाभावथ शोभामनुभूय कन्दुकानाम् ।
अधुना श्रयितुं कुचौ यतेते दयिते ते करिशावकुम्भलीलाम् ॥१३७॥

प्रफुल्लकह्लारनिभा मुखश्री
रदच्छदः कुङ्कुमरस्यरागः ।
नितान्तशुद्धा तव तन्वि वाणी
विभाति कर्पूरपरम्परेव ॥१३८॥

प्रमोदभरतुन्दिलप्रमथदत्ततालावली-
विनोदिनि विनायके डमरुडिण्डिमध्वानिनि ।
ललाटतटविस्फुटन्नवकपीटयोनिच्छटो
हठोद्धतजटोद्भटो गतपटो नटो नृत्यति ॥१३९॥

प्राणापहरणेनासि तुल्यो हालाहलेन मे ।
शशाङ्क केन मुग्धेन सुधांशुरिति भाषितः ॥१४०॥

प्राणेशविरहक्लान्तः कपोलस्तव सुन्दरि ।
मनोभवव्याधिमत्त्वान् मृगाङ्कः खलु निर्मलः ॥१४१॥

प्रायः पतेद् द्यौः शकलीभवेद् ग्लौः
सहाचलैरम्बुधिभिः स्खलेद् गौः ।
नूनं ज्वलिष्यन्ति दिशः समस्ता
यद् द्रौपदी रोदिति हा हतेति ॥१४२॥

बहु मन्यामहे राजन् न वयं भवतः कृतिम् ।
विपद्भिः सह दीयन्ते सम्पदो भवता यतः ॥१४३॥

बाहुजानां समस्तानामभाव इव मूर्तिमान् ।
जयत्यतिबलो लोके जामदग्न्यः प्रतापवान् ॥१४४॥

बुद्धिरब्धिर्महीपाल यशस्ते सुरनिम्नगा ।
कृतयस्तु शरत्कालचारुचन्दिरचन्द्रिका ॥१४५॥

बुद्धिर्दीपकला लोके यया सर्वं प्रकाशते ।
अबुद्धिस्तामसी रात्रिर्यया किंचिन् न भासते ॥१४६॥

ब्रह्माण्डमण्डले भान्ति न ये पिण्डीकृता अपि ।
परस्परापरिचिता वसन्ति त्वयि ते गुणाः ॥१४७॥

भुजगाहितप्रकृतयो गारुडमन्त्रा इवावनीरमण ।
तारा इव तुरगा इव सुखलीना मन्त्रिणो भवतः ॥१४८॥

भूधरा इव मत्तेभा मत्तेभा इव सूनवः ।
सुता इव भटास्तस्य परमोन्नतविग्रहाः ॥१४९॥

भूमीनाथ शहाबदीन भवतस्तुल्यो गुणानां गणै-
रेतद्भूतभवप्रपञ्चविषये नास्तीति किं ब्रूमहे ।
धाता नूतनकारणैर्यदि पुनः सृष्टिं नवां भावयेन्
न स्यादेव तथापि तावकतुलालेशं दधानो नरः ॥१५०॥

भूषितानि हरेर्भक्तैर्दूषितानि पराङ्मुखैः ।
स्वकुलं नगरं देशो द्वीपं सर्वा च मेदिनी ॥१५१॥

मध्येगलं विहरतां गरलं निकामं
नागाधिपः शिरसि भालतले हुताशः ।
ध्याता भवज्वलनमध्यगतैस्तथापि
तापं तवैव हरते हर ते तनुश्रीः ॥१५२॥

मनुष्य इति मूढेन खलः केन निगद्यते ।
अयं तु सज्जनाम्भोजवनमत्तमतङ्गजः ॥१५३॥

मन्त्रार्पितहविर्दीप्तहुताशनतनूभुवः ।
शिखास्पर्शेन पाञ्चाल्याः स्थाने दग्धः सुयोधनः ॥१५४॥

मन्मथामात्यमायान्तमहं मन्ये महामहम् ।
चक्षुश्चमत्कृतिं धत्ते यदहो किल कोकिलः ॥१५५॥

मा कुरु कशां कराब्जे करुणावति कम्पते मम स्वान्तम् ।
खेलन् न जातु गोपैरम्ब विलम्बं करिष्यामि ॥१५६॥

माधुर्यपरमसीमा सारस्वतजलधिमथनसम्भूता ।
पिबतामनल्पसुखदा वसुधायां ननु सुधा कविता ॥१५७॥

मामनुरक्तां हित्वा यदि राजन् पुरुषसिंह यातोऽसि ।
मुक्त्वा वनमिदमेष्यति वनलक्ष्मीमत्र किं चित्रम् ॥१५८॥

मां पाहीति विधिर्विधेयविषयो वाच्यः स्वतन्त्रे कथं
नोपेक्ष्यो भवतास्मि दीन इति गीः श्लाघ्या न संख्यावताम् ।
एवं दोषविचारणाकुलतया देव त्वयि प्रोन्मुखे
वक्तव्यप्रतिभादरिद्रमतयः किंचिन् नहि ब्रूमहे ॥१५९॥

मित्रात्रिपुत्रनेत्राय त्रयीशात्रवशत्रवे ।
गोत्रारिगोत्रजत्राय गोत्रात्रे ते नमो नमः ॥१६०॥

मुकुलितनयनं करिणो गण्डं कण्डूयतो विषद्रुतटे ।
उदभूदकाण्डदहनज्वालाजालाकुलो देहः ॥१६१॥

यस्य तुलामधिरोहसि लोकोत्तरवर्णपरिमलोद्गारैः ।
कुसुमकुलतिलक चम्पक न वयं तं जातु जानीमः ॥१६२॥

युक्तं तु याते दिवमासफेन्दौ तदाश्रितानां यदभूद् विनाशः ।
इदं तु चित्रं भुवनावकाशे निराश्रया खेलति तस्य कीर्तिः ॥१६३॥

रमणीयस्तबकयुता विलसितवक्षोजयुगलशालिन्यः ।
लतिका इव ता वनिता वनिता इव रेजिरे लतिकाः ॥१६४॥

रम्यहासा रसोल्लासा रसिकालिनिषेविता ।
सर्वाङ्गशोभासम्भारा पद्मिनी कस्य न प्रिया ॥१६५॥

रवितुरगदिग्गजेषु स्वर्णाचलजलधिधनदकोषेषु ।
सत्स्वेव राजपुङ्गव किं दातास्मीति गर्वमावहसि ॥१६६॥

रागं विना विराजन्ते मुनयो मणयस्तु न ।
कौटिल्येन विना भाति नरो न कबरीभरः ॥१६७॥

राजन् प्रचण्डमार्तण्डमण्डलोद्दण्डशासन ।
कथमक्रूरसत्त्वस्त्वं पयोधिरिव गीयसे ॥१६८॥

लङ्कापुरादतितरां कुपितः फणीव निर्गत्य जातु पृतनापतिभिः परीतः ।
क्रुद्धं रणे सपदि दाशरथिं दशास्यः संरब्धदाशरथिदर्शमहो ददर्श ॥१६९॥

लता कुसुमभारेण शीलभारेण सुन्दरी ।
कविता चार्थभारेण श्रयते काममपि श्रियम् ॥१७०॥

लावण्येन प्रमदा मदातिरेकेण वारणाधिपतिः ।
भाति विभवेन भवकान् राजन् भवता च वसुमतीवलयम् ॥१७१॥

लोहितपीतैः कुसुमैरावृतमाभाति भूभृतः शिखरम् ।
दावज्वलनज्वालैः कदाचिदाकीर्णमिव समये ॥१७२॥

वचने तव यत्र माधुरी सा हृदि पूर्णा करुणा च कोमलेऽभूत् ।
अधुना हरिणाक्षि हा कथं वा कटुता तत्र कठोरताविरासीत् ॥१७३॥

वदनं विना सुकवितां सदनं साध्वीं विना वनिताम् ।
राज्यं च विना धनितां न नितान्तं भवति कमनीयम् ॥१७४॥

वराका यं राकारमण इति वल्गन्ति सहसा
सरः स्वच्छं मन्ये मिलदमृतमेतन् मखभुजाम् ।
अमुष्मिन् या कापि द्युतिरतिघना भाति मिषता-
मियं नीलच्छायादुपरि निरपायाद् गगनतः ॥१७५॥

वसु दातुं यशो धातुं विधातुमरिमर्दनम् ।
त्रातुं च मादृशान् राजन्नतीव निपुणो भवान् ॥१७६॥

वसुधावलयपुरंदर विलसति भवतः कराम्भोजे ।
चिन्तामणिकल्पद्रुमकामगवीभिः कृतं जगति ॥१७७॥

वागिव मधुरा मूर्तिर्मूर्तिरिवात्यन्तनिर्मला कीर्तिः ।
कीर्तिरिव जगति सर्वस्तवनीया मतिरमुष्य विभोः ॥१७८॥

वामाकल्पितवामाङ्गो भासते भाललोचनः ।
शम्पया संपरिष्वक्तो जीमूत इव शारदः ॥१७९॥

वारिधिराकाशसमो वारिधिसदृशस्तथाकाशः ।
सेतुरिव स्वर्गङ्गा स्वर्गङ्गेवान्तरा सेतुः ॥१८०॥

विज्ञत्वं विदुषां गणे सुकवितां सामाजिकानां कुले
माङ्गल्यं स्वजनेषु गौरवमथो लोकेषु सर्वेष्वपि ।
दुर्वृत्तेऽशनितां नृलोकवलये राजत्वमव्याहतं
मित्रत्वं च वहन्नकिंचनजने देव त्वमेको भुवि ॥१८१॥

विद्धा मर्मणि वाग्बाणैर्घूर्णन्ते साधवः खलैः ।
सद्भिर्वचोऽमृतैः सिक्ताः पुनः स्वस्था भवन्ति ते ॥१८२॥

विद्वत्सु विमलज्ञाना विरक्ता यतिषु स्थिताः ।
स्वीयेषु तु गरोद्गारा नानाकाराः क्षितौ खलाः ॥१८३॥

विमलतरमतिगभीरं सुपवित्रं सत्त्ववत् सुरसम् ।
हंसावासं स्थानं मानसमिह शोभते नितराम् ॥१८४॥

विमुञ्चसि यदि प्रिय प्रियतमेति मां मन्दिरे
तदा सह नयस्व मां प्रणययन्त्रणायन्त्रितः ।
अथ प्रकृतिभीरुरित्यखिलभीतिभङ्गक्षमान्
न जातु भुजमण्डलादवहितो बहिर्भावय ॥१८५॥

विष्णुवक्षःस्थितो भाति नितरां कौस्तुभो मणिः ।
अङ्गारक इवानेकतारके गगनाङ्गणे ॥१८६॥

व्योमाङ्गणे सरसि नीलिमदिव्यतोये
तारावलीमुकुलमण्डलमण्डितेऽस्मिन् ।
आभाति षोडशकलादलमङ्कभृङ्गं
सूराभिमुख्यविकचं शशिपुण्डरीकम् ॥१८७॥

शरदिन्दुरिवाह्लादजनको रघुनन्दनः ।
वनस्रजा विभाति स्म सेन्द्रचाप इवाम्बुदः ॥१८८॥

शरीरं ज्ञानजननं रोगो विष्णुस्मृतिप्रदः ।
विपद् वैराग्यजननी त्रयं सुखकरं सताम् ॥१८९॥

शान्तिमिच्छसि चेदाशु सतां वागमृतं शृणु ।
हृदये धारणाद् यस्य न पुनः खेदसंभवः ॥१९०॥

शीलभारवती कान्ता पुष्पभारवती लता ।
अर्थभारवती वाणी भजते कामपि श्रियम् ॥१९१॥

शैत्यं विना न चन्द्रश्रीर्न दीपः प्रभया विना ।
न सौगन्ध्यं विना भाति मालतीकुसुमोत्करः ॥१९२॥

श्येनमम्बरतलादुपागतं शुष्यदाननबिलो विलोकयन् ।
कम्पमानतनुराकुलेक्षणः स्पन्दितुं नहि शशाक लावकः ॥१९३॥

श्रीतातपादैर्विहिते निबन्धे निरूपिता नूतनयुक्तिरेषा ।
अङ्गं गवां पूर्वमहो पवित्रं न वा कथं रासभधर्मपत्न्याः ॥१९४॥

सदसद्विवेकरसिकैरालोक्य समस्तलोकमथ कविभिः ।
गणिता गगनलतादेर्गणनायां तन्वि तव सदृशी ॥१९५॥

सदृशी तव तन्वि निर्मिता विधिना नेति समस्तसंमतम् ।
अथ चेन् निपुणं विभाव्यते मतिमारोहति कौमुदी मनाक् ॥१९६॥

सदैव स्नेहार्द्रे सुरतटिनि निष्किंचनजने
यदि त्वं नाधत्से सुरभिरिव वत्से मयि कृपाम् ।
तदा चिन्तारत्नत्रिदशपतिभूमीरुहमुखा
ददीरन्नर्थिभ्यः किमिति कणभिक्षामपि जडाः ॥१९७॥

स पण्डितो यः स्वहितार्थदर्शी हितं च तद् यत्र परानपक्रियाः ।
परे च ते ये श्रितसाधुभावा सा साधुता यत्र चकास्ति केशवः ॥१९८॥

संपदा संपरिष्वक्तो विद्यया चानवद्यया ।
नरो न शोभते लोके हरिभक्तिरसं विना ॥१९९॥

सरसिजवनबन्धुश्रीसमारम्भकाले
रजनिरमणराज्ये नाशमाशु प्रयाति ।
परमपुरुषवक्त्रादुद्गतानां नराणां
मधुमधुरगिरां च प्रादुरासीद् विनोदः ॥२००॥

सम्भूत्यर्थं सकलजगतो विष्णुनाभिप्रपन्नं
यन्नालं स त्रिभुवनगुरुर्वेदनाथो विरिञ्चिः ।
ध्येयं धन्यालिभिरतितरां स्वप्रकाशस्वरूपं
पद्माख्यं तत् किमपि ललितं वस्तु वस्तुष्टयेऽस्तु ॥२०१॥

सरसि प्लवदाभाति जम्बीरं सुपचेलिमम् ।
आदिकारणतोयौघ इव ब्रह्माण्डमण्डलम् ॥२०२॥

सर्प इव शान्तमूर्तिः श्वेवायं मानपरिपूर्णः ।
क्षीब इव सावधानो मर्कट इव निष्क्रियो नितराम् ॥२०३॥

संसारे चेतनास्तत्र विद्वांसस्तत्र साधवः ।
साधुष्वपि स्पृहाहीनास्तेषु धन्या निराशयाः ॥२०४॥

साम्राज्यलक्ष्मीरियमृष्यकेतोः सौन्दर्यसृष्टेरधिदेवता वा ।
रामस्य रामामवलोक्य लोकैरिति स्म दोला रुरुहे तदानीम् ॥२०५॥

साहंकारसुरासुरावलिकराकृष्टभ्रमन्मन्दर-
क्षुभ्यत्क्षीरधिवल्गुवीचिवलयश्रीगर्वसर्वंकषाः ।
तृष्णाताम्यदमन्दतापसकुलैः सानन्दमालोकिता
भूमीभूषण भूषयन्ति भुवनाभोगं भवत्कीर्तयः ॥२०६॥

सिन्दूरारुणवपुषो देवस्य रदाङ्कुरो गणाधिपतेः ।
सन्ध्याशोणाम्बरगतनवेन्दुलेखायितः पातु ॥२०७॥

सुजनाः परोपकारं शूराः शस्त्रं धनं कृपणाः ।
कुलवत्यो मन्दाक्षं प्राणात्यय एव मुञ्चन्ति ॥२०८॥

सुधायाश्चन्द्रिकायाश्च संजीविन्या महौषधेः ।
दयादृष्टेश्च ते राजन् विश्वसंजीवनं गुणः ॥२०९॥

सुधासमुद्रं तव रम्यवाणी वाचं क्षमाचन्द्र सुधासमुद्रः ।
माधुर्यमध्यापयितुं दधाते खर्वेतरामान्तरगर्वमुद्राम् ॥२१०॥

सुराङ्गनाभिराश्लिष्टा व्योम्नि वीरा विमानगाः ।
विलोकन्ते निजान् देहान् फेरुनारीभिरावृतान् ॥२११॥

सुराणामारामादिह झगिति झञ्झानिलहताः
पतेयुः शाखीन्द्रा यदि तदखिलो नन्दति जनः ।
किमेभिर्वा कार्यं शिव शिव विवेकेन विकलैः
चिरं जीवन्नास्तामधिधरणि दिल्लीनरपतिः ॥२१२॥

सुवर्णस्य कृते तन्वि देशं देशमटाम्यहम् ।
तस्य दुष्प्रापताहेतोश्चिन्ताक्रान्तं मनो मम ॥२१३॥

सूर्याचन्द्रमसौ यस्य वासो रञ्जयतः करैः ।
अङ्गरागं सृजत्यग्निस्तं वन्दे परमेश्वरम् ॥२१४॥

स्तनान्तर्गतमाणिक्यवपुर्बहिरुपागतम् ।
मनोऽनुरागि ते तन्वि मन्ये वल्लभमीक्षते ॥२१५॥

स्मरदीपदीप्तदृष्टेर्घनान्धकारेऽपि पतिगृहं यान्त्याः ।
झटिति प्रादुरभूवन् सख्यादिव चञ्चलाः परितः ॥२१६॥

स्वर्गनिर्गतनिरर्गलगङ्गातुङ्गभङ्गुरतरङ्गसखानाम् ।
केवलामृतमुचां वचनानां यस्य लास्यगृहमास्यसरोजम् ॥२१७॥

स्वर्गापवर्गौ खलु दानलक्ष्मीर्दानं प्रसूते विपुला समृद्धिः ।
समृद्धिमल्पेतरभागधेयं भाग्यं च शम्भो तव पादभक्तिः ॥२१८॥

हतकेन मया वनान्तरे वनजाक्षी सहसा विवासिता ।
अधुना मम कुत्र सा सती पतितस्येव परा सरस्वती ॥२१९॥

हरिः पिता हरिर्माता हरिर्भ्राता हरिः सुहृत् ।
हरिं सर्वत्र पश्यामि हरेरन्यन् न भाति मे ॥२२०॥

हरिकरसङ्गादधिकं रमणीयाप्यतुलरागसंवलिता ।
सुन्दरि तवाननाग्रे कमलाभा विगलितप्रतिभा ॥२२१॥

हरिचरणकमलनखगणकिरणश्रेणीव निर्मला नितराम् ।
शिशिरयतु लोचनं मे देवव्रतपुत्रिणी देवी ॥२२२॥

हरिचरणनखरसङ्गादेके हरमूर्धसंस्थितेरन्ये ।
त्वां प्राहुः पुण्यतमामपरे सुरतटिनि वस्तुमाहात्म्यात् ॥२२३॥

हरिमागतमाकर्ण्य मथुरामन्तकान्तकम् ।
कम्पमानः श्वसन् कंसो निपपात महीतले ॥२२४॥

हरिश्चन्द्रेण संज्ञप्ताः प्रगीता धर्मसूनुना ।
खेलन्ति निगमोत्सङ्गे मातर्गङ्गे गुणास्तव ॥२२५॥

हर्षयन्ति क्षणादेव क्षणादेव दहन्ति च ।
यूनः स्मरपराधीनान् निर्दया हन्त योषितः ॥२२६॥

हालाहलकालानलकाकोदरसंगतिं करोति विधुः ।
अभ्यसितुमिव तदीयां विद्यामद्यापि हरशिरसि (गतः) ॥२२७॥

हिंसाप्रधानैः खलु यातुधानै-
र्यानीयतापावनतां सदैव ।
रामाङ्घ्रियोगादथ सापि वन्या
विन्ध्यस्य धन्यास्त मुनेः सतीव ॥२२८॥

हीरस्फुरद्रदनशुभ्रिमशोभि किं च
सान्द्रामृतं वदनमेणविलोचनायाः ।
वेधा विधाय पुनरुक्तमिवेन्दुबिम्बं
दूरीकरोति न कथं विदुषां वरेण्यः ॥२२९॥

———

(१२) प्राणाभरणम् [जगदाभरणम्]

(१२) प्राणाभरणम् [जगदाभरणम्]

विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमा
भूपालाः कमलाविलासमदिरोन्मीलन्मदाघूर्णिताः ।
आस्ये धास्यति कस्य लास्यमधुना धन्यस्य कामालस-
स्वर्वामाधरमाधुरीमधरयन् वाचां विलासो मम ॥१॥

विद्वांस इत्यादि प्रायदर्शनाभिप्रायमेतत्, तेन सहृदयैर्न मनागपि विमनायितव्यम् । भावध्वनिश्चायम् । उत्तरार्धप्रतिपाद्यार्थालम्बनाया एतत्पद्यप्रयोगानुभावायाः कविगत-चिन्तायाः प्राधान्येनाभिव्यक्तेः । अनुपात्तोभयनिमित्तको व्यतिरेकः स्फुटोऽलङ्कारः । कामाल-सत्वं वामाविशेषणमधरमाधुरीप्रकर्षकम् ॥१॥

विद्वार्णव गुणज्ञता समुदितो भूयानसूयाभरः
कालोऽयं कलिराजगाम जगतीलावण्यकुक्षिम्भरिः ।
एवं भावनया मदीयकविते मौनं किमालम्बसे
[1] जागर्तु क्षितिमण्डले चिरमिह श्रीकामरूपेश्वरः ॥२॥

[[1] जगदा० जागर्तु क्षितिमण्डलोपरि जगत्सिंहो धराधीश्वरः ।]

कविगतराजविषयकरतिभावध्वनिश्चायम् । इत ऊर्ध्वमयमेव आचरमपद्यमनुवर्त्ति-ष्यते । अस्याश्चात्र मौनानुभावितो वर्णनीयालम्बनो निर्वेदो गुण इति प्रेयोऽलङ्कारास्पदम् । अत्र च अचेतनायां कवितायां चेतनत्वाध्यवसायमूला असम्बन्धे सम्बन्धात्मिका अतिशयोक्ति-र्विवक्षिता । तेन भावनामौननिर्वेदानां सम्बोधनस्य च नानुपपत्तिः ॥२॥

पारीन्द्राणां धुरीणैरवनिधरगुहागर्भतः प्रोत्पतद्भिः
स्वापभ्रंशापराधप्रचलितनयनप्रान्तमाकर्ण्यमानः ।
त्वत्प्रस्थानान्तरुद्यत्प्रलयजलधरध्वानधिक्कारधीरो
घृष्टक्षीरोदतीरो जगति विजयते दुन्दुभिद्वन्द्वनादः ॥३॥

अत्र राजालम्बनस्य तादृशनादश्रवणोद्दीपितस्य नयनप्रचलनानुभावितस्य गिरिगुहा-गर्भोत्पतनाभिव्यक्तेनामर्षेण सञ्चारिणा परिपोषितस्य पारीन्द्रगतोत्साहस्य स्थायिनो राज-विषयकरतिभावाङ्गत्वात् रसालङ्कारत्वम् । यदाहुः—"प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः । काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ॥" इति । तृतीयचतुर्थचरणयोस्तु स्फुटावेव व्यतिरेकातिशयौ । घृष्टपदेन तादृशनादो वेलाचलप्रतिबद्धत्वादग्रे न गतोऽन्यथा तु लोकालोकाचलमपि स्पृशेदिति भावो गम्यते । अत एव मृष्टेति नोक्तम् । तथा सति शैथि-ल्यप्रत्ययापत्तेः ॥३॥

किं ब्रूमस्तव वीरतां वयममी यस्मिन् धराखण्डल
क्रीडाकुण्डलितभ्रुशोणनयने दोर्मण्डलं पश्यति ।

[1] माणिक्यावलिकान्तिदन्तुरतरैर्भूषासहस्रोत्करै-
र्विन्ध्यारण्यगुहागृहावनिरुहास्तत्कालमुल्लासिताः ॥४॥

[[1] जगदा० नानाभूषणरत्नजालजटिलास्तत्कालमेवाभवन्
विन्ध्यक्ष्माधरगन्धमादनगुहासम्बन्धिनो भूरुहाः ॥]

अत्र विन्ध्यारण्यगतानां गुहागृहाणामवनिरुहाणां च विन्ध्यगतानां गुहागृहाणामरण्यगतानामवनिरुहाणां च वा भूषणेन कार्येणाप्रस्तुतेन त्वदरिनारीणां स्वनगराणि परित्यज्य निशि गुहागृहेषु तरुतलेषु च विन्यस्य सकलाभरणानि कृतशयनानां प्रातस्त्वदागमनसंभ्रमेण तत्कर्मकं विस्मरणं भारवशात् परित्यागो वा प्रस्तुतो गम्यत इत्यप्रस्तुतप्रशंसा । कार्यस्य यथाकथंचित् प्रस्तुतत्वे तु पर्यायोक्तमलङ्कारः ॥४॥

माहात्म्यस्य परोऽवधिर्निजगृहं गम्भीरतायाः पिता
रत्नानामहमेक एव भुवने को वाऽपरो मादृशः ।
इत्येवं परिचिन्त्य सा स्म सहसा गर्वान्धकारं गमो
दुग्धाब्धे भवता समो विजयते [1]श्रीप्राणनारायणः ॥५॥

[[1] जगदा० श्रीकर्णजन्मार्णवः । रसगङ्गा० दिल्लीधरावल्लभः ।]

अत्रोपमानस्य गुणविशेषप्रयुक्तसादृश्याभावनिबन्धनमुत्कर्षं परिहर्त्तुं वर्ण्यमानतादृशसादृश्यात्मकः प्रतीपालङ्कारस्य भेदः । स चोपमाविशेष इत्येके । विच्छित्तिवैलक्षण्यादतिरिक्त एवेत्यपरे ॥५॥

त्वत्तो जन्म सितांशुशेखरतनुज्योत्स्नानिमग्नात्मनो
दुग्धाम्भोनिधिमुग्धवीचिवलयैः साकं परिक्रीडनम् ।
संवासः सुरलोकसिन्धुपुलिने वादः सुधांशोः करैः
कस्मान् नोज्वलिमानमञ्चतितमां देव त्वदीयं यशः ॥६॥

अत्र यशसि धवलतातिशयस्तद्धर्मिसम्बन्धप्रयुक्तत्वेन कथित इति समस्य विषयः । अंशुक्तश्चन्द्रे तत्क्तश्च भगवति भगवत्क्तश्च राजनीत्येवमुत्तरोत्तरमुपचीयमानो राजगत उत्कर्षः प्रतीयत इति सारविषयः । वस्तुतस्त्वनुक्तत्वात् प्रौढोक्तिरेवेति ॥६॥

आबध्नास्यलकान्निरस्यसितमां चोलं रसाकाङ्क्षया-
लङ्कायावशतां तनोषि कुरुषे जङ्घाललाटक्षतम् ।
प्रत्यङ्गं परिमर्दनिर्दयमहो चेतः समालम्बसे
वामानां विषये नृपेन्द्र भवतः प्रागल्भ्यमत्यद्भुतम् ॥७॥

अत्र प्रकृतधर्मिगतयोः प्रकृताप्रकृतयोः प्रकृतयोरेव वा वृत्तान्तयोः श्लेषः । स च षट्सु स्थलेषु शब्दनानात्वनिबन्धनो द्वयोश्चार्थनानात्वनिबन्धनः । द्वावप्येतौ शब्दालङ्काराविति प्राञ्चः । आद्यो जतुकाष्ठन्यायेन शब्दश्लेषणाच्छब्दालङ्कारो द्वितीयस्त्वेकवृन्तगतफलद्वयन्यायेनार्थश्लेषणादर्थालङ्कार इति नव्याः ॥७॥

देव त्वां परितः स्तुवन्तु कवयो लोभेन किं तावता
स्तुत्यस्त्वं भवितासि यस्य तरुणश्चापप्रतापोऽधुना ।

क्रोडान्तः कुरुतेतरां वसुमतीमाशाः समालिङ्गति
द्यां चुम्बत्यमरावतीं च सहसा गच्छत्यगम्यामपि ॥८॥

अत्र प्रतापगतः पृथिव्यादिसम्बन्धो लिङ्गविशेषावच्छिन्नतत्तत्साधारणविशेषणाभिव्यक्तकामुकवृत्तान्ताभिन्नतया स्थित इति समासोक्तिः, कार्यरूपधर्मप्रयुक्तशुद्धसाधारण्येन च विशेषणसाम्यमालम्ब्य प्रवृत्ता, सा च निन्दोत्थापकत्वाद् व्याजस्तुतौ गुणः ॥८॥

लोकानां विपदं धुनोषि तनुषे सम्पत्तिमत्युत्कटा-
मित्यल्पेतरजल्पितैर्जडधियां भूपाल मा गा मदम् ।
यत् कीर्तिस्तव वल्लभा लघुतरब्रह्माण्डभाण्डोदरे
पिण्डीकृत्य महोन्नतामपि तनुं कष्टेन हा वर्तते ॥९॥

अत्रापि प्राग्वत् । परं त्वाधाराधेयान्यतरविस्तृतत्वसिद्धिफलकान्यतरन्यूनत्वकल्पनात्माधिकालङ्कारोऽपि तस्यां गुणः ॥९॥

क्षोणीं शासति मय्युपद्रवलवः कस्यापि न स्यादिति
प्रौढं व्याहरतो वचस्तव कथं देव प्रतीमो वयम् ।
प्रत्यक्षं भवतो विपक्षनिवहैर्द्यामुत्पतद्भिः क्रुधा
यद् युष्मत्कुलकोटिमूलपुरुषो निर्भिद्यते भास्करः ॥१०॥

इह त्वधिकसमासोक्तिभ्यामनालिङ्गितैव सा (व्याजस्तुतिः) ॥१०॥

आस्वादेन रसो रसेन कविता काव्येन वाणी तया
लोकान्तःकरणानुरागरसिकः सभ्यः सभा चामुना ।
दारिद्र्यानलदह्यमानजगतीपीयूषधाराधर
क्षोणीनाथ तया भवांश्च भवता भूमण्डलं भासते ॥११॥

मालादीपकमेतदिति प्राञ्चः । दीपकस्य सादृश्यमूलकतानियमान्नेदं दीपकम् अपित्वेकावलीभेद इति तु वयम् ॥११॥

अम्लायन् यदरातिकैरवकुलान्यम्लासिषुः सत्वरं
दैन्यध्वान्तकदम्बकानि परितो नेशुस्तमां तामसाः ।
सन्मार्गाः प्रसरन्ति साधुनलिनान्युल्लासमातन्वते
तन् मन्ये भवतः प्रतापतपनो देव प्रभातोन्मुखः ॥१२॥

इह रूपकनिष्पादितलिङ्गकमनुमानं निमित्तविरहादुत्प्रेक्षाया अयोगाद् । वाचकमनुमितिपरम् ॥१२॥

उत्क्षिप्ताः कबरीभरं विवलिताः पार्श्वद्वयं न्यक्कृताः
पादाम्भोजयुगं रुषा परिहृता दूरेण चेलाञ्चलम् ।
गृह्णन्ति त्वरया भवत्प्रतिभटक्ष्मापालवामभ्रुवां
यान्तीनां गहनेषु कण्टकचिताः के के न भूमीरुहाः ॥१३॥

अत्र कण्टकचितत्वेन कबरीग्रहणादेः सङ्कीर्णत्वात् कार्यधर्मान्तरसंकीर्णशुद्धसाधारण्येन विशेषणसाम्यमालम्ब्य प्रवृत्ता समासोक्तिः ॥१३॥

दोर्दण्डद्वयकुण्डलीकृतलसत्कोदण्डचण्डाशुग-
ध्वस्तोद्दण्डविपक्षमण्डलमथ त्वां वीक्ष्य मध्येरणम् ।
वल्गद्गाण्डिवमुक्तकाण्डवलयज्वालावलीताण्डव-
भ्रश्यत्खाण्डवरुष्टपाण्डवमहो को न क्षितीशः स्मरेत् ॥१४॥

अत्र स्मरणालङ्कारः । भाव इति तु न भ्रमितव्यम् । सादृश्यमूलकत्वतदमूलकत्वाभ्यां भावत्वालङ्कारत्वयोरिह व्यवस्थितेः । शब्दवेद्यत्वाच्च ॥१४॥

सृष्टः सृष्टिभुवा पुरा किल परित्रातुं जगन्मण्डलं
त्वं चण्डातप निर्दयं तपसि यज् ज्वालाजटालैः करैः ।
संरम्भारुणलोचनो रणभुवि प्रस्थातुकामोऽधुना
जानीमो भवता न हन्त [1] विदितः श्रीकामरूपेश्वरः ॥१५॥

[[1] रसगङ्गा० विदितो दिल्लीधरावल्लभः ।]

अत्र राजवर्णनाङ्गत्वेन रवेर्भयोत्पादने वर्ण्यत्वेन प्रस्तुते साक्षात्तदननुगुणत्वेनाप्रस्तुतेन प्रस्थानेन साक्षात्तदनुगुणं रिपुकर्तृकं सूर्यमण्डलभेदनं कार्यं गम्यते ॥१५॥

आयाता कमलासनस्य भवनाद् द्रष्टुं त्रिलोकीतलं
गीर्वाणेषु दिनानि कानिचिदथो नीत्वा पुनः कौतुकात् ।
भ्रान्त्वा भूवलये महाकविकुलोपास्या तवास्याम्बुजे
राजन् सम्प्रति सत्यधाम्नि गिरां देवी सुखं वर्तते ॥१६॥

[उपरिलिखितौ इमौ द्वौ श्लोकौ पूनास्थभाण्डारकरप्राच्यसंशोधनमन्दिरस्थ-हस्तलिखितप्राणाभरणे नोपलभ्येते ।]

अत्रैकस्याधेयस्यानेकाधारसम्बन्धात् पर्यायः । तत्र प्रथमचरणगतमधिकरणमार्थम् । विश्लेषावधिपञ्चम्या विश्लेषस्योपश्लेषापेक्षत्वेनौपश्लेषिकाधिकरणस्याक्षेपगम्यत्वात् । सत्यधामनीति श्लेषभित्तिकाभेदाध्यवसानेन मुखस्य सत्यलोकतासिद्धौ सुखवर्तनसिद्धिः ॥१६॥

दृष्टिः सम्भृतमङ्गला बुधमयी देव त्वदीया सभा
काव्यस्याश्रयभूतमास्यमरुणाधारोऽधरः सुन्दरः ।
क्रोधस्तेऽशनिभूरुदारधिषणा स्वान्तं तु सोमास्पदं
राजन् नूनमनूनविक्रम भवान् सर्वग्रहालम्बनम् ॥१७॥

विशेषणीभूतानां कल्याणादीनां श्लेषेणाभेदसम्पादनद्वारा तादृशधर्मसाधारणतासम्पत्तौ तन्निमित्तकोत्प्रेक्षासिद्धिः ॥१७॥

विद्वद्दैन्यतमस्त्रिमूर्तिरथवा वैरीन्द्रवंशाटवी-
दावाग्निः किमहो महोज्ज्वलयशःशीतांशुदुग्धाम्बुधिः ।
किं वानङ्गभुजङ्गदष्टवनिताजीवातुरेवं नृणां
केषामेष नराधिपो न जनयत्यल्पेतराः कल्पनाः ॥१८॥

अत्र कोटीनामारोपान्तरमूलकत्वात् परम्परितरूपकमूलः संशयः । स चाहार्यः मूलारोपस्य तथात्वात् कवाविव कविनिबद्धप्रमात्रन्तरेऽप्याहार्यबुद्धेरविरोधात् ॥१८॥

नदन्ति मददन्तिनः परिलसन्ति वाजिव्रजाः
पठन्ति बिरुदावलीमहितमन्दिरे बन्दिनः ।
इदं तदवधि प्रभो यदवधि प्रवृद्धा न ते
युगान्तदहनोपमा नयनकोणशोणद्युतिः ॥१९॥

अत्र मुख्यार्थस्य राजविषयायाः कविरतेरुपस्कारकस्य यदैव तव कोपोदयस्तदैव तव रिपूणां सम्पदो भस्मसाद् भविष्यन्तीति वस्तुन उपस्कारिका नयनकोणशोणद्युतेर्युगान्तदहनोपमा ॥१९॥

मयि त्वदुपमाविधौ वसुमतीश वाचंयमे
न वर्णयति मामसौ कविरिति क्रुधं मा कृथाः ।
चराचरमिदं जगज् जनयतो विधेर्मानसे
पदं न विदधेतरां तव खलु द्वितीयो नरः ॥२०॥

अत्र त्वत्समो नास्तीति प्रत्ययादुपमानलुप्तोपमा व्यङ्ग्येति प्राञ्चः । सर्वथैव साम्यस्याप्रतिष्ठानान्नेयमुपमा । अन्यथा व्यतिरेकस्यापि तत्त्वापत्तेः । 'ढुंढोल्लन्तो मरिससि कंटककलिआइं केअइवणाइं । मालइकुसुमसरिच्छं भमर भमंतो ण पावेसि ॥' इत्यत्र तु न प्राप्स्यसीत्युक्त्वा क्वचित् त्वदगोचरे स्थले भवष्यतीति प्रतीतेः सादृश्यपदप्रतिष्ठानाल्लुप्तोपमास्तु । तस्मादसमालङ्कार एवायमिति तु नव्याः ॥२०॥

भुजभ्रमितपट्टिशोद्दलितदृप्तदन्तावलं
भवन्तमरिमण्डलक्षथन पश्यतः सङ्गरे ।
करालकुलिशाहतिस्फुटविभिन्नविन्ध्याचलो
न कस्य हृदयं झगित्यधिरुरोह जम्भाहितः ॥२१॥

अत्रापि स्मरणालङ्कारः परन्तु लक्ष्यः ॥२१॥

यमः प्रतिमहीभृतां हुतवहोऽसि तन्नीवृतां
सतां खलु युधिष्ठिरो धनपतिर्धनाकांक्षिणाम् ।
गृहं शरणमिच्छतां कुलिशकोटिभिर्निर्मितं
त्वमेक इह भूतले बहुविधो विधात्रा कृतः ॥२२॥

अत्र कविना यमत्वादिना रूपेण राज्ञो रूपवतः करणाद्रूपकेण विपक्षभूपालादीनामेतस्मिन्नागते यमत्वादिना भ्रान्तेरपि सम्भवात् भ्रान्तिमता तैरेवानेकैः ग्रहीतृभिर्यमत्वादिकैर्धर्मैरुल्लेखनादुल्लेखविशेषेण च सह सङ्कीर्णोऽयं सम्बन्धिषष्ठचन्तभेदप्रयुक्तवर्ण्यानेकविधत्वक उल्लेखः ॥२२॥

द्विनेत्र इव वासवः करयुगो विवस्वानिव
द्वितीय इव चन्द्रमाः श्रितवपुर्मनोभूरिव ।
नराकृतिरिवाम्बुधिर्गुरुरिव क्षमामागतो
नुतो निखिलभूसुरै[1]र्जयति [2]कामरूपेश्वरः ॥२३॥

[1. जगदा० विजयते जगत्केसरी । 2. रसगङ्गा० कोऽपि भूमीपतिः ।]

अत्र राजगतानां द्विनेत्रत्वादीनां वासवादितादात्म्यविरोधिनां विरोधनिवर्तनाय विषयिषु वासवादिष्वारोपेण साधारणीकरणात् तन्निमित्तकोत्प्रेक्षा । सा चेह मालारूपा । न चात्रोपमा शक्यनिरूपणा । द्विनेत्रत्वाद्युक्तेर्निष्प्रयोजकत्वापत्तेः । न चोपमानिष्पादकं तेषां साधारण्यं तदभावेऽपि परमैश्वर्यादिभिस्तस्याः प्रतीयमानैर्निष्पत्तेः । असुन्दरत्वेन उपमानिष्पादकतया कवेरनभिप्रेतत्वाच्च । एवं द्वितीयत्वादीनां चन्द्रादिष्वारोपोऽप्युपमायां सत्यामनर्थक एव स्यात् ।।२३।।

दीनव्राते दयार्द्रा निखिलरिपुकुले निर्दया किं च मृद्वी
काव्यालापेषु तर्कप्रतिवचनविधौ कर्कशत्वं दधाना ।
लुब्धा धर्मेष्वलुब्धा वसुनि परविपद्दर्शने कान्दिशीका
राजन्नाजन्मरम्या स्फुरति बहुविधा तावकी चित्तवृत्तिः ।।२४।।

अत्र विषयानेकत्वप्रयुक्तं चित्तवृत्तेरनेकविधत्वमित्युल्लेखः । तत्र च तदीयचित्तवृत्तित्वेनैकत्वाध्यवसानं तन्त्रम् ।।२४।।

देवाः के पूर्वदेवाः समिति मम नरः सन्ति के वा पुरस्ता-
देवं जल्पन्ति तावत् प्रतिभटपृतनावर्तिनः क्षत्रवीराः ।
यावन् नायाति राजन् नयनविषयतामन्तकत्रासिमूर्ते-
र्मुग्धारिप्राणदुग्धाशनमसृणरुचिस्त्वत्कृपाणो भुजङ्गः ।।२५।।

अत्र शुद्धपरम्परितरूपकम् ।।२५।।

प्राची सन्ध्या समुद्यन्महिमदिनमणेर्मानमाणिक्यकान्ति-
र्ज्वालामाला कराला कवलितजगतः क्रोधकालानलस्य ।
आज्ञा कान्तापदाम्भोरुहतलविगलन्मञ्जुलाक्षारसानां
[1] सा भाति क्षोणिशोभाकरण तव दृशोः सङ्गरे शोणिमश्रीः ।।२६।।

[[1] रसगङ्गा० क्षोणीन्दो सङ्गरे ते लसति नयनयोरुद्भटा शोणिमश्रीः ।।]

अत्रापि तदेव परन्तु मालात्मकम् ।

(अस्य पद्यस्य पूनास्थभाण्डारकरसंशोधनमन्दिरस्थहस्तलिखिते ग्रन्थे व्याख्या नास्ति) ।।२६।।

त्वां सुन्दरीनिवहनिष्ठुरधैर्यगर्व-
निर्वासनैकरसिकं समरे निरीक्ष्य ।
[1]केषामरिक्षितिभृतां नवराज्यलक्ष्मीः
स्वामिव्रतत्वमपरिस्खलितं बभार ।।२७।।

[[1] जगदा० का वा रिपुक्षितिभृतां]

अत्र शत्रूणां राज्यलक्ष्मीस्त्वां प्राप्तेति विवक्षितोऽर्थः पातिव्रत्यस्खलितरूपेणाभिहित इति पर्यायोक्तम् । तच्च राज्यलक्ष्म्या नायिकात्वसिद्ध्यर्थं समासोक्तिमपेक्षत इति सा तत्र गुणः ।।२७।।

नासत्ययागो वचनेषु कीर्त्तौ तथार्जुनः कर्मणि चापि धर्मः ।
चित्ते जगत्प्राणभवो यदास्ते वशंवदास्ते किमु पाण्डुपुत्राः ॥२८॥

अत्र पाण्डुपुत्रेषु विषयेषु राजवशंवदतादात्म्योत्प्रेक्षायां राजाश्रितत्वरूपो विषयिधर्मः श्लेषेण विषयाणां राजाश्रितानां चासत्याभावशुक्लगुणपुण्यपरमेश्वराणामभेदसम्पादनद्वारा विषयसाधारणीकृतः ॥२८॥

मन्थाचलभ्रमणवेगवशंवदा ये
दुग्धाम्बुधेरुदपतन्नणवः सुधायाः ।
तैरेकतामुपगतैर्विविधौषधीभि-
र्धाता ससर्ज तव देव दयादृगन्तान् ॥२९॥

अत्र दृगन्तेषु न केवलं संजीवकत्वादयोऽमृतमात्रगुणा एव कवेर्बुबोधयिषिता अपितु निखिलजनवशीकारकत्वादयोऽन्येऽपीति सुधाकणेष्वोषधीसंसर्गो विशेषणतया अतिशयार्थमुपात्त इति प्रौढोक्तिः ॥२९॥

केशैर्वधूनामथ सर्वकोषैः प्राणैश्च साकं प्रतिभूपतीनाम् ।
त्वया रणे निष्करुणेन गाढं चापस्य जीवा चकृषे जवेन ॥३०॥

अत्र चापकर्षणकार्याणां केशाकर्षणादीनां पौर्वापर्यविपर्ययात्मनातिशयेनानुप्राणिता सहोक्तिः ॥३०॥

महेन्द्रतुल्यं कवयो भवन्तं वदन्तु किं तानिह वारयामः ।
भवान् सहस्रैः समुपास्यमानः कथं समानस्त्रिदशाधिपेन ॥३१॥

अत्र श्लेषोत्थापितत्रित्वदशत्वसंख्यामादाय व्यतिरेक उपात्तोभयनिमित्तः ॥३१॥

स तु वर्षतु वारि वारिदस्त्वमुदाराशय रत्नवर्षणः ।
स कुहूरजनीमलीमसस्त्वमिहान्तर्बहिरेव निर्मलः ॥३२॥

अत्रापि स एव परं तु श्लेषोऽत्रानुत्थापको निषिध्यमानं साम्यं च न शाब्दमिति विशेषः ॥३२॥

कतिपयैर्निरणायि जनाधिपस्तदपरैरुदटङ्कि धनाधिपः ।
अजनि केवलमेष गिरां पतिर्भुवि मदेकमते कमतेश्वरः ॥३३॥

अत्र नायं राजा किंतु गिरां पतिरित्याकारापह्नुतिः । तत्र निषेधभागः परमतत्वोक्त्या पूर्वार्धेन गम्यते । आरोपभागस्तूत्तरार्धेन शाब्द एव ॥३३॥

मकरप्रतिमैर्महाभटैः कविभी रत्ननिभैः समन्वितः ।
कवितामृतकीर्तिचन्द्रयोस्त्वमिहोर्वीरमणासि भाजनम् ॥३४॥

अत्र राज्ञो जलध्युपमायाः शब्देनानभिधानेऽप्यङ्गोपमाभिराक्षेपादेकदेशविवर्त्तिन्युपमा । तेनोत्तरार्धे उपमितसमास एव विशेषणसमासवेद्यस्य तादात्म्यस्य प्रकृतेऽनुपयोगात् ॥३४॥

पुरः पुरस्तादरिभूपतीनां भवन्ति भूवल्लभ भस्मशेषाः ।
अनन्तरं ते भ्रुकुटीविटङ्कात् पतन्ति रोषानलविस्फुलिङ्गाः ॥३५॥

अत्र प्रयोजकातिशयकृतः प्रयोज्यशैघ्र्यातिशयो गम्यते । कार्यकारणपौर्वापर्यविपर्ययरूपा चेयमतिशयोक्तिः ॥३५॥

भुवनत्रितयेऽपि मानवैः परिपूर्णे विबुधैश्च दानवैः ।
न भविष्यति नास्ति नाभवन् नृप यस्ते भजते तुलास्पदम् ॥३६॥

अत्रोपमानलुप्तोपमेति प्राञ्चः । असमाख्यमलङ्कारान्तरमिति तु वयम् ॥३६॥

पीयूषयूषकल्पामल्पामपि ते गिरं निपीतवताम् ।
तोषाय कल्पते नो योषाधरबिम्बमधुरिमोद्रेकः ॥३७॥

अत्र सम्बन्धेऽप्यसम्बन्ध इत्यतिशयोक्तिभेदः । उपमेयोपमानविशेषणाभ्यामल्पत्वोद्रिक्तत्वाभ्यामल्पयापि सह भूयानपि मधुरिमा यत्र साम्यं कर्तुमनीशस्तत्र किं वायं भूयस्येति वैलक्षण्यात्मा व्यतिरेकश्च ॥३७॥

भासयति व्योमस्था जगदखिलं कुमुदिनीर्विकासयति ।
कीर्तिस्तव धरणिगता [1]सगरसुतायासमफलतां नयते ॥३८॥
[[1]जगदा० विफलयतितमां भगीरथायासम्]

अत्र व्यज्यमानचन्द्रिकासमुद्ररूपसङ्कीर्णं उल्लेखः ॥३८॥

भाग्येन सह रिपूणामुत्तिष्ठसि विष्टरात् क्रुधाविष्टः ।
सहसैव पतसि तेषु क्षितिशासन मृत्युना साकम् ॥३९॥

'केशैर्वधूनाम्' (३०) इत्यत्र कर्मणः सहोक्तिः इह तु कर्तुरिति विशेषः ॥३९॥

त्वयि पाकशासनसमे शासति सकलं वसुन्धरावलयम् ।
विपिने वैरिवधूनां वर्षन्ति विलोचनानि च दिनानि ॥४०॥

अत्र वर्षवदाचरन्तीत्याचारक्विबन्तेन श्लेषात् श्लेषमूलिका तुल्ययोगिता । रिपुकामिनीवर्णनविषयत्वेन उपमानोपमेययोः द्वयोरपि प्रकृतत्वात् ॥४०॥

अहितापकरणभेषज नरनाथ भवान् करस्थितो यस्य ।
तस्य कुतोऽहिभयं स्यादखिलामपि मेदिनीं चरतः ॥४१॥

अत्र श्लेषनिवेदितस्य सर्पभयाभावस्य उपपादकतया उपात्तस्य राजनि भेषजतादात्म्यारोपस्याप्युपपादकतया स्थितं राजसम्बन्धिनि द्विषदपकरणरूपे धर्मे श्लेषनिवेदितं सर्पतापकरणतादात्म्यमिति प्रथमचरणे श्लिष्टपरम्परितरूपकं तृतीये तु श्लेष एव ॥४१॥

कुवलयलक्ष्मीं हरते तव कीर्तिस्तत्र किं चित्रम् ।
यस्मान् निदानमस्या लोकनमस्याङ्घ्रिपङ्कजो हि भवान् ॥४२॥

अत्रोत्पादकसमानगुणत्वादुत्पाद्यस्योत्पादकभावसंसर्गानुरूपः समालङ्कारविशेषः । श्लेषश्चास्मिन् गुणः ॥४२॥

दृष्टः सदसि चेदुग्राश्चन्द्रचन्दनचन्द्रिकाः ।
अथ त्वं सङ्गरे सौम्याः शेषकालानलाब्धयः ॥४३॥

अत्र दृष्टः सदसीति वाक्ये त्वमित्यस्यापकर्षणात् अथ त्वं सङ्गर इति वाक्ये च दृष्ट इत्यस्यानुवर्तनाद्वाक्ययोः पदविनिमयात्मालङ्कारः। पूर्वार्द्धे उत्तरार्द्धे च प्रकृतानामेकधर्मसम्बन्धात् तुल्ययोगिता । उपमेयस्य उत्कृष्टगुणत्वसिद्धये उपमानस्य तद्विरुद्धगुणकल्पनात्मकेन अलङ्कारान्तरेण शबलिता ॥४३॥

अपारे खलु संसारे विधिनैकोऽर्जुनः कृतः ।
कीर्त्या निर्मलया भूप त्वया सर्वेऽर्जुनाः कृताः ॥४४॥

इह श्लेषमूलो व्यतिरेकः ॥४४॥

दधीचिबलिकर्णेषु हिमहेमाचलाब्धिषु ।
अदातृत्वमधैर्यत्वं दृष्टे भवति भासते ॥४५॥

अत्रापि सैव तथाविधा । यथासंख्यसङ्करस्तु विशेषः ॥४५॥

शासति त्वयि हे राजन्नखण्डावनिमण्डलम् ।
न मनागपि निश्चिन्ते मण्डले शत्रुमित्रयोः ॥४६॥

इहापि तुल्ययोगिता मित्रशब्दश्लेषोत्थापिता व्याजस्तुतिश्च ॥४६॥

भानुरग्निर्यमो वायं बलिः कर्णोऽथवा शिबिः ।
प्रत्यर्थिनोऽर्थिनश्चेत्थं त्वयि यान्ति विकल्पनाम् ॥४७॥

इह संशय उल्लेखालिङ्गितः ॥४७॥

कमलावासकासारः क्षमाधृतिफणीश्वरः ।
भवान् कुवलयस्येन्दुरानन्दयति मानवान् ॥४८॥

इह श्लिष्टपरम्परितरूपकं परन्तु मालारूपम् ॥४८॥

गगने चन्द्रिकायन्ते हिमायन्ते हिमाचले ।
पृथिव्यां सागरायन्ते भूपाल तव कीर्तयः ॥४९॥

इह मालोपमालिङ्गित उल्लेखः ॥४९॥

मृगतां हरयन् मध्ये वृक्षतां च पटीरयन् ।
नक्षत्रतां महीपानां त्वमिन्दवसि भूपते ॥५०॥

इह शुद्धपरम्परिता मालारूपोपमा । आचारक्विबन्ताच्छतरि रूपाणि । तिङि चैकम् ॥५०॥

मध्ये सुधासमुद्रस्य सितामयगृहोदरे ।
पूर्णेन्दुविष्टरे देव स्थातुं योग्यास्तवोक्तयः ॥५१॥

अत्र त्रयाणां सुधासमुद्रादीनां विशेषणविशेष्यभावेन मधुरिमणि परां काष्ठामधिरूढे वत्दीयोक्तिपदसम्बन्धो युक्तो न तु विशकलित इत्यतिशायिका सद्विशेषणनिबन्धना प्रौढोक्तिः ॥५१॥

अमृतलहरीचन्द्रज्योत्स्नारमावदनाम्बुजा-
न्यधरितवतो निर्मर्यादप्रसादमहाम्बुधेः ।
उदभवदयं देव त्वत्तः कथं परमोल्बणः
प्रलयदहनज्वालाजालाकुलो महसां गणः ॥५२॥

[1] अत्र कारणगुणविरुद्धस्वगुणस्य कार्यस्योत्पत्तेर्विषमालङ्कारः । अमृतलहर्यादीनां त्रयाणामधरीकरणात्मना व्यतिरेकेण संजीवकत्वपरमशीतलत्वविशुद्धत्वसौन्दर्याणामतिशयो गम्यते । एतेषु पद्येषु सम्भवन्तोऽप्यन्येऽलङ्काराः स्फुटत्वान्न विवेचिताः । सहृदयानां प्रीत्या-वश्यकं किंचित् व्याख्यातमन्यत्तु तैरेवोल्लासनीयमित्यलं पल्लवितेन ॥५२॥

[[1] जगदा० अत्रामृतलहर्याद्यधरीकरणाभिव्यञ्जकैः संजीवकत्वपरमाह्लादकत्वपरम-सौन्दर्यादिभिरनेकैर्गुणैर्युक्तात् कारणात् तद्विरुद्धगुणकस्य कम्पकार्योत्पत्तेर्वर्णनाद्विषमः । व्यति-रेकस्तु तत्र गुणः । एवमेतेषु पद्येषु सुधीभिः संभवन्तोऽन्येऽपि अलङ्कारा उन्नेयाः । सहृदय-प्रीत्या अत्यावश्यकमेव अस्माभिः किंचित् निरूपितम् ॥५२॥]

[1] तैलङ्गान्वयमङ्गलालयमहालक्ष्मीदयालालितः
श्रीमत्पेरमभट्टसूनुरनिशं विद्वल्ललाटंतपः ।
सन्तुष्टः कमताधिपस्य कवितामाकर्ण्य तद्वर्णनं
श्रीमत्पण्डितराजपण्डितजगन्नाथो व्यधासीदिदम् ॥५३॥

[[1] जगदा० तैलङ्गान्वयमङ्गलालयमहालक्ष्मीदयालालितः
श्रीमत्पेरमभट्टसूरितनयो विद्वल्ललाटंतपः
श्रीराणाकलिकर्णनन्दनजगत्सिंहप्रभोर्वर्णनं
श्रीमत्पण्डितरायसत्कविजगन्नाथो व्यतानीदिदम् ॥

इति महामहोपाध्यायपदवाक्यप्रमाणपारीणतैलङ्गकुलावतंसश्रीपेरमभट्टसूरेस्तनयेन विनिर्मितं जगदाभरणाख्यं जगत्सिंहवर्णनम् ॥]

---

(१३) अवशिष्टान्योक्तयः

(१३) अवशिष्टान्योक्तयः

अगस्त्यः

गतोऽस्मि तीरं जलधेः पिपासया
स चापि शुष्कश्चुलुकीकृतो मया ।
न लक्ष्यते दोषलवोऽपि तोयधे-
र्ममैव तत् कर्मफलं विजृम्भते ॥१॥

अगुरुः

एणाद्याः पशवः किरातपरिषत् स्नेहेऽगुणग्राहिणी
संचारोऽत्र न नागरस्य विषयोच्छिन्नं मुनीनां मनः ।
धूमेनातिसुगन्धिनात्र विपिने दिक्चक्रमामोदय-
न्नामूलं परिदह्यतेऽगुरुतरुः कस्मै किमाचक्ष्महे ॥२॥

अलिः

अपि दलन्मुकुले बकुले यया पदमधायि कदापि न हेलया ।
अहह सा सहसा विधुरे विधौ मधुकरी बदरीमनुवर्तते ॥३॥

अलिरसौ नलिनीकुलवल्लभः
कमलिनीहृदि केलिकृतादरः ।
विधिवशात् परदेशमुपागतः
कुटजपुष्परसं बहु मन्यते ॥४॥

आजन्मकल्पतरुकाननकामचारी
यत् कौतुकादुपगतः कुटजं मिलिन्दः ।
तत् कर्मणः सुसदृशं फलमेतदेव
यत् प्राप साम्यमधुना मधुमक्षिकाभिः ॥५॥

आनम्राः स्तबकभरेण पल्लविन्यः
शोभन्ते कति न लताः परागपूर्णाः ।
आमोदे मधुनि च मार्दवे च तासां
यो भेदः स खलु मधुव्रतैकवेद्यः ॥६॥

आलिङ्गसे चारुलतां लवङ्गी-
माचुम्बसे चाम्बुजिनीं क्रमेण ।
तां चूतवल्लीं मधुप प्रकामं
संताडयस्येव पदैः किमेतत् ॥७॥

कति कति न लताः कलिताः संचरता चञ्चरीकरसिकेन ।
नलिनि भवन्मधु मधुरं यत् पीतं तत् तदेव परिपीतम् ॥८॥

करी बरीभरीति चेद् दिशं सरीसरीति कां
स्थिरीचरीकरीति चेन् न चञ्चरीकरीतिकाम् ।
वरीधरीति केतकं वरीवरीति सारसं
जरीजरीति मञ्जरी निरीतिरीतिरीदृशी ॥९॥

किं केतकीपरिमलोत्थितगन्धलुब्धो
गुञ्जन् भ्रमन् भ्रमर वाञ्छसि रन्तुमेताम् ।
तत् कण्टकैः परिवृतामतुलामगम्यां
सन्त्यज्य तां व्रज निकुञ्जलतां सपुष्पाम् ॥१०॥

केतक्यः कटुकण्टकाः कुमुदिनी दोषोदयान् मोदते
जायन्ते विकलाः कलावति पुनः पङ्केरुहां पङ्क्तयः ।
अन्यानि प्रसवानि षट्पदपदन्यासैरवाञ्चि क्वचिद्
भृङ्गो भ्राम्यति कल्पवृक्ष विपदामन्तं भवन्तं विना ॥११॥

क्वचित् क्वचिदयं यातु रन्तुं प्रेमवशंवदः ।
न विस्मरति राजीवं षट्पदं मलिनं हृदि ॥१२॥

गन्धाढ्यासौ जगति विदिता केतकी स्वर्णवर्णा
पद्मभ्रान्त्या रसिकमधुपः पुष्पमध्ये पपात ।
अन्धीभूतः कुसुमरजसा कण्टकैर्भिन्नपक्षः
स्थातुं गन्तुं क्षणमपि सखे नैव शक्तो द्विरेफः ॥१३॥

गलितानि मधूनि सर्वतः
प्रविकीर्णानि दलानि मारुतैः ।
अधुनापि न हन्त माधवीं
मधुपंतामिह नावलम्बसे ॥१४॥

दृष्ट्वा हृष्टोऽभवदलिरसौ चित्रसंस्थे च पद्मे
वर्णं रूपं किमिति किमिति व्याहरन्नाजगाम ।
नास्मिन् गन्धो न च मधुकणो नास्ति तत् सौकुमार्यम्
घूर्णन् घूर्णन्नवनतमुखो व्रीडया निर्जगाम ॥१५॥

नन्दनजन्मा मधुपः सुरतरुकुसुमेषु पीतमकरन्दः ।
दैवादवनिमुपेतः कुटजसुमेष्वपि समीहते वृत्तिम् ॥१६॥

नष्टे वारिजविपिने कष्टे नष्टेऽथ मालतीनिकरे ।
तत् किं जीवति लोके मूलकमकरन्दबिन्दुना यदलिः ॥१७॥

निषीदतु शिरीषके चरतु वा कदम्बे चिरं
समुत्पततु पङ्कजे कुरवके करोतु स्थितिम् ।
दिनं नयतु कुन्दके ननु रसाल कालक्रमान्
न विस्मरति केवलं तव गुणानसौ षट्पदः ॥१८॥

निःशङ्कं गजपतिगण्डदानधारा-
माराध्यन् भ्रमर दिनान्यमून्यनैषीः ।
यावत् तु स्फुरति करालकर्णताल-
स्तावत् त्वं नवनलिनीवनीमुपेयाः ॥१९॥

नीतं जन्म नवीननीरजवने पीतं मधु स्वेच्छया
मालत्याः कुसुमेषु येन सततं केली कृता हेलया ।
तेनेयं मधुगन्धलुब्धमनसा गुञ्जालता सेव्यते
हा धिग् दैवकृतं स एव मधुपः कां कां दशां नागतः ॥२०॥

पवनापनीतसौरभपूरोदकपूरपद्मिनीलुब्धः ।
अपरीक्षितस्वपक्षो गन्ता हन्तापदं मधुपः ॥२१॥

पीतं पङ्कजकानने मधु मया नीपेऽपनीतं वयो
बन्धूके वरबन्धुता विरचिता रक्तं रसालद्रुमे ।
किञ्चाकारि कुमुद्वतीपरिकरे क्रीडाकलाकौशलं
कस्तद् वेत्तु विधीयतेऽद्य बदरीवृन्दस्य यद् वन्दनम् ॥२२॥

पुरन्दरपुरे पुरा रुचिरकानने नन्दने
निपीय मधुरं मधु प्रकटितारवो योऽभवत् ।
प्रशुष्कगलतालुको गलितमञ्जुलालापकः
स एव मधुपोऽधुना बदरिकारसं काङ्क्षति ॥२३॥

पूर्वं कल्पतरुप्रसूनमदिरास्वादेन मेदस्विनी
दीव्यद्दिव्यतरङ्गिणीकमलिनीप्रेङ्खोलिकाखेलिनी ।
दैवादद्य महीतले मधुकरी निष्पावपुष्पेच्छया
भ्राम्यन्ती कृकलासवक्त्रकुहरं हा हन्त संगाहते ॥२४॥

प्रबन्धनं पद्मवने निशायां
मातङ्गदाने मदकर्णतालः ।
स्वप्राणभङ्गः खलु चम्पकेऽस्मिन्
सर्वत्र दुःखं भ्रमरस्य लोके ॥२५॥

फलानां च दलानां च सन्तु ते ते विवेचकाः ।
मकरन्दविशेषज्ञो मिलिन्दमपहाय कः ॥२६॥

बन्धनान्यपि हि सन्ति बहूनि प्रेमरज्जुकृतबन्धनमन्यत् ।
दारुभेदनिपुणो हि षडङ्घ्रिर्निष्क्रियो भवति पङ्कजबद्धः ॥२७॥

भृङ्गपुङ्गव मरन्दनिर्झरीसद्म पद्ममपहाय साम्प्रतम् ।
जाल्म शाल्मलिमुपैषि किं वृथा शोकमाकलयितुं समीहसे ॥२८॥

भृङ्गः क्षुधालुरपि किंशुकविभ्रमेण
व्याजृम्भमाणशुकचञ्चुपुटं प्रविष्टः ।
आशां विहाय मधुनोऽवयवैः समग्रै-
र्निर्गन्तुमिच्छति परं परितप्यमानः ॥२९॥

भ्रम भ्रमर यूथासु मालतीषु चिरं मिल ।
मा पुनश्चम्पकारण्ये स्नेहपूर्णं मनः कृथाः ॥३०॥

भ्रमर मरणभीतिं मुञ्च चाम्पेयपुष्पे
विहर हर तदीयं सौरभं सौहृदेन ।
मधुकर सुकरं चेद् वस्तु हस्तेन लब्धुं
भवतु तदुपभोगेऽनिष्टमिष्टं फलं वा ॥३१॥

मधुपे मालतीपुष्पं सतृष्णं यातुमुद्यते ।
हन्त दैवादुपागम्योपात्तमारण्यकेन तत् ॥३२॥

मन्दारमेदुरमरन्दरसालसाङ्गः
स्वर्नागरीनयननन्दन एष भृङ्गः ।
दैवादुपेत्य जगतीमगतिर्विषीदञ्
छाखोटकोटरकुटीषु निलीय शेते ॥३३॥

माकन्दे मधुपानमम्बुजकुले क्रीडा कदम्बद्रुमे
दोलाखेलनकौतुकं कुवलये कः को नवो विभ्रमः ।
येनाकारि मधुव्रतेन सहसा सोऽयं मधूके मधौ
माध्वीकं परिपीय पीवरतनुर्जीवत्यहो जीवनम् ॥३४॥

यदपि भेकगणेन निषेवितं प्रकटकण्टककोटिसमन्वितम् ।
तदपि पङ्कजमेति मधुव्रतः सुरससौरभसुन्दरताश्रयम् ॥३५॥

यस्तोषं न गतः कमलेषु मल्लीचम्पकवकुलकुलेषु ।
तस्यालेर्यदि निम्बे वासः कथय कथं न भवत्युपहासः ॥३६॥

यावदेनं न जानाति पारिजातं मधुव्रतः ।
तावद् भ्रमणमेवास्य कुञ्जे कुञ्जे द्रुमे द्रुमे ॥३७॥

लतास्तास्तास्तादृङ्मधुरसवतीः पङ्कजवनीः
समालिङ्गंश्चुम्बन्नयमगमयद् भूरिसमयम् ।
इदानीं चेन् नीचे विचरति शुचेरेष लकुचे
कुचेष्टेयं धातुर्भवति न हि वाच्यो मधुकरः ॥३८॥

विकचसहकारवाटीपरिमलकेलीपरायणो मधुपः ।
अधुना हृचथ नियतिवशादर्कवने शलभसङ्कुले चरति ॥३९॥

सदम्भोजाम्भोजं परिषजति सम्भोगरहितो
गतो मन्दे कुन्दे वहति मकरन्दे न हि मनः ।
ततो मन्येऽरण्ये क्वचिदधिकपुण्येऽपि ललितां
लवङ्गीमासङ्गी भजति नवभृङ्गीपरिवृढः ॥४०॥

सानन्दमेष मकरन्दमिहारविन्दे
विन्देत षट्पदयुवेति जनैरटङ्कि ।
दैवादकाण्डपरिमुद्रितपुण्डरीक-
कोशादभूदहह निःसरणं पुमर्थः ॥४१॥

हुताशज्वालाभे स्थितवति रवावद्रिशिखरे
पिपासुर्माध्वीकं प्रविशति सरोजं मधुकरः ।
तदन्तःसंरोधं न गणयति सन्ध्यासमयजं
न चार्तः स्वापायं विमृशति फलैकान्तरसिकः ॥४२॥

अश्वः

आजानेय चरित्रं भवदीयं श्लाघनीयमत्यर्थम् ।
तव हि चतुष्पादोऽन्ये गतिमनुसर्तुं न शक्नुवन्ति यतः ॥४३॥

यावन् न मुञ्चसि तुरङ्गम दुष्टकर्म
तावन् मुहुर्भवसि नेतृजनेन दण्ड्यः ।
त्यक्त्वेदृशीं यदि गतिं सरलोऽभविष्यः
सन्तो भवन्तमपि सम्यगमानयिष्यन् ॥४४॥

अश्वत्थः

अस्ति स्वादु फलं किमत्तुमथवा घ्रातुं पुनः कोरकः
तद् विश्राम्यतु नाम भोक्तुममलं पत्रं किमस्त्यन्ततः ।
सेव्यो हन्त यदीदृशोऽपि मनुजैर्वृक्षाधमः पिप्पलो
दुःस्वातन्त्र्यमिदं विधेः कथय तत् कस्याग्रतो रुद्यताम् ॥४५॥

यन्मूले भगवान् पुरारिरमलो यत्पर्णशायी हरि-
स्तस्येहाततशाखिनो वटतरोर्नामापि न श्रूयते ।
यच्छाखानिचयः पिशाचनिलयो यन्मूलगाः पन्नगा-
स्तस्याश्वत्थतरोरहो कति नमस्काराः कति प्रार्थनाः ॥४६॥

आदिवराहो राहुश्च

इयत्येतस्मिन् वा निरवधिचमत्कृत्यतिशये
वराहो वा राहुः प्रभवति चमत्कारविषयः ।
महीमेको मग्नां यदयमवहद् दन्तमुसलैः
शिरःशेषः शत्रुं निगिरति पुनः सन्त्यजति च ॥४७॥

आदिशेषः

बहवः फणिनः सन्ति भेकभक्षणतत्पराः ।
एक एव हि शेषोऽयं भूभारवहनक्षमः ॥४८॥

आरकूटः

अयि डम्बरमारकूट धत्से
कनकस्यापि यदन्ततो निकामम् ।
निकषा निकषं हि तत् तदा चे-
दनुमन्ये सुदृशामलंक्रियात्वम् ॥४९॥

इक्षुः

कान्तोऽसि नित्यमधुरोऽसि रसाकुलोऽसि
किं चासि पञ्चशरकार्मुकमद्वितीयम् ।
इक्षो तवास्ति सकलं परमेकमूनं
यत् सेवितो भजसि नीरसतां क्रमेण ॥५०॥

उत्तमः

सुजनोऽपि हि कुप्यति भृशमनवसरज्ञेन याचितः सुहृदा ।
सुरतान्तरे रुदन्तं प्रियमपि पुत्रं शपत्यहो जननी ॥५१॥

उष्ट्रः

दासेरको रसत्येष युक्तं भारेऽधिरोहति ।
उत्तार्यमाणोऽपि पुनर्यत् तत्र किमु कुर्महे ॥५२॥

कञ्चुकः

श्रीमता कथय कञ्चुक पूर्वं कानि कानि सुकृतानि कृतानि ।
जन्म यापयसि येन समस्तं हारहृद्यहृदये हरिणाक्ष्याः ॥५३॥

कदली

काले तरोरनुपकारि फलं फलित्वा
लज्जावशादुचित एव विनाशयोगः ।
एतत् तु चित्रमुपकृत्य फलैः परेभ्यः
प्राणान् निजान् झटिति यत् कदली जहाति ॥५४॥

किं केतकी फलति किं पनसस्तु पुष्पं
किं नागवल्लिरिह पुष्पफले प्रसूते ।
कस्यापि कोऽप्यतिशयोऽस्ति स तेन सद्भिः
सम्पूज्यते कदलि यासि ततः प्रसिद्धिम् ॥५५॥

कपिः

वृक्षान्दोलनमद्य ते क्व नु गतं नर्म स्वयूथस्य वा
यूकान्वेषणरोषसौख्यबहुलाश्चेष्टा मुखोत्थाः क्व ताः ।
क्वारण्ये फलपूर्णगल्लकुहरस्यान्येषु ता भीषिकाः
भीतः सम्प्रति कौशिकाद् गलवलद्व्यालः कपे नृत्यसि ॥५६॥

वानराणां विवाहेषु तत्र गार्दभगायकाः ।
परस्परं प्रशंसन्ति अहो रूपमहो ध्वनिः ॥५७॥

कपिञ्जलः

मोघं भ्रमेण हि कपिञ्जल पोषणं ते
शक्तः परं प्रलपितुं यदि तु त्वदीयम् ।
स्थानं त्यजस्यथ न किञ्चन कर्तुमर्हो
न प्रत्ययस्त्वयि पलायनमेव युद्धे ॥५८॥

कमलादिः

अपि त्वया कैरविणि व्यधायि
मुधा सुधाबन्धुसुबन्धुभावः ।
जनापवादः परितः प्रयातः
समागमो हन्त न जातु जातः ॥५९॥

अयि मकरन्दस्यन्दिनि पद्मिनि मन्ये तवैव सुभगत्वम् ।
पुष्पवतीमपि भवतीं त्यजति न वृद्धः शुचिर्हंसः ॥६०॥

एतावत् सरसिजकुड्मलस्य कृत्यं
भित्त्वाम्भः सरसि विनिर्गमो बहिर्यत् ।
आमोदो विकसनमिन्दिरानिवास-
स्तत् सर्वं दिनकरकृत्यमामनन्ति ॥६१॥

किं कुप्यसि कस्मै वा सौरभसाराय कुप्य निजमधुने ।
यस्य कृते शतपत्र प्रतिपत्रं तेऽद्य मृग्यते भ्रमरैः ॥६२॥

किं बान्धवेन रविणा हरिणापि किं वा
लक्ष्म्यापि किं सरसिजोदरजन्मना वा ।
एकस्य शुद्धचरितस्य सरोरुहस्य
नैषा तुषारजनिता शमिता विपत्तिः ॥६३॥

खद्योतास्तरला भवन्ति भगवानस्तंगतो भानुमान्
कोकः शोकमुपैति मत्तमनसः क्रेङ्कुर्वते कौशिकाः ।
इत्थं चेत् सदसद्विवेकविधुरो धाता तदेतादृशं
न द्रष्टव्यमितीव मुद्रितवती पद्मेक्षणं पद्मिनी ॥६४॥

जनिः सरोऽङ्कादतिपङ्किनो यद्
यल् लोलुपैर्वा मधुपैर्विहारः ।
कलङ्क एवैष कुमुद्वतीनां
कलङ्किनः किं तु कलावतो न ॥६५॥

दलानि मुकुलीकृत्य प्रवेशं न ददासि चेत् ।
पद्म भृङ्गस्य का हानिः फुल्ले चूतवने स्थिते ॥६६॥

पद्मिनि किमिति क्रीडसि मधुपैर्लज्जालवोऽपि न हि किं ते ।
हर हर विस्मृत्योक्तं क्व नु लज्जा सवितृरक्तायाः ॥६७॥

मालतीमुकुला याताः कुन्दा मन्दायितास्तथा ।
पङ्कज त्वामिदं ब्रूमः कुत्र यातु मधुव्रतः ॥६८॥

लक्ष्मीसम्पर्कजातोऽयं दोषः पद्मस्य निश्चितः ।
यदेष गुणसन्दोहधाम्नि चन्द्रे पराङ्मुखः ॥६९॥

लक्ष्मीः स्वयं निवसति त्वयि लोकधात्रा
मित्रेण चापि विदितोऽस्ति दृढोऽनुरागः ।
वन्दीव गायति गुणांस्तव चञ्चरीकः
कः पुण्डरीक तव साम्यमुरीकरोति ॥७०॥

लक्ष्म्या निवास इति वारिरुहां प्रसिद्धि-
रन्वेषिताः कतिपया विरलास्तु सन्ति ।
राज्ञि प्रसारितकरे किमहं ददामि
सङ्कोचितं वदनमम्बुरुहैरितीव ॥७१॥

सम्भूतिस्तव मानसे सरसिज त्वत्सौरभैर्वासिताः
सर्वास्ताः ककुभस्तवास्ति परमो बन्धुर्विवस्वानपि ।
त्वं चेदद्य गुणानवद्य शिशिरे शीतानिलैः शीर्यसे
प्रायः प्राय इदं तदत्र परमं दृष्टाददृष्टं फलम् ॥७२॥

हे मल्लि हे मालति हे लवंगि
न तादृशी क्वापि भवादृशीनाम् ।
क्षणं समाधाय मधुव्रतं या
विस्मारयेदम्बुजिनीवियोगम् ॥७३॥

हंसाः सर्वाङ्गधवलाः पद्मेभ्यो बहिरासते ।
अन्तर्विशन्ति मधुपाः श्रीमतामीदृशी गतिः ॥७४॥

कर्णधारः

जीर्णा तरिः सरिदियं च गभीरनीरा
नक्राकुला वहति वायुरतिप्रचण्डः ।
तार्याः स्त्रियश्च शिशवश्च तथैव वृद्धाः
तत् कर्णधारभुजयोर्बलमाश्रयामः ॥७५॥

कलमाः

अस्मानवेहि कलमानलमाहतानां
येषां प्रचण्डमुसलैरवदाततैव ।
स्नेहं विमुच्य सहसा खलतां प्रयान्ति
ये स्वल्पपीडनवशान् न वयं तिलास्ते ॥७६॥

कलशः

भ्रातः काञ्चनलेपगोपितबहिस्ताम्राकृते सर्वतो
मा भैषीः कलश स्थिरो भव चिरं देवालयस्योपरि ।
ताम्रत्वं गतमेव काञ्चनमयी कीर्तिः स्थिरा तेऽधुना
नान्तस्तत्त्वविचारणप्रणयिनो लोका बहिर्बुद्धयः ॥७७॥

कल्पद्रुमः

जन्माभूदुदधौ विधौ सहजता वृन्दारकैर्वन्द्यता
तत्तत्कामफलाय शक्तिरतुला यस्यास्ति वश्यानिशम् ।

विश्रामाय चिराय कल्पलतिका भूयो यमालम्बते
कस्त्वां स्तोतुमपि क्षमोऽस्ति तदपि त्वं जल्प कल्पद्रुम ॥७८॥

न द्वारि द्विरदावली न परितो वानायुजश्रेणयः
किं वा शौक्तिकमौक्तिकैर्मृगदृशां तारा न हारावलिः ।
हे कल्पद्रुम दूरतोऽस्तु भवतः सेवाभवं वैभवं
तुष्यामि त्वयि तावतापि यदि न स्मेरा भवन्ति द्विषः ॥७९॥

न मया रचितं तवालवालं
पयसा वा विहितस्तवाभिषेकः ।
अयि कल्पतरो परोपकारे
भवतो विश्वविलक्षणः प्रकारः ॥८०॥

कलविङ्कः

गिलितगरलकण्ठः शङ्करो नीलकण्ठः
प्रबलतरविषाशी बर्हिणो नीलकण्ठः ।
अजिरतृणविसर्पत्कीटदर्पापहारिन्
कलयसि कलविङ्क त्वं च भो नीलकण्ठः ॥८१॥

कविः

कस्त्वं भोः कविरस्मि तत् किमु सखे क्षीणोऽस्यनाहारतो
धिग् देशं गुणिनोऽपि दुर्गतिरियं देशं न मामेव धिक् ।
पाकार्थी क्षुधितो यदैव विदधे पाकाय बुद्धिं तदा
विन्ध्ये नेन्धनमम्बुधौ न सलिलं नान्नं धरित्रीतले ॥८२॥

कस्तूरिका

दुर्लीलपल्लीपतिपुत्रहस्ते
कस्तूरि कस्ते वद दुर्विपाकः ।
आरभ्यसौरभ्यकथासु मौनं
मालिन्यमात्रे वचसोऽवकाशः ॥८३॥

मृगमद मा कुरु गर्वं परिमलमात्रेण तं त्वमुपयासि ।
परिमलशीतलतानिर्मलताः सुकुमारता च कर्पूरे ॥८४॥

यद्यपि दैवाल् लब्धा कस्तूरीभूमिरत्रभूरितरम् ।
नेया किमसौ तदपि हि शौचार्थं जानता पुंसा ॥८५॥

काकः

करोतु करटः शब्दं सर्वदा प्राङ्गणे वसन् ।
न शृणोति बुधः प्रीत्या शृणोति पिकभाषितम् ॥८६॥

काकस्य चञ्चुर्यदि हेमयुक्ता
माणिक्ययुक्तौ चरणौ च तस्य ।
एकैकपक्षे गजराजमुक्ता-
स्तथापि काको न स राजहंसः ॥८७॥

काकाः प्रभुप्रणिहिताः पिकपङ्क्तिवृन्दै-
र्माकन्दवृन्दमकरन्दरसान् पिबन्तु ।
प्राप्ते वसन्तसमये कथमाचरन्ति
कर्णामृतानि कलपञ्चमकूजितानि ॥८८॥

कामं सुधाकरकरामृतदिव्यरूप-
सौधाग्रपीठवसतिः सुखमस्तु काकः ।
श्रीसुन्दरीरमणसङ्गमकण्ठलग्न-
पूर्यत्सुधामणितजित् किमसौ कपोतः ॥८९॥

तत् काक त्वयि युक्ताः कटुवाग्वैवर्ण्यधूर्तताशुचिताः ।
यदि विष्ठाकृमिपृष्ठे तत्र सदोषा हि तच्चित्रम् ॥९०॥

त्रोटीपुटं करट कुड्मलयाथ तात
यावत् प्रतिव्रजति नाकमयं मरालः ।
नो चेदमङ्गलकठोररवा विहङ्गाः
सर्वे भुवीति निजसंसदि शंसिता नः ॥९१॥

बन्धं लब्धवतः परस्य वदनं भिक्षाशया पश्यतः
स्वावासच्युतिवेदनां विदधतः कान्तां विना सीदतः ।
भ्राम्यन्तः सहभार्यया प्रतिदिशं प्रत्यापगं प्रत्यगं
कीरस्याध्ययनं हसन्ति विविधक्रीडलसा वायसाः ॥९२॥

वयं काका वयं काकाः किं रुदन्तीति वायसाः ।
तिमिरारिस्तमो हन्ति शङ्कयातङ्कमानसाः ॥९३॥

काचः

अज्ञतया प्रेम्णा वा चूडामणिमाकलय्य काचमणिम् ।
नृपतिर्वहेत शिरसा तेनासौ नह्यनर्घमणिः ॥९४।

कार्पासः

नीरसान्यपि रोचन्ते कार्पासस्य फलानि मे ।
यषां गुणमयं जन्म सर्वेषां गुह्यगुप्तये ॥९५॥

कायस्थः

विप्रेभ्यः साधुदानं रिपुजनसुहृदां चोपकारान् कुरु त्वं
सौजन्यं बन्धुवर्गे निजहितमुचितं स्वामिकार्यं यथार्थम् ।
श्रोत्रे ते तथ्यमेतत् कथयति सततं लेखिनी भाग्यशालिन्
नो चेन् नष्टेऽधिकारे मम मुखसदृशं तावकास्यं भवेद्धि ॥९६॥

कार्यान्तं गतः

नौकां वै भजते तावद् यावत् पारं न गच्छति ।
उत्तीर्णे तु नदीपारे नौकया किं प्रयोजनम् ॥९७॥

कीरः

अपारः पाथोधिः पुलिनपदवी योजनशतं
निरालम्बो मार्गो वियति बत शून्या दश दिशः ।
इतीवायं कीरः कतिचन पदान्येव गगने
मुहुर्भ्राम्यन् भ्राम्यन् पतति गुणवृक्षे निपतति ॥९८॥

अमुष्मिन्नारामे तरुभिरभिरामे विटपिनः
स्फुटं नृत्यद्भृङ्गीविविधनवसंगीतकलनात् ।
परानन्दैः पूर्णा क इव तव वर्णावलिपद-
क्रमश्रोता वेत्ता द्विजवर शुक भ्राम्यसि कुतः ॥९९॥

अये कीरश्रेणीपरिवृढ वृथा वासरशतं
किमर्थं त्वं व्यर्थं क्षपयसि पलाशे रभसतः ।
यदा पुष्पारम्भे मुखमलिनिमा किंशुकतरो-
स्तदैवेदं ज्ञातं फलपरिचयो दुर्लभतरः ॥१००॥

उच्चैरेष तरुः फलं च पृथुलं दृष्ट्वा प्रहृष्टः शुकः
शालिं चास्यगतं विहाय निभृतं तन् नारिकेलं गतः ।
तत्रारुह्य बुभुक्षितेन मनसा यत्नः कृतो भेदनेऽ-
प्याशा तस्य न केवलं विगलिता चञ्चुश्च चूर्णीकृता ॥१०१॥

कीर नीरसकरीरपादपे किं स्थितोऽसि कथयामि धीरतः ।
मामकीनसहकारपादपा दुःसमीरलहरीभिराहताः ॥१०२॥

दृष्ट्वा शाखावकीर्णं फलभरनमितं भूमिभागावनद्धं
त्यक्त्वा शालिप्रकाण्डं पनसमुपगतश्चिन्तयित्वेति कीरः ।
हत्वा चञ्चुं प्रहर्षाद् विगलितपयसा सम्भृताशेषपक्षो
भिन्नश्चोड्डीय गन्तुं गगनपरिचिता या गतिः सापि नष्टा ॥१०३॥

द्राक्षां प्रदेहि मधु वा वदने निधेहि
देहे विधेहि किमु वा करलालनानि ।
जातिस्वभावचपलः पुनरेष कीर-
स्तत्रैव यास्यति कृशोदरि मुक्तबन्धः ॥१०४॥

द्विजकुलपते मेधासिन्धो सुभाषितकोविद
त्वयि गृहमुपायाते जातं बहूपकृतं मम ।
यदिह नियतं बाला वृद्धाः स्त्रियः परिचारिकाः
शुक भगवतो नाम प्रीता गृणन्ति मुहुर्मुहुः ॥१०५॥

अतिपरुषरवाणां वायसानां निवासे
फलवति पिचुमन्दे मन्दबुद्धे कथं वा ।
स्वनसि मधुरवाणीं व्यर्थयन् राजकीर
कुसुमितसहकारप्रान्तभागं विहाय ॥१०६॥

वासः काञ्चनपञ्जरे नृपकराम्भोजैस्तनोर्मार्जनं
भक्ष्यं साधु रसालदाडिमफलं पेयं सुधाभं पयः ।
पाठः संसदि रामनाम सततं धीरस्य कीरस्य मे
हा हा हन्त तथापि जन्मविटपिक्रोडे मनो धावति ॥१०७॥

शुक तव पठनं व्यसनं न गुणः स गुणाभासः ।
समजनि येनामरणं शरणं पञ्जरवासः ॥१०८॥

सुखयति कीरकिशोरवाक्प्रचारः
सुजनमनांसि नवामृतप्रसारः ।
मृदुलशकुन्तनिपीडनोग्रभालं
मदयत किं कलुषान्तरं बिडालम् ॥१०९॥

सुभाषित्वं सुरूपत्वं वाचालत्वं सुशीलता ।
एतत् कीरकिशोरस्य व्यर्थमाखुभुजः पुरः ॥ ॥११०॥

सुभाषितस्याध्ययनेऽनुषक्तं
शुकं वराकाः प्रहसन्ति काकाः ।
तमेव संसत्सु गिरं गिरन्तं
दृष्ट्वा भवन्ति त्रपया नतास्याः ॥१११॥

हे कीर कैरवसुगीरिति संकलय्य
मा मात्र संरससि सज्जनरञ्जनाय ।
बालोऽपि यत्र कलकण्ठसुकण्ठपीठः
संलेढि कोमलकुहूं कृतपूर्णकण्ठः ॥११२॥

कुस्तुम्भरी

कुस्तुम्भरी समायाति तिन्तिण्या मन्त्रिणा सह ।
पलायध्वं पलायध्वं रे रे शाकविडम्बकाः ।।११३।।

कूपः

अमुना मरुकूपेन के के नाम न वञ्चिताः ।
रुदत्पथिकनेत्राम्बुपिच्छिलप्रान्तभूमिना ।।११४।।

यद्यपि बहुगुणगम्यं जीवनमेतस्य कूपमुख्यस्य ।
जयति तथापि विवेकः सदानपात्रानुमानेन ।।११५।।

रे कूप जीवनागार यदि दातृत्वमिच्छसि ।
तदा त्वं गुणवत् पात्रमेकं वा सन्निधौ कुरु ।।११६।।

हे कूप त्वं चिरं जीव स्वल्पतोयो बहुव्ययः ।
गुणवद्रिक्तपात्राणि प्राप्नुवन्ति हि पूर्णताम् ।।११७।।

कूर्मः

पुत्रिण्यः कति नात्र सन्ति भुवनेऽभूवन् कियत्योऽथवा
सौभाग्यैकमठी तथादिकमठी स्त्रीषु प्रशंसास्पदम् ।
भग्ने भोगिनि भङ्गुरेषु करिषु भ्रष्टोत्सवे दंष्ट्रिणि
क्षोणीं साहसिकाग्रणीस्तुलयितुं जागर्ति यस्याः सुतः ।।११८।।

भ्रमति गिरिराट् पृष्ठे गर्जत्युपर्यपि सागरो
वहति विततज्वालाजालो जगन्ति विषानलः ।
स तु विनिहितग्रीवाकाण्डः कटाहकुटोदरे
स्वपिति भगवान् कूर्मो निद्राभरालसलोचनः ।।११९।।

कृष्णसारः

अयि कुरङ्गि तुरङ्गमविक्रमे
त्यज वनं जवनं गमनं कुरु ।
इह वने विचरन्ति हि नायकाः
सुरभिलोहितलोहितसायकाः ।।१२०।।

अयि कुरङ्गि तपोवनविभ्रमात्
किमु गतासि किरातपुरीमिमाम् ।
इह न पश्यसि दारय मारय
प्रस पिबेति शुकानपि जल्पतः ।।१२१।।

तृणमुखमपि न खलु त्वां त्यजन्ति हे हरिण वैरिणः शबराः ।
यशसैव जीवितमिदं त्यज योजितशृङ्गसङ्ग्रामः ॥१२२॥

नात्र व्याधशराः पतन्ति परितो नैवात्र दावानलो
नैवोच्चावचभीतिरत्र चपला नैवास्तृता वागुरा ।
इत्यालोच्य कुरङ्गकेण विहितो नक्षत्रनाथाश्रयः
को जानाति विधिर्विधास्यति पुनः स्वर्भानुदन्तव्रणम् ॥१२३॥

पाशक्षुण्णखुरस्य बाणपतनप्रव्यक्तरक्तच्छटा-
च्छन्नाङ्गस्य दवाग्निदाहविकलस्यासेदुषोऽप्याश्रमम् ।
धिग् दैवं विषमा मृगस्य दिवसाः सर्वानुकम्पामयो
मा भैषीरिति भाषणेऽपि यदभूद् वाचंयमोऽयं मुनिः ॥१२४॥

भुक्त्वा भव्यतृणानि नव्यसलिलान्यापीय वापीतलान्
निःशङ्कं परिशील्य शीतलतरून् रोमन्थमभ्यस्यति ।
या सैवाद्य मृगी मृगादनमुखप्राप्तं शिशुं शोचते
तद्वेधा बहुधा विपद्विरचने बीजानि नापेक्षते ॥१२५॥

विद्धा मृगी व्याधशिलीमुखेन
मृगस्तु तत्कातरवीक्षितेन ।
विहाय देहं विगतव्यथैका
परस्य जीवावधिराधिरासीत् ॥१२६॥

वृकस्ते मायावी चरति निकटे खञ्जवदयं
त्वमेनं विस्रम्भादनुसरसि मूढो यदि मृग ।
शयानं त्वां गूढं क्वचन समजं नेष्यति निजं
स उत्तिष्ठन् कुक्षिं सपदि कणशस्ते दलयति ॥१२७॥

सौरभ्येण त्रिभुवनमनोहारिणा काननेऽस्मिन्
सत्कस्तूरीहरिण भवता वासितो दिग्विभागः ।
तस्यैतत् ते फलमुपगतं पत्रिभिर्लुब्धकानां
विद्धः प्राणांस्त्यजसि न गुणः श्रेयसे निर्गुणेषु ॥१२८॥

केतकी

एकेन चेत् परिहृतोऽसि महेश्वरेण
किं तेन केतक विषादमुरीकरोषि ।
अन्ये न किं जगति सन्ति महागुणज्ञा
ये त्वां वहन्ति शिरसा नरदेवदेवाः ॥१२९॥

कालक्रमकमनीयक्रोडेयं केतकीति का शङ्का ।
वर्द्धियथा यथा स्यात् तथा तथा कण्टकोत्कर्षः ॥१३०॥

हे हेमकेतकि कथं बहुगर्वितासि
संसेव्यसे मधुकरैरखिलैरितीव ।
नैषा रसातिशयता नलिनीवियोगात्
तैर्वीयते विकटकण्टकशूलझम्पः ॥१३१॥

कोकिलः

अथ कोकिल कुरु मौनं जलधरसमयेऽपि पिच्छिला भूमिः ।
विकसति कुटजकदम्बे वक्तरि भेके कुतस्तवावसरः ॥१३२॥

अम्भोजप्रकरोऽथ केतककुलं कुन्दोत्करः कैरव-
व्रातो मल्लिगणोऽथ चम्पकचयो जातीसमूहोऽथवा ।
नो चेदादरमातनोति पिक ते खेदं वृथा मा कृथा
यस्मात् क्वापि कदापि कोऽपि भविता यस्त्वद्गुणान् ज्ञास्यति ॥१३३॥

अयि कोकिलपाक काकनीडे वस यावद् भवतो भवन्ति पक्षाः ।
बहवस्तदनन्तरं निवासाः परिपश्यन्ति रसाधिका रसालाः ॥१३४॥

अहंयुवरवर्णिनीजनमदापनोदव्रत-
स्फुरच्चतुरपञ्चमस्वरजितान्यपक्षिव्रजः ।
रसालतरुणा कृतामसमकुल्यतामात्मनो
विहन्तुमिह कोकिलः फलिनमन्यमुद्वीक्षते ॥१३५॥

अहोरात्रं कूजंस्त्वमिति गतशोषं किमयसे
तव भ्रातः प्राप्यं परभृतक किंचित् किसलयम् ।
परीक्षापूर्वं किं वितरति रसालः फलमयं
पिकः काकः पान्थः कपिरपि च सर्वेऽपि सदृशाः ॥१३६॥

आकलिकोदयमाशापाशादाश्रित्य कोकिलश्चूतम् ।
पाकप्रवणे तस्मिन् काकैः परितः कथं जीवेत् ॥१३७॥

आसाद्याम्रवनीमिमां प्रतिनवामास्वाद्य तन्मञ्जरी-
मेवं पञ्चममञ्च नन्दनवनभ्रान्त्या तया कोकिल ।
एषा वायसमण्डली घनशिरःशूलाहतिव्याकुला
कुध्वानैर्बधिरीकरिष्यति वृथा श्रोत्राणि सत्पत्रिणाम् ॥१३८॥

कलकण्ठ यथा शोभा सहकारे भवद्गिरः ।
खदिरे वा पलाशे वा किं तथा स्याद् विचारय ॥१३९॥

काका वृका घूकबकाश्च भेकाः
प्रणम्य युष्मानिदमेव याचे ।
कोलाहलं मा कुरुत क्षमध्वं
पुंस्कोकिलः कूजति मञ्जुरावम् ॥१४०॥

किं कोमलैः पिकरवैः पिक तिष्ठ तूष्णी-
मेते तु पामरनराः स्वरमाकलय्य ।
को वारयेत्ययमये निकटे कटूनि
रे वध्यतामिति वदन्ति गृहीतदण्डाः ॥१४१॥

तत्किं स्मरसि न भुक्तं यत् पिक रे काकमन्दिरे पूर्वम् ।
सहकारकुसुमकाले हठेन कुरुषेऽधुना रावम् ॥१४२॥

तावच् चकोरचरणायुधचक्रवाक-
पारावतादिविहगाः कलमालपन्तु ।
यावद् वसन्तरजनीघटिकावसान-
मासाद्य कोकिलयुवा न कुहूं करोति ॥१४३॥

तावन् मौनेन नीयन्ते कोकिलैश्चैव वासराः ।
यावत् सर्वजनानन्ददायिनी वाक् प्रवर्तते ॥१४४॥

ध्यायन्नञ्जनतोयबुद्बुदकणप्रायं स्वकं मस्तकं
पश्यन्नायसकूटकोटिघटितत्रोटीपुटं वायसम् ।
न स्थातुं न पलायितुं न चलितुं नोन्मीलितुं मीलितुं
नो मर्तुं न च जीवितुं प्रभवति त्रासाकुलः कोकिलः ॥१४५॥

भद्रं भद्रं कृतं मौनं कोकिलैर्जलदागमे ।
दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम् ॥१४६॥

मलिनात्मना विरागः प्रकटीकृत एव कोकिलखलेन ।
जीवनदानामुन्नतिसमये वाचंयमीभवता ॥१४७॥

येनोषितं रुचिरपल्लवमञ्जरीषु
श्रीखण्डमण्डलरसालवने सदैव ।
दैवात् स कोकिलयुवा निपपात निम्बे
तत्रापि दुष्टबलिपुष्टकुलैर्विवादः ॥१४८॥

रसाल तव माधुरीप्रथितसत्फलं पक्षिण-
श्चरन्ति नहि ते यशः प्रकटयन्ति काष्ठासु ते ।
पिकस्तु नवपल्लवग्रसनमेव कुर्वन् स्वरैः
प्रकाशयति दिक्षु ते मृदुलपञ्चमाख्यैर्यशः ॥१४९॥

रे रे कोकिल मा भज मौनं किञ्चिदुदञ्चय पञ्चमरागम् ।
नो चेत् त्वामिह को जानीते काककदम्बकपिहिते चूते ॥१५०॥

वपुर्मलिनमीदृशं तदपि पुष्टमेतत् परैः
शकुन्त बत सन्ततं शकुनिभिर्वने धावसि ।
क्व वा वद गरुत्मता मधुरमीदृशं शिक्षितं
निषिञ्चसि सुधां यतः श्रवणयोरिमं शृण्वतः ॥१५१॥

विपिने घोरतरेऽस्मिन् मा कुरु पिक पञ्चमारावम् ।
काकावलिरधुना ते कुलायमावृत्य रौति घोषेण ॥१५२॥

शृगालशशशार्दूलदूषितं दण्डकावनम् ।
पञ्चमं गायतानेन कोकिलेन प्रतिष्ठितम् ॥१५३॥

सन्त्यज्य कोकिलशिशो मधुरप्रवालं
माकन्दवृन्दमलिपोतमिलत्प्रसूनम् ।
निम्बे तु तिक्तहृदये बलिभुक्कुलाढ्ये
मौनेन तिष्ठसि यदीह वदाशु कार्यम् ॥१५४॥

सहकारे चिरं स्थित्वा सलीलं बालकोकिल ।
तं हित्वाद्यान्यवृक्षेषु विचरन् न विलज्जसे ॥१५५॥

हे कोकिलाखिललतासु फलानि सन्ति
सन्त्यज्य तानि ननु चूतलतां सपुष्पाम् ।
किं काङ्क्षसीह चरितुं फलमत्तुकामो
न ज्ञायते नृपतिसेवकभीषणोऽयम् ॥१५६॥

क्षुधितः

घोण्टा कुण्डलिनी प्रकामविषमं कान्तारमन्तर्वनं
गाहं गाहमरालकण्टकमुखच्छिन्नाङ्गकेशाम्बरः ।
कृच्छ्रादध्यगमद्धि वृक्षमधिकक्षुत्सेव्यवृक्षाशया
हन्त प्रादुरभूद् विषाकुलफलः किम्पाक एवान्तकः ॥१५७॥

खड्गमृगः

अयि वहसि ललाटे खड्ग शृङ्गं यदेकं
ननु कथमसि तस्माद्दृश्यशृङ्गेण तुल्यः ।
महिष इव चतुष्पाज् जन्तुरेवासि जात्या
परुषतमतनुस्त्वं नीचता ते क्व याति ॥१५८॥

अरे खड्ग पादा गजस्येव रूपं
लुलायेन तुल्यं ललाटेऽस्ति शृङ्गम् ।
स्थलीकूर्मतुल्यस्त्वचा क्रूरजन्तुः
कुतस्ते जनिर्नोहनीया तवैषा ॥१५९॥

खदिरसारः

विना खदिरसारेण हारेण हरिणीदृशाम् ।
नाधरे जायते रागो नानुरागः पयोधरे ॥१६०॥

गङ्गा

स किमु सहेत सुधांशुः स्मरहरभालानलज्वालाः ।
शिशिरैः शीकरनिवहैः सिञ्चति सुरनिम्नगा नो चेत् ॥१६१॥

गजः

अन्तर्वसति मार्जारी शुनी वा राजवेश्मनि ।
बहिर्बद्धोऽपि मातङ्गस्ततः किं लघुतां गतः ॥१६२॥

आपातालगभीरे मज्जति नीरे निदाघसन्तप्तः ।
न स्पृशति पल्वलाम्भः पञ्जरशेषोऽपि कुञ्जरः क्वापि ॥१६३॥

आलानबन्धनमथांकुशतीव्रपात-
माधोरणस्य चरणाहतितर्जनं च ।
कण्ठीरवो यदि सहेत मदावलानां
पूजा कुतः क्षितिभुजां सदनान्तरेषु ॥१६४॥

क्रीडाकारि तटाकवारिणि गतातङ्कं न पङ्केरुहै-
र्वल्ली काचन सल्लकीतरुगता नार्कर्षिता हर्षतः ।
नाश्लिष्टा करिणी करेण करिणा कामातुरेणामुना
दंष्ट्राभिर्विकटाननः शिव शिव व्यालोकि पञ्चाननः ॥१६५॥

गजस्य पङ्कमग्नस्य त्रपाकरमिदं महत् ।
पादमुद्धृत्य यद् गच्छन् हरिणोऽपि हसत्यसौ ॥१६६॥

जहीहि गुरुगर्जितं जहिहि शुण्डया धीङ्कृतं
परिभ्रम शनैर्वनं किमु गजेन्द्र गर्वायसे ।
यथा न किल केसरी गिरिदरीषु निद्रां त्यजन्
विमूर्च्छयति जृम्भया सुभग तावकीनं मनः ॥१६७॥

त्यक्तो विन्ध्यगिरिः पिता भगवती माता च रेवोज्झिता
त्यक्ताः स्नेहनिबद्धबन्धुरधियस्तुल्योदया दन्तिनः ।
त्वल्लोभान् ननु हस्तिनि प्रतिदिनं बन्धाय दत्तं वपु-
स्त्वं दूरे क्रियसे लुठन्ति च शिरःपीठे कठोराङ्कुशाः ॥१६८॥

न कुर्याः प्राखर्यं किमपि करिपोत प्रतिभयं
हरीणां वेलेयं यदिह बहुवेलं विहरसि ।
अकस्मादेतेषां कुटिलदृशि रोषस्पृशि मनाक्
निरर्थं भाविन्यो मदकरिदरिद्रा वनभुवः ॥१६९॥

निषेवन्तामेते वृषमहिषमेषाश्च हरिणा
गृहाणि क्षुद्राणां कतिपयतृणैरेव सुखिनः ।
गजानामास्थानं मदसलिलजम्बालितभुवां
तदेकं विन्ध्याद्रेर्विपिनमथवा भूपसदनम् ॥१७०॥

यूथान्यग्रे गतानि प्रबलबलभृतो बद्धवैरा मृगेन्द्रा
मूलादाकृष्यमाणाः सपदि तटरुहो भूरुहा निष्पतन्ति ।
दृष्ट्वा हृष्यन्ति हन्त प्रतिदिनमखिला भिल्लपल्या अधीशा
हस्तालम्बाय केषां कलयतु वदनं पङ्कमग्नः करीन्द्रः ॥१७१॥

सान्द्रामोदवतीः स्वकीयवसतीः पङ्केरुहाणां तती-
स्त्यक्त्वायं भ्रमरः करीन्द्र भवतामभ्याशमभ्यागतः ।
एतच् चेतसि सम्प्रधार्य जगतीविख्यातदानैस्तथा
युष्माभिः क्रियतां यथोपरमते हास्याय नास्यागमः ॥१७२॥

स्पर्धन्तां सुखमेव कुञ्जरतया दिक्कुञ्जरैः कुञ्जरा
ग्राम्या वा वनवासिनो मदजलप्रस्निग्धगण्डस्थलाः ।
आः कालस्य कुतूहलं शृणु सखे प्राचीनपालीमलैः
प्रायः स्निग्धकपोलपालिरधमः कालोऽपि न स्पर्धते ॥१७३॥

गर्दभः

यद्यपि का नो हानिः परकीयां चरति रासभे द्राक्षाम् ।
असमञ्जसमिति मत्वा तथापि खलु खिद्यते चेतः ॥१७४॥

रे रे रासभ वस्त्रभारवहनात् कुग्रासमश्नासि किं
राजाश्वावसथं प्रयाहि चणकाभ्यूषान् सुखं भक्षय ।
सर्वान् पुच्छवतो हया इति वदन्त्यत्राधिकारे स्थिता
राजा तैरुपदिष्टमेव मनुते सत्यं तटस्थाः परे ॥१७५॥

गन्धः

नीलोत्पलस्य मत्स्यस्य पद्मस्य कुमुदस्य च ।
एकयोनिप्रसूतानां तेषां गन्धः पृथक् पृथक् ॥१७६॥

गरुत्मान्

निजत्रोटीकोटीत्रुटितफणिराजन्यशिरसः
शकुन्तानां पत्युर्गगनतलजङ्घालगरुतः ।
दरिद्रग्रामीणस्थविरशिबिरप्रान्तपटल-
च्छदाग्रे जाग्रद्भिर्मशकशिशुभिः कः परिभवः ॥१७७॥

दामोदरमुदराहितभुवनं यो वहति लीलया गरुडः ।
कस्य तरोरुपरिष्टात् खिन्नोऽसौ श्रान्तिमपनयतु ॥१७८॥

अहिरहिरिति संभ्रमपदमितरजनः किमपि कातरो भवतु ।
विहगपतेराहारे स तु सरलमृणालदलरुचिरः ॥१७९॥

गिरिनिर्झरः

कल्लोलसञ्चलदगाधजलैरलोलैः
कल्लोलिनीपरिवृढैः किमपेयतोयैः ।
जीयात् स जर्जरतनुर्गिरिनिर्झरोऽयं
यद्विप्रुषापि तृषिता वितृषीभवन्ति ॥१८०॥

गुणग्राही

मार्जारो लभते न मञ्जुलशुकालापेन कौतूहलं
कस्तूरीहरिणस्य सौरभभरैः सिंहो न सन्तुष्यति ।
प्रीतिर्नास्ति मयूरताण्डवशतैर्व्याधस्य दुष्टैः सदा
व्याप्तायां भुवि सन्ति केऽपि विरलाः सन्तो गुणग्राहिणः ॥१८१॥

गुणदोषविवेकः

सूक्ष्मीभूय स्वयमपि परानन्दनश्चन्दनद्रु-
र्धेनुर्दत्ते रसमनुदिनं दत्तघासानुरूपम् ।
हत्वा मातृरुदयमयते हा स्वयं वृश्चिकादि-
र्भुक्त्वाप्यन्नं वमयति नृणां मक्षिका कुक्षिगापि ॥१८२॥

गुणहीननिन्दा

वीणाप्येकगुणेन राजरमणीनीरन्ध्रपीनस्तन-
द्वन्द्वे खेलति शुष्कदारुनिचया निःसारतुम्बीफला ।
चञ्चत्पार्विकशर्वरीपरिवृढप्रौढप्रभाभासुरं
मुक्ताजातमपीह निर्गुणतया योग्यं न सम्भाव्यते ॥१८३॥

गुणः

गुणैरुत्तुङ्गतां याति न तु जातिप्रभेदतः ।
क्षीरोदधिसमुत्पन्नः कालकूटः किमुत्तमः ॥१८४॥

गुणैरुत्तुङ्गतां याति किमाटोपैः प्रयोजनम् ।
विक्रीयन्ते न घण्टाभिः गावः क्षीरविवर्जिताः ॥१८५॥

गुलिविन्दः

सुवर्णसदृशं पुष्पं फलं रत्नसमं तथा ।
सम्प्राप्ते भ्रमरे पश्चाद् भ्रमाज् झणझणायते ॥१८६॥

घूकः

यद्यपि तरणेः किरणैः सकलमिदं विश्वमुज्वलं विदधे ।
तदपि न पश्यति घूकः पुराकृतं भुज्यते कर्म ॥१८७॥

चक्रवाकः

त्यज चक्रवाकि शोकं बधान धैर्यं सहस्व समयसमुम् ।
अयमेव वासरमणिर्हरिष्यते शोकमूर्छां ते ॥१८८॥

चन्दनः

कति न सन्ति महीषु महीरुहा
सुरभिपुष्परसालफलादयः ।
सुरभयन्ति न केऽपि च भूरुहा-
निति यशोऽस्ति परं तव चन्दन ॥१८९॥

कालागुरौ सुरभितातिशयेऽपि सङ्गा-
दारभ्यते सुरभितापरपादपेऽपि ।
पाटीर पाटवमिदं तव सङ्गिवातै-
स्तादात्म्यमेति कतरो न तरोः समूहः ॥१९०॥

जातः केलिकलावतीकुचतटीसौभाग्यमासादितुं
त्रैलोक्याधिपतेर्यशः कथयितुं भाले विपद्यापितुम् (?) ।
किं वाच्यं गुणगौरवस्य महिमा ख्यातोऽखिले भूतले
धिग् दैवं कलये यदत्र मलये भग्नः पटीरद्रुमः ॥१९१॥

पिष्टोऽपि दष्टोऽपि च कालसर्पै-
श्छिन्नोऽपि भिन्नोऽपि विदारितोऽपि ।
किं ब्रूम हे चन्दन सौम्यतां ते
लोकोत्तरं सौरभमेव धत्से ॥१९२॥

श्रीमच्चन्दनवृक्ष सन्ति बहवस्ते शाखिनः कानने
येषां सौरभमात्रकं निवसति प्रायेण पुष्पश्रियाम् ।
प्रत्यङ्गं सुकृतेन तेन शुचिना ख्यातः प्रसिद्धात्मना
यः सौगन्ध्यगुणस्त्वया प्रकटितः क्वासाविह प्रेक्ष्यते ॥१९३॥

आस्ते विधुः परमनिर्वृत एव मौलौ
शम्भोरिति त्रिजगतीजनचित्तवृत्तिः ।
अन्तर्निगूढनयनानलदाहदुःखं
जानाति कः परमृते बत शीतरश्मेः ॥१९४॥

इन्दुं निन्दतु नाम वाथ नलिनी निन्दन्तु चक्राह्वया
नैवानेन सुधाकरस्य सुषमाहानिर्न वा दुर्यशः ।
एतेनैव कृतार्थतास्य जनिता यन् मोदमालम्बते
यज् ज्योत्स्नासु चिरं चकोरपरिषच् चञ्चूपुटं न्यस्यति ॥१९५॥

कलास्तास्ताः सम्यग् वहसि यदसि त्वं द्विजपति-
र्द्युतिस्तादृङ नूत्ना जनिरपि च रत्नाकरकुले ।
बहु ब्रूमः किं वा पुरहरशिरोमण्डनमसि
त्वदीयं तत् सर्वं शशधर कलङ्काद् विफलितम् ॥१९६॥

किरति प्रकरं गवां प्रकर्षं सुमनःस्वच्छतरं विधौ कलानाम् ।
कति चेत् कलयन्ति यत् प्रबोधं कति चेन् नेति स तत्स्वभाव एव ॥१९७॥

चन्द्रं समाश्रयतु नाम तिथिस्त्वनेका
क्षीणस्य बिम्बपरिपूरणकारणाय ।
एवं पुनः सकलमण्डलपूर्णवर्णं
सा पूर्णिमैव खलु पूरयितुं समर्था ॥१९८॥

जन्म क्षीरनिधौ तथैव विपुलं पीयूषवर्णं वपुः
संतापार्तिहरं हरस्य शिरसि स्थानं सदा सुन्दरम् ।
तारानाथ निशामुखैकतिलक ख्यातौषधीनां पते
चन्द्र त्वां वसनाञ्चलस्य दशया संभावयामः कथम् ॥१९९॥

जन्म क्षीरमहार्णवे सहभुवः श्रीपारिजातादयो
बिम्बं यस्य सुधामयं त्रिभुवनाधीशस्य मूर्ध्नि स्थितिः ।
वृत्तिर्यस्य चराचरप्रियतमा तस्योदये केवलं
सङ्कोचः कमलस्य दुष्कृतिरसौ निन्द्यो न ताराधिपः ॥२००॥

जानन्त्येव सदा चकोरनिकरा माधुर्यलुब्धान्तरा
दुग्धाब्धीश्वरभूधरेन्द्रबलभिन्मत्तेभमान्याकृतेः ।
चन्द्रस्योत्तममाधुरीधुर(?)धरद्धारासुधारोचिषां
माधुर्यं किमु पङ्कलग्नहृदया जानन्ति भेकाधमाः ॥२०१॥

तारागणाश्चन्द्रमसं भजन्ते
न जातु नाथं नलिनाकराणाम् ।
एतावता तस्य किमस्ति हानि-
र्ज्ञाता तयोरन्तरमेष लोकः ॥२०२॥

त्वं भोः शम्भोर्निवससि शिरोदेशमाश्रित्य नित्यं
तत् त्वां याचे जगदुपकृतिव्यापृतिव्यग्रमिन्दो ।
यः सद्भावस्तव परिणतः कैरवे वा चकोरे
दृश्यस्तेन प्रतिनिशमसौ चक्रवाको वराकः ॥२०३॥

दोषाकरोऽपि कुटिलोऽपि कलङ्कितोऽपि
मित्रावसानसमये विहितोदयोऽपि ।
चन्द्रस्तथापि हरवल्लभतामुपैति
नैवाश्रितेषु गुणदोषविचारणा स्यात् ॥२०४॥

ध्माता फालतलानलैः कवलिता कण्ठस्थहालाहलै-
रालीढाथ जटाटवीविलुठितैराशीविषाणां गणैः ।
छन्ना भस्मभिराहतास्थिपटलैः क्लिन्नार्द्रचर्माम्बरैः
स्वीयां मुञ्चति माधुरीं हरशिरोरत्नं किमिन्दोः कला ॥२०५॥

नक्षत्राणि बहूनि सन्ति परितः पूर्णोदयान्यम्बरे
किं तैः शान्तिमुपैति दीर्घतिमिरं किं वाब्धिरुज्जृम्भते ।
किं स्यादार्तचकोरपारणविधिर्भ्रा तः सुधादीधिते
तन् नूनं भुवनैकतापशमनः श्लाध्यस्तवैवोदयः ॥२०६॥

नानन्दि कैरवमवर्धि न वाम्बुराशि-
रादीपि नाम्बरमहारि न वान्धकारः ।
धिग् दैवदुर्विलसितं यदसौ सुधांशु-
रभ्युद्यतश्च तमसा कवलीकृतश्च ॥२०७॥

निशाचरोऽपि दीनोऽपि सकलङ्कोऽपि चन्द्रमाः ।
चकोरीनयनद्वन्द्वमानन्दयति सर्वदा ॥२०८॥

निष्पीडितो यद्यपि दैवयोगान्
निशाकरश्चापि विधुन्तुदेन ।
तथापि पीयूषविशेषवर्षी
सुधाकरः कैरवकाननेषु ॥२०९॥

पूर्णः पङ्कजलोचनामुखतुलामायासि कालक्रमात्
क्षीणोऽपि क्षणदापते पशुपतेरायासि भूषास्पदम् ।
एतस्मिन्नथ सैंहिकेयकवलक्लेशे मनाग्वर्तिनि
त्वं साधारणवत् सुधाकर मुधा हा हन्त किं ताम्यसि ॥२१०॥

प्रकुर्वता सङ्गतिमिन्दुनाधुना
किं किं च लब्धं जगदीश्वरेण वै ।
कलङ्कहानिः सुरसिन्धुसङ्गमः
कलाक्षयित्वं च पदं तथोच्चकैः ॥२११॥

यद् वाञ्छन्ति चकोरकाः प्रतिदिनं ध्यायन्ति यत् कोरकाः
कासारेषु कुमुद्वतीवनभुवो नन्दन्ति यस्मिन् दृशः ।
सम्प्राप्तं रजनीमुखं सुखयितुं तच् छारदं सर्वथा
तस्मिन् पार्वणशर्वरीश भवता सम्प्राप्यतां सद्यशः ॥२१२॥

प्रोषितवति रजनिकरे बन्धुतया न खलु कैरवाण्येव ।
म्लायन्ति किन्तु सहसा भुवनान्यपि तमसि मज्जन्ति ॥२१३॥

भीतो वाडववासतो जलनिधौ शम्भोः शिरः स्वीकृतं
तत्र त्र्यम्बकमौलिवासुकिविषज्वालावलीत्रासितः ।
तस्माल् लोकमगादिमं निपतितस्तत्रैव राहोर्मुखे
प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः ॥२१४॥

मारस्य मित्रमसि किं च सुधामयूख
शम्भावपि प्रणयितां प्रकटीकरोषि ।
विश्वासपात्रमसि यद् द्विषतोस्तयोर-
प्येतत्तव प्रकृतिशुद्धतनोश्चरित्रम् ॥२१५॥

यस्योदयेनैव दिशां प्रसाद-
स्तापापनोदोऽपि जगत्त्रयस्य ।
चकोरचञ्चूपुटपारणे तु
चन्द्रस्य तस्यास्ति कियान् प्रयासः ॥२१६॥

यातेयं भवता सहैव रजनी भावी विकासो दिशां
सूर्येणापि चिरं चकोरनिचयैः स्थेयं क्वचित् कानने ।
उद्यद्दारुणचण्डभानुकिरणज्वाले जगन्मण्डले
कस्मै चन्द्र समर्प्य कैरवकुलं व्योमान्तमालम्बसे ॥२१७॥

राजानः कति वा न सन्ति जगति ख्याता निजाभ्याशगान्
ये पुष्णन्ति बलीयसः परिचितांश्चित्रं न मन्यामहे ।
राजा राजति केवलं हिमकरः पुष्णाति दूरस्थितान्
ज्योत्स्नाभिर्ग्लपितान् दिनेशमहसा योऽसौ चकोरानिमान् ॥२१८॥

वक्रोऽस्तु बाल्ये तदनु प्रवृद्धः
कलङ्कवानस्तु जडोऽस्तु चन्द्रः ।
महेशमौलौ च पदं दधातु
जायेत वन्द्यो विविधोपकारात् ॥२१९॥

विमलमना(?)विधुमाश्रिताश्चकोरा विदितसुधांशुकरामृतप्रसाराः ।
उदयति भूतशादशीकराणां शशिकररुक् मदभेदि(?) सूकराणाम् ॥२२०॥

शङ्करशिरसि निवेशितपदेति मा गर्वमुद्वहेन्दुकले ।
फलमेतस्य भविष्यति तव चण्डीचरणरेणुमृजा ॥२२१॥

श्रीमाहेश्वरमौलिमण्डनमणिर्वैश्वम्भरं लोचनं
त्वं रत्नाकरसम्भवः किमपरं भूदेवदेवो भवान् ।
यद् भालानलसङ्गदोषरभसाद् दन्दह्यसे नोग्रजाज्
जातं तत् किमिहास्ति ते सुमनसश्चित्रं कलानां निधे ॥२२२॥

सन्दूषितोऽसि पूर्णेन्दो चक्रवाकैर्मदोत्कटैः ।
किं चकोरास्त्वदायत्ता न सन्ति पृथिवीतले ॥२२३॥

हिमकर परभागं भूषयिष्यन् सुमेरो-
र्व्रजसि यदि तदाहं न क्षमः सन्निरोद्धुम् ।
इति तु बहुविधाभिः काकुभिः प्रार्थये त्वां
पुनरपि कुमुदानामेत्य हार्यो विषादः ॥२२४॥

चम्पकः

उद्यानपाल कलशाम्बुनिषेचनाना-
मेतस्य चम्पकतरोरयमेव कालः ।
अस्मिन् निदाघनिहते घनवारिणा वा
संवर्धिते तव वृथोभयथोपयोगः ॥२२५॥

कोपं चम्पक मुञ्च याचकजनैरायासितस्त्वं सखे
मा म्लासीः परितो विलोकय तरुः कस्तेऽधिरूढस्तुलाम् ।
कोपश्चेन् नियतस्तवास्ति हृदये धात्रे तदा कुप्यतां
येन त्वं हि सुवर्णवर्णकुसुमामोदोऽद्वितीयः कृतः ॥२२६॥

यद्यपि खदिरारण्ये गुप्तो वास्ते हि चम्पको वृक्षः ।
तदपि च परिमलमतुलं दिशि दिशि कथयेत् समीरणस्तस्य ॥२२७॥

यन् नादृतस्त्वमलिना मलिनाशयेन
किं तेन चम्पक विषादमुरीकरोषि ।
विश्वाभिरामनवनीरदनीलवेषाः
केशाः कुशेशयदृशां कुशलीभवन्तु ॥२२८॥

रूपसौरभसमृद्धिसमेतं चम्पकं प्रति ययुर्न मिलिन्दाः ।
कामिनस्तु जगृहुस्तमशेषा ग्राहका हि गुणिनां कति न स्युः ॥२२९॥

सकलगुणनिधानं मां विहाय द्विरेफाः
परिमलपरिहीनं हन्त चुम्बन्ति धूर्तम् ।
इति मनसि विषादं मा कृथाः चम्पकोच्चै-
र्हि मधुपसमाजे को विवेकावकाशः ॥२३०॥

सन्त्येकेऽपि महीरुहाः प्रतिदिनं संसक्तमत्तालयः
तत्तादृग्गुणिनो लवङ्गलवलीमाकन्दकुन्दादयः ।
आशास्यं जनुरस्य चम्पकतरोर्यत् कोरकान्तर्दलं
स्वैरङ्गैरुपमाय राजरमणी सासूयमालोकते ।।२३१।।

चातकः

आकस्मिककणैः प्राणान् धारयत्येव चातकः ।
प्रार्थनाभङ्गभीतोऽसौ शक्रादपि न याचते ।।२३२।।

आत्मन्यथाम्भोनिधिरेतु शोषं
ब्रह्माण्डमासिञ्चतु वा तरङ्गैः ।
नास्ति क्षतिर्नोपचितिः कदापि
पयोदवृत्तेः खलु चातकस्य ।।२३३।।

ऊर्ध्वीकृतग्रीवमहो मुधैव
किं याचसे चातकपोत मेघम् ।
अत्यूर्जितं गर्जितमात्रमस्मि-
न्नम्भोधरे बिन्दुलवस्तु दूरे ।।२३४।।

के वा न सन्ति भुवि वारिवहावतंसा
हंसावलीवलयिनो जलसन्निवेशाः ।
किं चातकः फलमवेक्ष्य सुवज्रपातां
पौरन्दरीं कलयते नववारिधाराम् ।।२३५।।

के वामी प्रभवन्ति चातकतृषां विच्छेदसम्प्रत्यये
प्रागल्भ्यं दधते न वाम्बु हरितां सन्तापशान्तावपि ।
प्रक्षीणास्तरणित्विषोऽपि न तिरोधातुं समर्थाः पुनः
क्षुद्रा धिक् चलयन्ति केवलमपां राशेः पयस्तोयदाः ।।२३६।।

चातक धावसि किं घनबुद्धचा
करिणमुदीक्ष्य भ्रमयातः ।
नहि दास्यति स त्वत्सदृशानां
गजपतिदानं मधुपकुलेभ्यः ।।२३७।।

चातकेन तृषितेन यदम्भो-
बिन्दुमात्रममलं परिलब्धम् ।
दैवतस्तदपि वातनिपाता-
दन्यतः पतितमास्यमपास्य ।।२३८।।

पिपासाक्षामकण्ठेन याचितं चाम्बु पक्षिणा ।
नवमेघोज्झिता चास्य धारा निपतिता मुखे ॥२३९॥

भ्रातश्चातक नीत एव सरसः कालस्त्वया चेत् सुखं
स्वल्पान्येव दिनानि सन्ति विपदो मानच्युतिं मा कृथाः ।
भूयः कातरनेत्रपालि सरसः पाथः किमुद्वीक्षसे
लाभश्चञ्चुपुटोदकं तु भवतो दीर्घं कुले दुर्यशः ॥२४०॥

यद्यपि चातकपक्षी क्षपयति जलधरमकालवेलायाम् ।
तदपि न कुप्यति जलदो गतिरिह नान्या यतस्तस्य ॥२४१॥

वापी स्वल्पजला सरो विषमयं नीचावगाहो ह्रदः
स्वच्छस्वादुसुशीतला त्रिपथगा वैकुण्ठपादाग्रजा ।
नीचः क्षारतरो महाञ्जलनिधिर्गण्डूषमात्रं मुने-
स्तन् मानी खलु चातको जलमुचामुच्चैः पयो वाञ्छति ॥२४२॥

वृथा मुदा धावसि चातक त्वं
नायं घनः किन्तु करी मदान्धः ।
न त्वादृशेभ्यो विदधाति दानं
मातङ्गदानं मधुपेभ्य एव ॥२४३॥

शक्यते येन केनापि जीवनेनापि जीवितुम् ।
किन्तु कौलव्रतोद्भङ्गप्रसङ्गः परिदुःसहः ॥२४४॥

चित्रम्

कुसुमानि लिखन्तु नाम चित्रे
कतिचित् कालविशेषरूढशिक्षाः ।
सुरभित्वममूनि किं लभन्ते
कथमेतेषु रसं पिबन्ति भृङ्गाः ॥२४५॥

चूतः

अधिश्रीरुद्याने त्वमसि भवतः पल्लवचयो
धुरीणः कल्याणे तव जगति शाखा श्रमहरा ।
मुदे पुष्पोल्लेखः फलमपि च तुष्टयै तनुभृतां
रसाल त्वां तस्माच् छ्रयति शतशः कोकिलकुलम् ॥२४६॥

अरविन्देषु कुन्देषु रमितं कालयोगतः ।
अये माकन्द जानीहि तवैवायं मधुव्रतः ॥२४७॥

यद्यपि दिशि दिशि तरवः परिमलबहुलाश्च पारिजाताद्याः ।
तदपि रसालस्त्वेकः कोकिलहृदये सदा वसति ॥२४८॥

आकर्ण्याम्रफलस्तुतिं जलमभूत् तन् नारिकेलान्तरं
प्रायः कण्टकितस्तथैव पनसः जातं द्विधोर्वारुकम् ।
आस्तेऽधोमुखमेव कादलफलं द्राक्षाफलं क्षुद्रतां
श्यामत्वं बत जाम्बवं गतमहो मात्सर्यदोषादिह ॥२४९॥

आस्तां गाढतरानुशीलनविधिः संस्पर्शनं दूरतः
सम्भाषाविषयीकृतो न न मनागक्ष्णोः पदं प्रापितः ।
किं ब्रूमः सहकार तावकगुणानस्मादृशैर्दुर्लभान्
सौरभ्येण यदध्वगान् मुहुरहो प्रीणासि दूरादपि ॥२५०॥

आम्र यद्यपि गता दिवसास्ते
पुष्पसौरभफलप्रचुरा ये ।
हन्त सम्प्रति तथापि जनानां
छाययैव दलयस्यतितापम् ॥२५१॥

आयान्ति निर्यान्ति न वा कियन्तो
द्विजाः समादाय फलं दलं च ।
त्वय्येव पुंस्कोकिलकूजितानि
परोपकारप्रथिते रसाल ॥२५२॥

उत्फुल्लरम्य सहकार रसाल बन्धो
कूजत्पिकावलिनिवास तथा विधेहि ।
गुञ्जद्भ्रमद्भ्रमरकस्त्वयि बद्धतृष्णो
नान्यान् प्रयाति पिचुमन्दकरीरवृक्षान् ॥२५३॥

उन्मीलद्रसबिन्दुगन्धकुसुमावल्यो वसन्तोदये
कान्ताः कोमलपल्लवाः कति कति क्रीडावने सन्ति नो ।
सौभाग्यैकनिधे रसाल तदपि श्रीमञ्जरीशालिन-
स्त्वत्तोऽन्यत्र च कुत्रचिन् मधुकरश्रेणी न विश्राम्यति ॥२५४॥

कति कति न वसन्ते वल्लयः शाखिनो वा
किसलयसुमनोभिः शोभमाना बभूवुः ।
तदपि युवजनानां प्रीतये केवलोऽभू-
दभिनवकलिकालीभारशाली रसालः ॥२५५॥

कुन्देऽरविन्दे कुमुदे कदम्बे
यथाकथंचित् समयं नयन्ति ।
प्राप्ते वसन्ते पुनरुत्तरङ्गाः
रसाल जानीहि तवैव भृङ्गाः ॥२५६॥

गर्वं मा कुरु शर्करे तव गुणान् जानन्ति राज्ञां गृहे
ये दीना धनवर्जिताश्च कृपणाः स्वप्नेऽपि पश्यन्ति नो ।
आम्रोऽहं मधुकूपकैर्मम फलैस्तृप्ता हि सर्वे जनाः
हे रण्डे तव किं गुणा मम फलैस्तुल्यं न किंचित्फलम् ॥२५७॥

चिरश्रान्तो दूरादहमुपगतो हन्त मलयात्
तदेकं त्वद्गेहे तरुणि परिणेष्यामि दिवसम् ।
समीरेणोक्तैवं नवकुसुमिता चूतलतिका
धुनाना मूर्धानं नहि नहि नहीत्येव वदति ॥२५८॥

छाया रम्या नु शाकं फलमपि रसवत् सद्द्विजानां निवासः
सन्तप्तानां च तापं शमयति निखिलं सर्वदायं रसालः ।
तस्मिन्नुन्मत्तकीशः प्रसभमुपगतान् भर्त्सयत्यग्रतोऽतः
सोऽप्येकस्तत्र नो चेदयमपि च समः कल्पवृक्षेण नूनम् ॥२५९॥

त्रपाश्यामा जम्बूर्दलितहृदयं दाडिमफलं
सशूलं संधत्ते हृदयमभिमानेन पनसः ।
भयादन्तस्तोयं तरुशिखरजं लाङ्गलिफलं
समुद्भूते चूते जगति फलराजे प्रसरति ॥२६०॥

त्वं सामान्यतरुभ्रमेण सकलक्षोणीरुहक्ष्मापतौ
माकन्देऽपि किरात पातय मुधा मास्मिन्कुठारं हठात् ।
एष श्लाघ्यजनस्य जीवितमलिव्यूहस्य बन्धुर्मधोः
सर्वस्वं मकरध्वजस्य विजयामात्यः पिकानां गुरुः ॥२६१॥

दिङ्मण्डलं परिमलैः सुरभीकरोषि
सौन्दर्यमावहसि लोचनलोभनीयम् ।
हंहो रसाल फलवर्य तथापि दूये
यद् ग्रन्थिलं च कठिनं हृदयं बिभर्षि ॥२६२॥

फलितस्य रसालशाखिनः
फलदानव्यसनैकशिल्पिनः ।
विनिपात्य ददातु कः फलं
श्रमसुप्ताध्वगपाणिपल्लवे ॥२६३॥

भूरिशोऽपि च वसन्ति कानने शाखिनः फलविशेषशालिनः ।
कोकिलस्य तदपीह मानसं नो रसालमपहाय तुष्यति ॥२६४॥

भो भोश्चूत चिरादयं मधुकरो विस्मृत्य वृत्तिं निजां
काचत्काञ्चनशुद्धबुद्धिरभवद् येन त्वया पोषितः ।
तस्मिंस्त्वय्यधुना मुधा विधिवशाद् विच्छेदिते सोऽप्यलिः
कान्तारे प्रतिपादपं वद कथं कुक्षिम्भरः सञ्चरेत् ॥२६५॥

यदेकस्मिन् वर्षे न फलति रसालस्तरुरयं
पिकः किं काकेष्टं फलितमपि निम्बं व्रजति वा ।
व्रजन् म्लानिं ग्लानिं न वदति च कस्यापि पुरतः
स्मरन् वारंवारं पुनरपि रसालं मृगयते ॥२६६॥

यद्यध्वनीन चिरमध्वनि घर्मखिन्नः
कासारतीररुहमाश्रय नम्रमाम्रम् ।
छायां न केवलमितः श्रमिता लभन्ते
कामं पचेलिमफलं विमलं जलं च ॥२६७॥

येऽमी आमुकुलोद्गमात् प्रतिदिनं त्वामाश्रिताः षट्पदाः
ते भ्राम्यन्ति फलाद् बहिः कथमहो दृष्ट्वा न सम्भाषसे ।
ये कीटास्तव दृक्पथं न च गतास्ते त्वत्फलाभ्यन्तरे
धिक् त्वां चूततरो परापरपरिज्ञानानभिज्ञो भवान् ॥२६८॥

रे रे रसाल तरुसार वचो विधेहि
वासन्तिकीं स्वफलपल्लवपुष्पलक्ष्मीम् ।
तावद् विकस्वर पिकद्विजसात् कुरु द्राङ्
न व्यग्रितोऽसि कलभैः शलभैश्च यावत् ॥२६९॥

वेत्ता कोकिल एव ज्ञाता च रसाल एव नियतमिदम् ।
यः पञ्चममुद्गायति यस्यास्थिषु पुलकमुकुलानि ॥२७०॥

शान्ता घर्मकणाः श्रमः शिथिलितस्तीर्णस्तृषामुद्गमो
वारंवारमुदारकोकिलरवैरानन्दितं मानसम् ।
सर्वं प्राप्तमभीप्सितं तव तले चूत प्रसन्नद्विज-
श्रेणीगुञ्जित रञ्जिताखिलमनो यामो वयं स्वस्ति ते ॥२७१॥

सौरभ्यगर्भमकरन्दकरम्बितानि
पङ्केरुहाण्यपि विहाय समागतस्त्वाम् ।
संसारसार सहकार तथा विधेहि
येनोपहासविषयो न भवेद् द्विरेफः ॥२७२॥

छागः

साधुत्वमपि दोषाय च्छाग लोकातिशायि यत् ।
अत एव हि सर्वेषां हिंसनीयोऽसि देहिनाम् ॥२७३॥

छाया

याते यातमथ स्थिते स्थितमुपर्यालोकिते लोकितं
यद् यद् राजशुकोऽयमाकलयते शुद्धान्तमध्यस्थितः ।

तत् सर्वं मणिभित्तिमेत्य भवता छायाशुकाङ्गीकृतं
तस्मिन् कर्णसुखं वितन्वति गिरस्तूष्णीं त्वया स्थीयते ॥२७४॥

जन्मान्तरपापफलम्

मर्यादानिलयो महोदधिरयं रत्नाकरो निश्चितः
सर्वाशापरिपूरकोऽनुगमितः सम्पत्तिहेतोर्मया ।
शम्बूकोऽपि न लभ्यते किमपरं रत्नं महार्घं परं
दोषोऽयं न महोदधेः फलमिदं जन्मान्तरीयं मम ॥२७५॥

जम्बीरः

कान्तिस्ते कनकाचलप्रतिनिधिः कान्ताकुचस्पर्धि ते
सौभाग्यं क्षितिपालदर्शनविधौ त्वत्पूर्वकं दर्शनम् ।
सौरभ्यं सकलातिशायि भवतो जम्बीर किं ब्रूमहे
कर्पूरप्रतिकूलता यदि न ते त्वय्येव सर्वे गुणाः ॥२७६॥

जलबिन्दुः

हे नीरबिन्दुक सरोजदलाश्रयेण
मुग्धान् विलोभयसि मौक्तिकडम्बरश्रीः ।
आदाय पाणिषु परीक्षितुमक्षमस्त्वं
मुक्ताफलैः किमिति मत्सरमातनोषि ॥२७७॥

जोरीगः

उल्लीवनसमूहेषु जोरीगः कोकिलायते ।
सालीजाण्ड्रसभामध्ये शातानिः पण्डितायते ॥२७८॥

ज्येष्ठादेवी

ज्येष्ठादेवि नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः ।
इतः परं श्रीभगिनि न मां पश्य कदाचन ॥२७९॥

झञ्झावातः

जातं प्राभवमद्य ते विधिवशात् किञ्चित् तदप्यन्ततो
झञ्झामारुत मासमात्रमथवा मासद्वयं स्थास्यसि ।
एतस्मिन् वनवाटिकाः कति कति व्यर्थं त्वयोत्पाटिता
हा वाप्यः कति शोषिताः कति दिशो धूलीभिरुद्धूलिताः ॥२८०॥

टिट्टिभः

कृत्वोत्तानं चरणयुगलं डीयसे टिट्टिभ त्वं
जात्वाकाशस्त्वदुपरि पतेदित्यनर्थभ्रमेण ।

यद्याकाशो ननु गुरुतया पातयोग्यो यथार्थं
चूर्णीभूतः परमवयवैः किं भवेस्त्वं तदानीम् ॥२८१॥

तटाकः

उद्दामाम्बुदवर्धमानशिखिनीकेकातिरेकाकुले
सम्प्राप्यं सलिलं स्थलेष्वपि सदा निस्तर्षवर्षागमे ।
भीष्मग्रीष्मभटे परस्परभयादालोकमानं मुहु-
र्दीनं मीनकुलं न पालयसि चेत् कासार का सारता ॥२८२॥

विहगैर्गतं मधुकरैश्चलितं
प्रकरैः प्रयातमपि पद्मदृशाम् ।
विभवे गते सकलमेव गतं
ध्रुवमेकमञ्चति यशः सरसः ॥२८३॥

सोपानानि तिरोहितानि पदवी छन्ना तृणैर्नूतनैः
कालुष्यं पयसां विलोक्य शनकैरुड्डीय हंसा गताः ।
माधुर्यं न मधुव्रतोदितगिरां पद्मानि भग्नानि के
भेकानामिह गर्जितं परमहो वृद्धचैव नष्टं सरः ॥२८४॥

तमालः

पास्यन्ति कस्य कुसुमे मधुपा मधूनि
स्थास्यन्ति कस्य शिखरेषु विहङ्गमालाः ।
इत्येव शोचति परं परितो विसारि
दावाग्निमग्नवपुरेष तरुस्तमालः ॥२८५॥

ताम्रपर्णी

मलयस्य गिरेरपत्यमादौ तदनु भ्रातृमती पटीरवृक्षैः ।
किमु चित्रमपां निधेः कलत्रं तटिनी काचन मौक्तिकानि सूते ॥२८६॥

ताम्बूलम्

किं वीरुधो भुवि न सन्ति सहस्रशोऽन्या
यासां दलानि न परोपकृतिं भजन्ते ।
एकैव वल्लिषु विराजति नागवल्ली
या नागरीवदनचन्द्रमलङ्करोति ॥२८७॥

ताराः

असन्निधाने हे ताराः प्रकाशध्वेऽर्कसोमयोः ।
तत्प्रकाशसमीपे तु न दृश्यध्वे कदाचन ॥२८८॥

तारा हिमांशोर्यदसन्निधाने
विभाथ यूयं परिपूर्णशोभाः ।
तत्सन्निधाने न तथा कथं नु
पतिव्रता इत्युररीक्रियध्वे ॥२८९॥

तालवृक्षः

अये ताल व्रीडां व्रज गुरुतया भाति न भवान्
फलं न च्छाया नो कठिनपरिवारो हि भवतः ।
इयं धन्या धन्या सरलकदली सुन्दरदला
परात्मानं मन्ये सुखयति फलेनामृतवता ॥२९०॥

जगत्प्राणे प्रौढे निकटमुपयाते सति हठाद्
विनम्रा आम्राद्याः शुकपिकवचश्चाटुपटवः ।
सुराभाण्डं कण्ठे वहति ननते तालहतके
सुदुर्वृत्ते तस्मिन् क्षतिरिह पुनः का च महताम् ॥२९१॥

तुम्बी

एके तुम्बा व्रतिकरगताः पात्रतामानयन्ति
गायन्त्यन्ये सरसमधुरं शुद्धवंशे विलग्नाः ।
एके तावद् ग्रथितसगुणा दुस्तरं तारयन्ति
तेषां मध्ये ज्वलितहृदया रक्तमेके पिबन्ति ॥२९२॥

तुला

गुरुषु मिलितेषु शिरसा प्रणमसि लघुषून्नता समेषु समा ।
उचितज्ञाऽसि तुले किं तुलयसि गुञ्जाफलैः कनकम् ॥२९३॥

दमनः

वद प्रादुर्भावावधि परिमलावस्थितदृशा
जगत्यां विख्याता दमन कमनीयास्तव गुणाः ।
तथाप्यस्मिन् भृङ्गे मधुरसपिपासापरवशे
दृढप्रेमाबद्धे कथय कथमौदास्यमकरोः ॥२९४॥

दाडिमः

मयि जीवति बीजाढ्ये किमन्ये बीजपूरकाः ।
इति सञ्चिन्त्य मनसा विदद्रे दाडिमीफलम् ॥२९५॥

दाता

एकः कर्णमहीपतिः प्रतिदिनं लक्षाधिका याचकाः
कस्मै किं वितरिष्यतीति मनसा चिन्तां वृथा मा कृथाः ।
आस्ते किं प्रतियाचकं सुरतरुः प्रत्यम्बुजं किं रविः
चन्द्रः किं प्रतिकैरवं प्रतिलतागुल्मं किमम्भोधरः ॥२९६॥

दारिद्र्यम्

दारिद्र्य शोचामि भवन्तमेव-
मस्मच्छरीरे सुहृदित्युषित्वा ।
विपन्नदेहे मयि मन्दभाग्ये
ममेति चिन्ता क्व गमिष्यसि त्वम् ॥२९७॥

गतास्ते दिवसा यत्र ह्यवज्ञा कल्पशाखिनाम् ।
औदुम्बरफलेभ्योऽपि स्पृहयामोऽद्य जीवितुम् ॥२९८॥

दीपः

न मणेरितोऽधिका भा नो मृदुता न प्रकाशसमता वा ।
अचिरस्थितिरिति दीपो नहि बहुमूल्योऽभवत् प्रायः ॥२९९॥

प्रदीप किमु कुप्यसि प्रलयमारुतप्रज्वलत्-
प्रभापटलपाटलप्रकटपावकव्यक्तये ।
त्वमङ्ग किमु कामिनीकुचतटीपटीपल्लव-
प्रकम्पनपरिस्फुरत्पवनलेशपारङ्गतः ॥३००॥

बहिरतिनिर्मलरूपं वहतस्ते दीप दैवतो जगति ।
अवगतमचिरादान्तरमौज्ज्वल्यं कज्जलद्वारा ॥३०१॥

यां कान्ति वहसि परां प्रदीप भद्र ।
स्वीयासाविति हृदि मा स्म मन्यथा(?)स्त्वम् ।
सस्नेहे त्वयि निशि भानुनाहितासौ
नैवं चेदहनि सति क्व वा गता सा ॥३०२॥

रे रे दीप तिरस्कृताखिलतमस्तोमारिवर्गस्य ते
रात्रौ गूढनिजाङ्गपातिशलभाघातेन किं पौरुषम् ।
तत् कर्माचर येन तावकयशो भूयात् प्रभाते पुनः
न स्नेहो न च सा दशा नहि परं ज्योतिः परं स्थास्यति ॥३०३॥

दुर्जनः

कस्तूरिकां तृणभुजामटवीचराणां
विन्यस्य नाभिषु वधाय वृथा चकार ।

मूढो विधिः स किल दुर्जनलोलजिह्वा-
मूलेषु निक्षिपति चेत् सकलोपकारः ॥३०४॥

खलः करोति दौरात्म्यं मलः पतति साधुषु ।
रावणेन हृता सीता बन्धनं तु महोदधेः ॥३०५॥

दुर्वृत्तसङ्गतिरनर्थपरम्पराया
हेतुः सतां भवति किं वचनीयमत्र ।
लङ्केश्वरो हरति दाशरथेः कलत्रं
प्राप्नोति बन्धमथ दक्षिणसिन्धुराजः ॥३०६॥

दुर्लभगुणाः

कवित्वे वादित्वं कनककुसुमे सौरभगुणो
धनित्वे दातृत्वं विषतरुफले स्वादुरसता ।
कुलीने सौजन्यं कुवलयदले रागरचना
नरेन्द्रे विद्वत्ता परभृतमुखे मानुषवचः ॥३०७॥

देशविशेषः

छेद्यं चन्दनचूतचम्पकवनं रक्षा च शाखोटके
हिंसा हंसमयूरकोकिलगणे काके च बह्वादरः ।
मातङ्गे तुरगे खरे च समता कर्पूरकार्पासयो-
रेषा यत्र विचारणा गुणगणे देशाय तस्मै नमः ॥३०८॥

द्राक्षा

यद्यपि न भवति हानिः परकीयां चरति रासभे द्राक्षाम् ।
असमञ्जसमिति मत्वा तथापि खलु खिद्यते चेतः ॥३०९॥

धनम्

सतां धनं साधुभिरेव भुज्यते
दुरात्मभिर्दुश्चरितात्मनां धनम् ।
शुकादयश्चूतफलानि भुञ्जते
भवन्ति निम्बानि च काकभोजनम् ॥३१०॥

धुत्तूरः

धुत्तूर कण्टकफलप्रतिरोधबुद्ध्या
वैरं वृथैव कुरुषे पनसेन सार्धम् ।
सन्तो हसन्ति न भजन्ति च चेतसा त्वां
भ्रान्ता भवन्ति पुरुषास्तव सेवनेन ॥३११॥

धुत्तूर धूर्त तरुणेन्दुनिवासयोग्य-
स्थाने पिशाचपतिना विनिवेशितोऽसि ।
किं कैरवाणि विकसन्ति तमः प्रयाति
चन्द्रोपलः स्रवति वार्धिरुपैति वृद्धिम् ॥३१२॥

माधुर्यसाराधरितामृतस्य
तत् कण्टकित्वं पनसस्य सह्यम् ।
उन्मादिनो मातुलपुत्रकस्य
कथं सहामो वत कण्टकित्वम् ॥३१३॥

रे रे धुत्तूर भित्तेः परिमृदितमृदः क्वापि कोणे जनित्वा
प्राप्याभिख्यां तदाख्यां कनकमिति पुनः काञ्चनस्यापि लोके ।
मन्दं मन्दं स्मरारेर्मणिमुकुटतटे तत्र लब्धावकाशं
नो जानीषे क्लेशं स्मरसि न च पुनः पूर्ववृत्तान्तलेशम् ॥३१४॥

नगरम्

इह नगरे प्रतिरथ्यं भुजङ्गसंरुद्धसञ्चारे ।
प्रियसखि मम मतमेतन् नकुलप्रतिपालनं श्रेयः ॥३१५॥

नदी

गङ्गाप्रवाह गिरिशैकशिरःस्थितस्य
युक्तं तवार्णवमुपैतुमनिह्नवेन ।
यत् त्वं पथि स्पृशसि भूरिनदान्तराणि
तत् ते न युक्तमिति वक्ति पृथग्जनोऽपि ॥३१६॥

यास्यति जलधरसमयस्तव च समृद्धिर्लघीयसी नूनम् ।
भविता तटिनि तटद्रुमपातनमेकं चिरस्थायि ॥३१७॥

नारिकेलः

भो नारिकेल तव मस्तकभेदकानां
साध्यं भवेत् तव जलं कठिनस्वरूप ।
नाहं त्वदीयसलिलग्रहणे समर्थ-
स्त्वत्यन्तखेदविमुखः शुकराजबालः ॥३१८॥

नासाभूषणम्

हारस्यापि दुरापमस्ति भुवने हे नासिकाभूषण
त्वत्सौभाग्यमिति प्रतीहि वनितावक्त्रेन्दुकान्तिप्रद ।
या कान्ता तनुसङ्गमाय सहते नान्तर्विभेदव्यथां
सा नासापुटभेदनादपि भवत्सङ्गं यतो वाञ्छति ॥३१९॥

निम्बः

पश्यानुरूपमिन्दिन्दिरेण माकन्दशेखरो मुखरः ।
अपि च पिचुमन्दमुकुले मौकुलिकुलमाकुलं मिलति ॥३२०॥

विमलतरदलैरपि प्रवालैरपि कुसुमैरपि तिक्ततां विदित्वा ।
उपवससि सखे फलाशया किं परिणतवानपि तिक्त एव निम्बः ॥३२१॥

शर्कराशतभारेण निम्बवृक्ष उपाधितः ।
पयसा सेवितो नित्यं न निम्बो मधुरायते ॥३२२॥

परशुरामः

त्वं जामदग्न्य जननीवधपातकेन
सन्दूषितः क्रतुविदां धुरि नाऽभविष्यः ।
गीर्वाणवन्द्यचरणस्तव चन्द्रमौलि-
राचार्यकं स भगवान् यदि नाकरिष्यत् ॥३२३॥

पलाण्डुः

कर्पूरधूलीरचितालवालः
कस्तूरिकाकल्पितदोहदश्रीः ।
हिमाम्बुपूरैरभिषिच्यमानः
प्राञ्चं गुणं मुञ्चति किं पलाण्डुः ॥३२४॥

पलाशः

उपनदिपुलिने महापलाशः
पवनसमुच्चलदेकपत्रपाणिः ।
दवदहनविनष्टजीवितानां
सलिलमिवैष ददाति पादपानाम् ॥३२५॥

किंशुके किं शुकाः कुर्युरारामाशानिरोधिनि ।
महोन्नते पल्लविते पुष्पिते फलितेऽपि वा ॥३२६॥

किंशुक किं शुकमुखवत् कुसुमानि विकासयस्यनिशम् ।
यस्यां जनोऽनुरागी सा गौरेतैः कदापि नोच्चार्या ॥३२७॥

त्यज किंशुक पुष्पिताभिमानं
निजशीर्षे भ्रमरोपसेवनेन ।
विकसन्नवमालिकावियोगात्
कुरुते वह्निधिया त्वयि प्रवेशम् ॥३२८॥

मा किंशुक प्रकटयात्मनि मौनमुद्रां
मन्मस्तके विचरतीति मधुव्रतोऽयम् ।

यन् मालतीविरहवेदनया त्वदीयं
दृष्ट्वा प्रसूनमुपयात्यनलभ्रमेण ॥३२९॥

पितुरपि पुत्रस्य विशेषः

कुम्भः परिमितमम्भः पिबति पपौ कुम्भसम्भवोऽम्भोधिम् ।
अतिरिच्यते सुजन्मा कश्चिज् जनकान् निजेन चरितेन ॥३३०॥

पिपीलिका

योजनानां सहस्राणि शनैर्याति पिपीलिका ।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ॥३३१॥

प्रभुपरिग्रहः

प्रसिद्धिहेतुर्भूतानां प्रायः प्रभुपरिग्रहः ।
सहस्रं जलधौ शङ्खाः पाञ्चजन्यस्तु विश्रुतः ॥३३२॥

बकः

नैर्मल्यं वपुषस्तवास्ति वसतिः पद्माकरे जायते
मन्दं याहि मनोरमां वद गिरं मौनं च सम्पादय ।
धन्यस्त्वं बक राजहंसतुलनां प्राप्तोऽसि किं तैर्गुणै-
र्नीरक्षीरविभागकर्मनिपुणा शक्तिः कथं लभ्यते ॥३३३॥

बडवानलः

तेजांसि यस्य प्रशमं प्रयान्ति
वारां प्रवाहेण स वह्निरन्यः ।
अयं पुनर्वाडवनामधेयः
समुद्रमापीय बिभर्ति तेजः ॥३३४॥

बर्बूरः

आमूलाग्रनिबद्धकण्टकतनुर्निर्गन्धपुष्पोद्गम-
श्छाया न श्रमहारिणी न च फलं क्षुत्क्षामसंतर्पणम् ।
बर्बूरद्रुम साधुसङ्गरहितः पन्थानमाक्रामसि
त्वन्येषां फलशाखिनां फलवतां गुर्वी वृतिर्जायसे ॥३३५॥

बालाः

ये शिरसा निहिता अपि न भवन्ति सखे समानसुखदुःखाः ।
चिकुरा इव ते बाला एव जरापाण्डुभावेऽपि ॥३३६॥

बिडालः

किं कीरवत् तव वचो मधुरं बिडाल
किं व्याघ्रवद् बलपराक्रमिता तवास्ति ।
किं फेरुवन् मतिबलं समयोचितं ते
निर्लज्जतैव तव वृत्तिकरी बभूव ॥३३७॥

मा गर्वमुद्वह बिडाल महीपतीना–
मन्तःपुरं मणिमयं निलयो ममेति ।
पट्टाभिषेकसमये पृथिवीपतीनां
बाह्यस्थितस्य कलभस्य तु मण्डनश्रीः ॥३३८॥

रे रे बिडाल परिगर्जसि मां विलोक्य
कीरं मनोहरमिमं निजपञ्जरस्थम् ।
श्वानं विलोक्य न हि दर्शयसि स्ववीर्यं
त्वद्देहपाटनपटुं दशनैः करालैः ॥३३९॥

क्षीरोदधेश्च गाम्भीर्यं जानाति मथनाद्धरिः ।
लेहनाय तटं प्राप्तः कथं विद्याद् बिडालकः ॥ ३४०॥

बिडालभक्षितः

बिडालभक्षिते दुःखं यादृशं गृहकुक्कुटे ।
न तादृङ ममताशून्ये कलविङ्केऽथ मूषिके ॥३४१॥

भेकः

गङ्गादीनां सकलसरितां प्राप्य तोयं समुद्रः
किंचिद् गर्वी न भवति पुनर्दिव्यरत्नाकरोऽपि ।
एको भेकः परममुदितः प्राप्य गोष्पादनीरं
को मे को मे रटति बहुधा स्पर्धया विश्वमुच्चैः ॥३४२॥

दिव्यं चूतरसं पीत्वा गर्वं नायाति कोकिलः ।
पीत्वा कर्दमपानीयं भेको बकबकायते ॥३४३॥

मत्स्यविशेषः

क्षारं वारि न चिन्तितं न गणिताः क्रूराश्च नक्रादयः
चञ्चद्वीचिकदम्बडम्बरमिलत्त्रासोऽपि दूरीकृतः ।
मध्येऽम्भोनिधि मत्स्यरङ्क भवता झम्पः कृतो लीलया
सम्पत्तिर्मकरार्जनं विपदिह प्राणप्रयाणावधिः ॥३४४॥

वक्रे विधातरि कथं विपदां निवृत्तिः
कैवर्त्तकर्कशकरग्रहणाच्च्युतोऽपि ।
जाले पुनर्निपतितः शफरो वराकः
स्त्रस्तस्ततोऽपि गलतो गिलितो बकेन ।।३४५।।

मधुः

अस्मिन् केलिवने सुगन्धपवने क्रीडत्पुरन्ध्रीजने
गुञ्जद्भृङ्गकुले विशालबकुले कूजत्पिकीसंकुले ।
उन्मीलन्नवपाटलापरिमले मल्लीप्रसूनाकुले
यद्येकापि न मालती विकसिता तत् किं न रम्यो मधुः ।।३४६।।

मयूरः

अहमस्मि नीलकण्ठः तव खलु तुष्यामि शब्दमात्रेण ।
नाहं जलधर भवतश्चातक इव जीवनं याचे ।।३४७।।

उत्तंसाय सखे मयूर भवतस्तापिच्छपिच्छाभरा-
देकं चन्द्रकमर्पयेत्यनुसृतो दत्ते न रोमाप्यसौ ।
व्याधास्तु प्रसभं निरुध्य चरणैरापीड्य हित्वा घृणा-
मादायास्य कलापमङ्गणभुवः संमार्जनं तन्वते ।। ३४८।।

रे रे शिखावल शिखाभरणाय बर्ह-
मेकं दिशेत्यनुनयान् मम किं ददासि ।
भिल्लाय वामचरणं हृदये निधाय
निर्लुञ्चते दिशसि निर्दयमर्थ्यमानः ।।३४९।।

समन्तादाक्रान्ता दवदहनसंघैः शिखरिणः
किरातैराकीर्णाः करकलितकाण्डैर्वनभुवः ।
बिडालैरालीढाः सपदि सरसीनां परिसराः
शिखण्डी पाण्डित्यं निजमहह कुत्र प्रकटयेत् ।।३५०।।

मरकतः

आसीत् पूर्वं विमलजलधौ मण्डनं भूपतीनां
नारीणां च प्रबलमुकुटे काञ्चनेन प्रसंगात् ।
तन्त्रीबद्धः कथमिदमहो काचखण्डेन सार्थं
भिल्लीकण्ठे मरकतमणे कामवस्थां गतोऽसि ।।३५१।।

मलयाचलः

विद्योतन्ते कति न गिरयस्तेषु किं नोदयन्ते
शाखावन्तः खदिरबदरीशालशाखोटकाद्याः ।

धन्यस्तावन् मलयशिखरी यत्र जातास्त एव
स्वैरामोदैस्त्रिभुवनमथ प्रीणयन्तः स्फुरन्ति ।।३५२।।

मल्लिका

न च गन्धवहेन चुम्बिता न च पीता मधुपेन मल्लिका ।
निहतैव कठोरशाखया परिणामस्य जगाम गोचरम् ।।३५३।।

महान्तः

मनस्वी म्रियते वापि स्वोत्कर्षं नैव मुञ्चति ।
अपि निर्वाणमायाति नानलो याति शीतताम् ।।३५४।।

महिषः

नीलतया स्थूलतया दूरतया दानलोलुपैर्मधुपैः ।
धावितमिभराजधिया हन्तासीदन्ततो महिषः ।।३५५।।

मानसम्

नो वा कियन्तः परितः स्फुरन्ति
जलाशया निर्मलभूरितोयाः ।
सदावदातं चिरमेकमेव
हंसस्य विश्रामपदं वदन्ति ।।३५६।।

मालती

अयि किं गुणवति मालति जीवति भवतीं विना कथं मधुपः ।
अथ यदि जीवति जीवतु जीवितमपि तस्य जीविताभासः ।।३५७।।

अयि मालति सौरभसारविनि-
र्जितसंविकसत्कमलानिलये ।
मधुपानविधौ मधुपस्य पुन-
र्भुवने भवतीमहमाकलये ।।३५८।।

आमूलादुन्मूलय भूगतसारं प्रभञ्जनोशीरम् ।
दिशि दिशि विसरत्परिमलगन्धभरां मालतीं मा त्वम् ।।३५९।।

कति सन्ति लवङ्गलता ललिता
नवकोरकिता धरणीसुतले ।
गतिबन्धुरगन्धभृतस्तरवो
गुरवो निवसन्ति गिरौ मलये ।।३६०।।

किं मालति म्लायसि मां विहाय चुचुम्ब तुम्बीकुसुमं षडङ्घ्रिः ।
लोकश्चतुर्भिश्चरणैः पशुः स्यात् स षड्भिरत्यर्थपशुर्न किं स्यात् ।।३६१।।

विलससि मनोज्ञमनसा मालति मलिनेन गन्धवाहेन ।
कुसुमाकरेऽपि रमसे मुग्धे वैदग्ध्यमीदृशं कस्याः ॥३६२॥

मिथ्याराजस्तुतिः]

इन्द्रो यमोऽसि वरुणोऽसि हुताशनोऽसि
ब्रह्मा हरो हरिरसीत्यसकृद् यदुक्तिः ।
भूपालमौलिमणिरञ्जितपादपीठ
तस्यानृतस्य फलमिन्धनमुद्वहामि ॥३६३॥

मुक्ताः

अत्युच्चेनाऽविरुद्धेन सुवृत्तेनातिचारुणा ।
अन्तर्भिन्नेन सम्प्राप्तं मौक्तिकेन निबन्धनम् ॥३६४॥

गुञ्जारञ्जितकबरीशबरीततिभिर्गरीयसी नगरी ।
इह न हि मुक्तावणिजः कोपि न मुक्तागुणज्ञोऽपि ॥३६५॥

जन्मस्थली वारणराजमूर्धा
महीपतीनां मकुटे निवासः ।
अनादरं चेत् कुरुतेऽनभिज्ञो
मुक्ताफलानामिह कोऽपराधः ॥३६६॥

मुक्ताफल त्वामिभकुम्भसंस्थं
पञ्चाननो मुञ्चतु मांसलोभी ।
किरन्तु गुञ्जाभरणाः किराताः
किं तेन हीयेत महार्घता ते ॥३६७॥

रत्नाकरे परिहृता वसतिः किमन्य-
दङ्गीकृतः कठिनवेधनदुःखभारः ।
वक्षोजकुम्भपरिरम्भणलोलुपेन
किं किं न तेन विहितं बत मौक्तिकेन ॥३६८॥

हरिनखरविमुक्ता रक्तसिक्ता हि मुक्ताः
परिणतबदराणीत्यादरेणोपगृह्य ।
सपदि सरसि धौताः प्रत्यभिज्ञाय मुक्ताः
परिकिरति किराती हन्त कान्तार एव ॥३६९॥

हृदये कुरु सञ्चयं गुणानां
यदि रे वाञ्छसि नासिके निवासम् ।
इति मौक्तिक ते वदामि नूनं
गुणहीनोऽर्हति नासिके न वासम् ॥३७०॥

मुरली

परिपीड्य करद्वयेन गाढं
परपुंसा परिचुम्बिताननापि ।
मुरली महनीयवंशजाता
मुहुराक्रन्दममन्दमातनोति ।।३७१।।

माधवस्य मुरली मुखलग्ना रागमावहतु किंतु वयस्ये ।
वंशजाऽहमिति मास्तु सगर्वा या बिभर्ति बहुशो विवराणि ।।३७२।।

मूर्खः

यासां दृष्ट्वा नयनयुगलं वङ्गवाराङ्गनानां
देशत्यागः परमकृतिभिः कृष्णसारैरकारि ।
तासामेव स्तनयुगजिताः कुम्भिनः सन्ति मत्ताः
प्रायो मूर्खः परिभवविधौ नाभिमानं विधत्ते ।।३७३।।

मूषिकः

धान्यागारप्रभृतिषु बिलं मूषिकासि प्रकुर्वन्
यस्मिन् जीवस्यहह भवने तत् करोष्येव भग्नम् ।
ये दृष्टास्तान् दशसि च नरान् स्वान् परान् वा शिशूंस्त्वं
खादस्येवं प्रथितदुरितस्तेन वध्योऽसि सर्वैः ।।३७४।।

मृगतृष्णिका

जलभ्रमोत्पत्तिकृतो गुणौघान्
प्रकाशयन्त्यां मृगतृष्णिकायाम् ।
जलाशय भ्रान्तिरभून् ममैषा
प्रभूतसंतापकरी पिपासा ।।३७५।।

मेषः

अयि मेष भवानेव कृतघ्नो धरणीतले ।
पुष्णाति यस्त्वामत्यर्थं तमेव त्वं जिघांससि ।।३७६।।

तारतम्यमविज्ञाय गिरिणा योद्धुमिच्छसि ।
मेष त्वमेव शीर्षस्य दलनेन विनंक्ष्यसि ।।३७७।।

यूथी

यूथि यथोचितविधिना विधेयमातिथ्यमेतस्मिन् ।
मालतिकाप्राणेशः प्राघुणिकस्ते घुणाक्षरन्यायात् ।।३७८।।

रङ्गम्

हे रङ्ग हेमतुलया तुलितोऽसि नित्यं
मानं जहीहि किमु पश्यसि नो विशेषम् ।
स्वर्णं सरत्नघटितं नृपशेखरेषु
त्वं पाप पामरवधूचरणेषु लीनः ॥३७९॥

रत्नानि

अविभावित एव केवलं खनिगर्भे मणिरेष जीर्यतु ।
न तु सीदतु मूल्यहानितो वणिगालोकनगोचरीकृतः ॥३८०॥

एणाक्षीणां वरकुचतटे चन्दनामोदरम्ये
यस्यैकान्तं विलसितमभून् मौक्तिकानां कलापैः ।
सोऽयं गुञ्जाफलशबलितो दैवयोगादिदानीं
भिल्लीकण्ठे मरकतमणे कामवस्थां गतोऽसि ॥३८१॥

काचाः काञ्चनभूषिताः कति न वा मुष्णन्ति रत्नश्रियं
मौलौ वा कति नोद्वहन्त्यपधियस्तानेव रत्नभ्रमात् ।
अक्ष्णां ये पुनरुन्मृजन्ति तिमिरं यैर्नाम रत्नाकरः
सिन्धुस्ते पृथगेव हन्त मणयस्तेष्वप्यभिज्ञाः पृथक् ॥३८२॥

धन्योऽयं मणिरेकश्छिन्नो भिन्नश्च शाणनिर्घृष्टः ।
युक्तस्तेजोनिचयैर्धन्यो दुःखेऽपि योऽधिकाभासः ॥३८३॥

पयोधेः सर्वस्वं शिरसि धृतवान् यं नृपगणः
पणो यस्य क्षोणीचतुरुदधिसीमावधिरभूत् ।
स एवायं दैवाच् छबरवनितापाणिपतितो
मणिर्मेषग्रीवाद्विगुणगुणबद्धो विहरति ॥३८४॥

विरम रत्न मुधा तरलायसे
तव न कश्चिदिहास्ति परीक्षकः ।
विधिवशेन परिच्युतमाकरात्
त्वमपि काचमणीकृतमीश्वरैः ॥३८५॥

समुद्रेणान्तस्थस्तटभुवि तरङ्गैरकरुणैः
समुत्क्षिप्तोऽस्मीति त्वमिह परितापं त्यज मणे ।
अवश्यं क्वापि त्वद्गुणपरिचयाकृष्टहृदयो
नरेन्द्रस्त्वां कुर्यान् निजमुकुटकोटिप्रणयिनम् ॥३८६॥

रामचन्द्रः

संग्रामाङ्गणमागते दशमुखे सौमित्रिणा विस्मितं ।
सुग्रीवेण विवर्तितं हनुमता व्यालोलमालोकितम् ।
श्रीरामेण परन्तु पीनपुलकस्फूर्जत्कपोलश्रिया
सान्द्रानन्दरसालसा निदधिरे बाणासने दृष्टयः ।।३८७।।

रोहितः

अगाधजलसञ्चारी न गर्वं याति रोहितः ।
अङ्गुष्ठोदकमात्रेण शफरी फर्फरायते ।।३८८।।

लज्जात्यागः

यः कुन्तपाणिरिह भूप इति प्रसिद्धो
भूखण्डमात्रविभवः परसेवकश्च ।
तस्यात्मजः सततमिच्छति राजशब्दं
व्रीडे जगज्जननि हन्त निराश्रयासि ।।३८९।।

लता

चित्रं कनकलतायां पल्लव एवामृतं सूते ।
कुसुमसमुद्गमसमये नो जाने किं फलं भावि ।।३९०।।

माकन्दे मकरन्दशीधुमधुरे पुन्नागयूनि भ्रमद्-
भृङ्गीनादविनोदभाजि बकुले पुष्पोद्गमामोदिनि ।
अन्येष्वत्र महीरुहेषु परितः प्राप्तेषु काचिल् लता
बाला कण्टकितं तरुं शिव शिव स्वैरं समालिङ्गति ।।३९१।।

लवङ्गलता

अयि दुष्कृतकेन केन वत्से हलिकद्वारि लवङ्गि पुष्पितासि ।
स्तबकास्तव पांसुभिः परीताः परितः प्राङ्गणसीम्नि यल् लुठन्ति ।।३९२।।

वनमार्जालः

वनमार्जालबीजन्तु देवभोगाय कल्पते ।
खरस्य वृषणं स्थूलं कस्मै वा किं प्रयोजनम् ।।३९३।।

वनवह्निः

सन्त्यन्येऽपि धरातले हुतभुजश्चुल्लीषु भिल्लीवधू-
पाणिश्रेणिपुराणशूर्पपवनप्रस्फालविस्तारिताः ।
ते सर्वे गजकर्णतालयुगलीवात्याविततत्याहत–
ज्वालाटङ्कविटङ्कघट्टनदलद्ग्रावा न दावानलः ।।३९४।।

वराटकः

तुलामारोहयेद्धेम्ना सह काणवराटिकाम् ।
वर्णनिर्णयवेलायां नारोहो निकषस्थले ॥ ॥३९५॥

वराटक त्वं वरवर्णिनीनां
वर्णान्तरोत्कर्षगुणस्य पुष्टिम् ।
कर्तुं समर्थो न तथा तुलायां
सुवर्णसाम्यं भजसे न लज्जाम् ॥३९६॥

वराहः

सर्वलोकपरितोषकारिणि स्वर्धुनीविमलवारिणि स्थिते ।
पूतिगन्धवति पल्वलोदके सूकरः सुखमतीव मन्यते ॥३९७॥

वलयः

गुणानामज्ञानादनुभवतु तावत् प्रतिपदं
मुहुर्बाहुच्छेदव्यतिकरमसौ स्वर्णवलयः ।
अपि ज्ञाते तत्त्वे तव गुणसमुद्रस्य पुरतः
समं गुञ्जापुञ्जैस्तुलनमतिलज्जाकरमिदम् ॥३९८॥

वंशः

छिन्नः सुनिशितैः शस्त्रैर्विद्धश्च नव सप्तधा ।
तथापि हि सुवंशेन विरसं नापजल्पितम् ॥३९९॥

वसन्तः

एकं द्विजं च स्पृहणीयवाचं
मत्तद्विरेफं च मधुः पुपोष ।
सतो गुणानप्यसतोऽपि दोषान्
जात्या विहीनो न विवेक्तुमीष्टे ॥४००॥

जीर्णः पर्णसमूहः फलमपि गलितं निदाघवाहेन ।
माधव तव करुणातः पुनरपि तरुणायते चूतः ॥४०१॥

श्रीमन् वसन्त भवदभ्युदये न वृक्षाः
के नाम पुष्पफलपल्लवशालिनः स्युः ।
अस्माकमल्पतपसां बदरीतरूणां
भ्रष्टं फलं चिरशिखापटलं प्रलूनम् ॥४०२॥

वायुः

अहह चण्डसमीरण दारुणं
किमिदमाचरितं चरितं त्वया ।
यदिह चातकचञ्चुपुटोदरे
पतति वारि तदेव निवारितम् ॥४०३॥

प्राथमिकी घनवृष्टिः प्राप्ता शिखिनो निदाघतप्तस्य ।
आकस्मिकेन सा पुनरपनीता क्वापि पवनेन ॥४०४॥

राजीविनीविपिनसौरभसारगन्धो
योऽभूद् वसन्तदिवसेषु जनैकबन्धुः ।
रथ्यारजांसि विनुदन् निरुजन् नगेन्द्रा-
नुन्मत्तवद् भ्रमति पश्यसि सोऽद्य वायुः ॥४०५॥

वायुरेव महाभूतं वदन्तु निखिला जनाः ।
आयुरेवैष भूतानामिति मन्यामहे वयम् ॥४०६॥

सन्ना नाविकधोरणी निपतिता मध्ये जलं क्षेपणी
पन्थाः पर्वतदुर्गमो घनघनच्छन्नश्च तारापथः ।
भो भो मारुत दुस्तरो जलनिधिः शीर्णा च नौरद्य न-
स्तां निर्मज्जय वा तटं गमय वा हस्ते तवास्ते द्वयम् ॥४०७॥

वारिदः

अकूपाराद् वारि प्रचुरतरमादाय जलदः
स दानाध्यक्षोऽपि प्रकिरति जलं नाद्भुतमिदम् ।
स मेघो धन्यो यत् परिकिरति मुक्ताफलतया
यदीयासौ कीर्तिर्नटति नृपनारीकुचतटे ॥४०८॥

अन्ये ते विहगाः पयोद परितो धावन्ति तृष्णातुरा
वापीकूपतटाकसागरसरित्तोयेषु बद्धादराः ।
चित्रं पश्य य एष चातकशिशुः शुष्कोष्ठकण्ठोऽपि सन्
नान्यं पश्यति नोपसर्पति न च प्रस्तौति नोद्गायति ॥४०९॥

आश्रयः क्रियतामेष तरुः सन्मार्गमाश्रितः ।
पाथोद सिच्यतां काले नोपेक्ष्यो दूरभावतः ॥४१०॥

आसक्ताः प्रतिकोटरं विषधराः भानोः करा मूर्धनि
ज्वालाजालकरालदावदहनः प्रत्यङ्गमालिङ्गति ।
सर्वानन्दनचारुचन्दनतरोरेतस्य जीवातवे
रे जीमूत विमुञ्च वारि बहुशो युष्मद्यशो जृम्भताम् ॥४११॥

अस्यां प्रावृषि चातकैर्जलकणा लब्धा न चेत् किं ततो
भाविप्रावृषि दास्यते द्विगुणमित्यभ्र त्वया मन्यते ।
एतेऽद्यैव लयं व्रजन्ति पृथुकैरेतत्कुलीनोऽपि चे-
देकः प्राणिति तावदेतदलभित्यत्रैव नः संशयः ॥४१२॥

आपो विमुक्ताः क्वचिदाप एव
क्वचिन् न किंचिद् गरलं क्वचिच् च ।
यस्मिन् विमुक्ताः प्रभवन्ति मुक्ताः
पयोद तस्मिन् विमुखः कुतस्त्वम् ॥४१३॥

आसन् कणानि यावन्ति चातकास्राणि तेऽम्बुद ।
तावन्तोऽपि त्वयोदार न मुक्ता जलबिन्दवः ॥४१४॥

कासारेषु सरित्सु सिन्धुषु तथा नीचेषु नीरग्रहं
धिक् तत्रापि शिरोनतिः किमपरं हेयं भवेन् मानिनाम् ।
इत्यालोच्य विमुच्य चातकयुवा तेषु स्पृहामादरा-
दुद्ग्रीवस्तव वारिवाह कुरुते धाराधरालोकनम् ॥४१५॥

किसलयानि कुतः कुसुमानि वा
क्व च फलानि तथा नववीरुधाम् ।
अयमकारणकारुणिको न चेद्
वितरतीह पयांसि पयोधरः ॥४१६॥

गर्जन्नम्बु ददाति तच् च कणिकारूपेण यत्र क्वचित्
कालापेक्षतया प्रदानसमये नैल्यं विधत्ते मुखे ।
पश्चात् पाण्डुरतामुपैति लघुतामभ्येति भूयस्तरां
वीर श्रीप्रभुरत्नशेखरमणे दाता कियान् वारिदः ॥४१७॥

गर्जतापि जलदेन विकीर्णा-
श्चातकैर्जगृहिरे जलरेखाः ।
आतुराश्रितजनाः परुषोक्ती-
रप्यनन्यगतिका हि सहन्ते ॥४१८॥

गर्जसि नो घन मुञ्चसि तोयं चातकपक्षी व्याकुलितोऽयम् ।
दैववशाद् यदि पश्चिमवातः क्व त्वं क्वायं क्व च जलपातः ॥४१९॥

ग्रीष्मोष्मा दलितो वनं विकसितं धाराभिषिक्ता धरा
दावाग्निः शमितो हरित्सु रसितैरानर्तिताः केकिनः ।
प्राप्योच्चैः पदमम्बुदेन विहितं यद् वै त्रिलोकीहितं
तत्कीर्तिं परिवर्तितामिह शरन्मेघान् वदन्ति भ्रमात् ॥४२०॥

जलधर भवतश्चरितं किमिदं पूर्णेऽपि पूरयसि ।
चिरयाचकसारङ्गे परिमिततृष्णे न शीकरं किरसि ।।४२१।।

ज्ञाता त्वन्मृदुशब्दता सुविदितं मित्रानुकूल्यं च ते
संत्राताः शबराश्रयाश्च बहवः प्राबल्यकाले तव ।
त्वत्सम्पत्तिधनं दिनं हि सुदिनं पाथोद किं ब्रूमहे
सौजन्यं प्रकटीकृतं हि भवतो हंसैर्मृणालाशनैः ।।४२२।।

तवैव प्रावीण्यं जलद जगदानन्दकरणं
यदम्भःपालीराहरसि खलसत्त्वाज् जलनिधेः ।
निसर्गात् क्षारास्ता नयसि च कथंचिन् मधुरता–
मथासारैस्तासां युगपदुपकर्तासि जगतः ।।४२३।।

ते ते चातकपोतका वितृषिता दावाग्निमग्नं वनं
संनिर्वापितमुष्णतापितमही निर्वापिता सर्वतः ।
कासाराः परिपूरिताः पृथुपयोधाराभिरम्भोधर
त्वय्येवायमहो महोर्जितमहादानावदानक्रमः ।।४२४।।

त्यक्ता नद्यः कमलसरसी राजहंसावतंसा
पुण्याश्चेतो हिमगिरिभुवस्त्वत्कृते येन मुक्ताः ।
सम्प्राप्तेऽस्मिन् जलद दहनोच्चण्डदाहे निदाघे
पर्जन्य स्वीकुरु तमधुना चातकं पातकं वा ।।४२५।।

त्वं प्राप्नोषि महोन्नतिं क्षितिभृतां कृत्वा पदं मस्तके
सर्वस्त्वामुपजीवतीति मुदितस्त्वद्वृत्तवृक् चातकः ।
नान्यानेष जलाशयान् मृगयते नापेक्षते नेक्षते
काले तं समुपेक्षते यदि भवान् किं नाम कुर्यादसौ ।।४२६।।

वयितोऽसि ततस्ततः पृथिव्या–
मयि जीमूत जनस्य जीवने च ।
विषयावपि गच्छतः किमेतान्
ध्वनिभिर्भीषयसीह राजहंसान् ।।४२७।।

धाराधर धरा वारिधाराभिरभिपूरिता ।
खगत्रोटीपुटद्रोणीपूरणे किं नु ते श्रमः ।।४२८।।

धाराधर विवेकात्मन् मुधा वर्षसि वारिधौ ।
चिरश्रितं कणातृप्तं चातकं किं न लोकसे ।।४२९।।

नदेभ्योऽपि ह्रदेभ्योऽपि पिबन्त्यन्ये सदा पयः ।
चातकस्य तु जीमूत भवानेवावलम्बनम् ।।४३०।।

नान्धौ स्कन्धनतिः सरस्सु न मनो वापीषु नापीहितं
कर्णेऽप्यर्णवसंकथा न च कृता नाद्यापि नद्यां मनः ।
सारङ्गेण समुत्तरङ्गरसनादण्डेन चण्डातप-
क्लान्तेनापि निरन्तरं जलद हे त्वय्येव वत्तं मनः ॥४३१॥

नायाति चैव भवदम्बुकणभिलाषात्
सारङ्गडिम्भकवरोऽम्बुधरान्तिकं ते ।
किन्तु त्वदीयघनतासरसत्वलौल्यान्
नो चेन् न सन्ति कति सारसवत्सरांसि ॥४३२॥

निष्पद्मं शिशिरेण धीवरगणैर्निर्मत्स्यनिष्कूर्मकं
व्याधैर्निर्विहगं निरम्बु रविणा निर्नालकं दन्तिभिः ।
निःशालूरमकारि सूकरगणैर्नामैकशेषं सरो
हे पाथोद परोपकारक पयोदानेन तत् पूरय ॥४३३॥

नीरं दूरं तदपि विरसं जङ्गमा नो लताद्याः
तस्मिन् दातर्यपि जलनिधौ को लभेताम्बुबिन्दुम् ।
दानाध्यक्षे त्वयि जलधर क्वापि कुत्रापि शैलाः
शालावन्तोऽमृतनिभजलैस्तर्पिताः सर्व एते ॥४३४॥

नैवालवालवलयं भरितं द्रुमाणां
नार्द्रीकृतापि बत चातकपोतचञ्चुः ।
दावानलाकुलतरुः शमितो न शीघ्रं
भाराय वारिधर वारिपदं तवाभूत् ॥४३५॥

पपात पाथःकणिका न भूमौ
समाप शान्तिं ककुभां न तापः ।
वृष्ट्यैव जीवातुरयं तटित्वान्
कृषीवलानां मुदमुद्ववाम ॥४३६॥

पयोद हे वारि ददासि वा न वा
त्वदेकचित्तः पुनरेष चातकः ।
वरं महत्या म्रियते पिपासया
तथापि नान्यस्य करोत्युपासनाम् ॥४३७॥

पानीयमानीय परिश्रमेण
पाथोद पाथोनिधिमध्यतस्त्वम् ।
कल्पद्रुमे सीदति साभिलाषे
महोब्दरे मुञ्चसि किं निमित्तम् ॥४३८॥

प्रसीदतु पयोद ते हृदयमाश्रिते चातके
यदस्य तदिमे गुणाः पुनरनन्यसाधारणाः ।
न नीचजनयाचनं न शरणान्तरालोचनं
न गौरवविमोचनं न निजदुर्दशासूचनम् ॥४३९॥

प्रावृषि शैलश्रेणीनितम्बमुज्झन् दिगन्तरं भ्रमसि ।
चपलान्तर घन किं तव वचनीयं पवनवश्योऽसि ॥४४०॥

भो भो वारिद वारिणा मम मुखं सम्पूरय प्रेमवान्
दाता त्वं जगदेकरक्षणपरो जानासि माक्षप्यलम् ।
त्वामेकं शरणागतं नवनदीकूपेषु मुक्तस्पृहं
दीनं चातकबालकं निजगृहं त्यक्त्वान्तराले स्थितम् ॥४४१॥

मुञ्च मुञ्च सलिलं दयानिधे
नास्ति नास्ति समयो विलम्बने ।
अद्य चातककुले मृते पुन-
र्वारि वारिधर किं करिष्यसि ॥४४२॥

मुञ्चस्यम्भः सममनुपमं क्षत्रगर्भे स्थले वा
साम्यं सम्यग् जलधर गतिश्चन्दने शीतहेतोः ।
न श्लाध्यं तत् तदपि कृतिनां नेदमन्तर्भृतं स-
द्योनिः काले भवति भवतो यद् विषं जीवतायाः ॥४४३॥

यत् पल्लवः समभवत् कुसुमं यदासीत्
तत् सर्वमस्य भवतः पयसः प्रसादः ।
यद् भूरुहे फलविधौ न ददासि वारि
प्राचीनमम्बुद यशो मलिनीकरोषि ॥४४४॥

यद्यपि सन्ति बहूनि सरांसि
स्वादुसुशीतलसुरभिपयांसि ।
चातकपोतः तदपि च तानि
त्यक्त्वा याचति जलदजलानि ॥४४५॥

यावत् तिष्ठति चातकोऽयमसुभिः कण्ठस्थलस्थायिभिः
तावद् देहि पयः पयोद फलतु त्वद्वारिकल्पद्रुमः ।
नो चेदस्य तृषार्तिपीडिततनोः प्राणैः प्रयाणे कृते
कस्मै दास्यसि को ग्रहीष्यति पुनः पापं तु ते स्थास्यति ॥४४६॥

ये तपनकिरणशुष्कास्तदनु च दावानलेन संदग्धाः ।
जलधर शिखिनोऽप्येते त्वज्जलसेकेन जीवन्ति ॥४४७॥

रे धाराधर धीर नीरनिकरैरेषा रसा नीरसा-
शेषा पृषकरोत्करैरतिखरैरापूरि भूरि त्वया ।
एकान्तेन भवन्तमम्बरगतं स्वान्तेन संचिन्तय-
न्नाश्चर्यं परिपीडितोऽभिरमते यद् घातकस्तृष्णया ॥४४८॥

वातैर्विधूनय विभीषय भीमनादैः
संचूर्णय त्वमथवा करकाभिघातैः ।
त्वद्वारिबिन्दुपरिपोषितजीवितस्य
नान्या गतिर्भवति वारिद चातकस्य ॥४४९॥

सर्वत्र स्रवतोऽस्य किंचिदुदकं विष्टया मुहूर्तं क्वचिच्
छुक्तीनामुदरेषु मौक्तिकमभूत् काले कदाचित् किल ।
अद्यत्वे च तथा करोतु पटुता यद्यस्ति सा दूरतः
शुष्कैरेव तु गर्जितैर्व्यथयति श्रोत्राणि धाराधरः ॥४५०॥

सर्वं वनं तृणाल्या पिहितं पीताः सितांशुरवितारा: ।
प्रध्वस्ताः पन्थानो मलिनेनोद्गम्य मेघेन ॥४५१॥

सेक्तव्यो यदि माधवस्तरुरयं पाथोद पाथोलवैः
अव्याजं परिषिञ्च किं चिरयसे कालः परिक्रामति ।
मूले मुक्तरसे दले विगलिते शुष्के तथा वल्कले
कस्मै दास्यसि को ग्रहीष्यति परीतापात् कथं स्थास्यति ॥४५२॥

स्निग्धाभूदवनी वनी मरकतश्यामा च कल्लोलिनी
नानावर्तविहारिणी जलधर स्वच्छाम्बुपूरं सरः ।
सर्वं साधु तवोदये किमिह तद् दुर्नीतिमालोकये
यद् भेका मुखरीभवन्ति विरलीभूताश्च पुंस्कोकिलाः ॥४५३॥

हर्षं वर्षं विधत्से चिरसमयतृषा शुष्यतां चातकानां
भूमेस्तापोपशान्ति वितरसि तरसा लोकशोकं धुनोषि ।
अम्भोदैतत् तवैकं परममनुचितं यत् पिधत्से सुधांशुं
भासामीशं कविं वा बुधमपि वहसि प्रेम खद्योतवर्गे ॥४५४॥

पण्डितः

हंसो न भाति बलिभोजनवृन्दमध्ये
गोमायुमण्डलगतो न विभाति सिंहः ।
जात्यो न भाति तुरगः खरयूथमध्ये
विद्वान् न भाति पुरुषश्च निरक्षरेषु ॥४५५॥

वृकः

साधुं समीक्ष्य मृगमस्य जिघांसया त्व-
मीहामृगात्मकुलमिच्छसि नेतुमेनम् ।
एवं भविष्यति यदि प्रबलस्त्वदग्रे
जन्तुस्तदा क्व नु निनीषसि किं च कुर्याः ॥४५६॥

वृक्षः

अध्वन्यध्वनि तरवः पथि पथि पथिकैरुपास्यते छाया ।
विरलः स कोऽपि विटपी यमध्वगो गृहगतः स्मरति ॥४५७॥

आयान्ति त्वरिता गभीरसरितां कूलेषु भूमीरुहां
मूले यत् पथिका निदाघमथिताः कृत्यं तदेषां परम् ।
सत्पुष्पैरधिवासनं निबिडया यच् छायया पालनं
यन् मन्दैरुपवीजनं च पवनैः कृत्यं तदुर्वीरुहाम् ॥४५८॥

आसीच् च वारिजनितः स्वयमङ्कुरो यो
जातस्ततो द्विदलितो विटपाश्रयश्च ।
काले यदैव कृतिभिः कुसुमोपगूढः
सोऽयं फली यदि तदा सफलः श्रमस्ते ॥४५९॥

इयं बाला वल्ली मृदुकिसलयं तापविलयं
घनच्छायं सालं नवमतिविशालं परिगता ।
परंत्वस्याप्यन्तर्गरललवभस्मीकृतवनं
भुजङ्गं प्रोत्तुङ्गं कथमिव वराकी कलयतु ॥४६०॥

एकस्त्वं मरुभूरुहेन्द्र विततैः शाखाशतैरञ्चितैः
पुष्यत्पुष्पलतान्वितैरमृदितैर्जीयाः सहस्रं समाः ।
अश्रान्तं श्रमलग्नपान्थजनतासर्वार्थनिर्वाहणं
कस्त्वां सात्त्विकमन्तरेण भुवने निर्मातु धर्माशयः ॥४६१॥

कश्चिन् नवं पल्लवमाददाति
कश्चित् प्रसूनानि फलानि कश्चित् ।
परं करालेऽस्य निदाघकाले
मूले न दाता सलिलस्य कश्चित् ॥४६२॥

छायाभिः प्रथमं ततश्च कुसुमैः पश्चात् फलैः स्वादुभिः
प्रीणात्येव तरुर्महानिति पथि श्रान्तैः समागम्यते ।
को जानाति यदत्र कोटरपुटे प्रत्यग्रहालाहल-
ज्वालाजालकरालभालफलकः क्रूरः फणी वर्तते ॥४६३॥

छायामन्यस्य कुर्वन्ति स्वयं तिष्ठन्ति चातपे ।
फलन्ति च परार्थेषु नात्महेतोर्महाद्रुमाः ॥४६४॥

तीव्रोऽयं नितरां निदाघसमयः प्रोद्यत्प्रचण्डद्युति-
र्मार्गो मारव एष तत्र पथिकाः सञ्चारिणः कोटिशः ।
तेषां कश्चिदिहाश्रयस्तरुवरो दैवेन सम्पादितः
सोऽप्येकः सुकृती करोतु कियतां सन्तापनिर्वापणम् ॥४६५॥

धत्से मूर्धनि दुःसहा दिनमणेरुद्दामधामच्छटा-
श्छायाभिः पथिकान् निदाघमथितान् प्रीणासि पुष्पैः फलैः ।
धैर्यं मुञ्चसि नैव नैव भवतः शाखाः सुविस्फारिता-
स्तेनाशासु च तन्यते तव यशःस्तोमः समुज्जृम्भितः ॥४६६॥

वृश्चिकः

विषभारसहस्रेण गर्वं नायाति वासुकिः ।
वृश्चिको बिन्दुमात्रेणाप्यूर्ध्वं वहति कण्टकम् ॥४६७॥

वृषभः

जाल्मो गुरुः सुघृष्टो वामेतरचरणभेद उपदेशः ।
ख्यातिर्गुणधवल इति भ्रमसि सुखं वृषभ रथ्यासु ॥४६८॥

व्यर्थनामानि

आकाशश्चाम्बराख्यो हरिरिति गहनं दर्दुरस्याभिधानं
काकस्यापि द्विजत्वं विषमफणिपतेर्नाम भोगी भुजङ्गः ।
क्षुद्राश्मा शर्करेति द्विरदमदजलं दानमर्थेन शून्यं
केचिन् नामानि चैवं दधति तनुभृतः सन्ति साडम्बराणि ॥५६९॥

व्याधः

सर्वोद्वेगकरं मृगादनममुं संत्यज्य हा धिक् त्वया
लोकस्यानपकारिणं गिरिनदीतीराटवीनिर्वृतम् ।
अश्नन्तं तृणमेणशावमदयं व्याध घ्नतामुं वृथा
देवो दुर्बलघातकोऽयमिति सा गाथा यथार्थीकृता ॥४७०॥

शङ्खः

क्व वाम्भोधौ जन्म क्व च वपुरिदं कुन्दधवलं
क्व चावासस्थानं कृतमहह विष्णोः करतलम् ।
क्व नीचानामास्ये परिणतिरियं चुम्बनविधा-
वितीवायं शङ्खः करुणकरुणं रोदिति मुहुः ॥४७१॥

जलनिधौ जननं धवलं वपुः मुररिपोरपि पाणितले स्थितिः ।
इति समस्तगुणान्वित शङ्ख भोः कुटिलता हृदये न निवारिता ।।४७२।।

ध्वनिरतिमधुरः शुचित्वमुच्चै-
र्जनिरपि शङ्ख नदीनतस्तवाभूत् ।
अवगतमखिलं बहिः सितत्वं
कुटिलतरं पुनरन्तरं न विद्मः ।।४७३।।

शम्बूकः

शम्बूकः सिकतिलभूतलानुकाषी
संविन्देच् चिरमुरसा पदानि गच्छन् ।
द्वित्राणि क्षुभितमहार्णवस्तिमीन्द्रो
द्वे कूले चरति मुदेति लोकवार्ता ।।४७४।।

शरः

कोटिद्वयस्य लाभेऽपि नतं सद्वंशजं धनुः ।
असद्वंश्यः शरः स्तब्धो लक्षलाभाभिकांक्षया ।।४७५।।

शशः

आत्मीयपक्षपरपक्षविनाशधुर्य
स्वीयान् परानपि शिशून्, शश हन्त हंसि ।
पापोऽसि पापमत एव तवावलोकाद्
भिन्दन्ति तावकशिरो मनुजाश्च दण्डैः ।।४७६।।

शारिका

लोकैरतीव गण्यं ते नैपुण्यं भुवि शारिके ।
यः पाठयति यद् वाक्यं तद्वदेव ब्रवीषि तत् ।।४७७।।

शारिका मधुरालापा न रञ्जयति कं जनम् ।
वाक्येनैवाधिको लाभः शरीरे नैल्यमेव हि ।।४७८।।

शारुकः

न भ्रूणां स्फुरणं न चञ्चुचलनं नो चूलिकाकम्पनं
न ग्रीवाचलनं मनागपि न यत् पक्षद्वयोत्क्षेपणम् ।
नासाग्रेक्षणमेकपाददमनं कष्टैकनिष्ठं परं
यावत् तिष्ठति हीनमीनवदनस्तावद् बकस्तापसः ।।४७९।।

शाल्मलिः

उच्चैस्त्वाद् वयसा च शाल्मलितरो निःसार मा गा मदं
माकन्दस्य नवस्य नास्य विपिने जानासि नूनं गुणान् ।
एतस्यैव वने वने परभृता वावान्यकं कानने
माध्वीकप्लवदूर्मिका मधुलिहो गायन्ति गाढं यशः ॥४८०॥

उत्तुङ्गमम्भोजसमानपुष्पं
बृहत्फलं शाल्मलिवृक्षमेव ।
दूरात् समालोक्य विपाककाले
शुकाः समाश्रित्य गता निराशाः ॥४८१॥

दूरे मार्गान् निवससि पुनः कण्टकैरावृतोऽसि
च्छायाशून्यः फलमपि च ते वानरैरप्यभक्ष्यम् ।
निर्गन्धस्त्वं मधुपरहितः शाल्मले सारशून्यः
सेवास्माकं भवति विफला तिष्ठ निःश्वस्य यामः ॥४८२॥

शालिश्यामाकौ

एकभूरुहयोरेकदलयोरेककाण्डयोः ।
शालिश्यामाकयोर्भेदः फलेन परिचीयते ॥४८३॥

शिवः

इयं तावल् लीला यदधिरुरुहे वृद्धवृषभो
यदुन्नेहे रुण्डं यदिह चितिभस्मापि लिलिपे ।
अयं को व्यापारो यदतिलकि भाले हुतवहो
यदग्रैवि व्यालो यदकवलि हालाहलमपि ॥४८४॥

उरसि फणिपतिः शिखी ललाटे
शिरसि विधुः सुरवाहिनी जटायाम् ।
प्रियसखि कथयामि किं रहस्यं
पुरमथनस्य रहोऽपि संसदेव ॥४८५॥

भस्मनि स्मररिपोरनुरागे हीयते न घनसारपरागः ।
भूषणं यदि फणी न मणीनां काचिदप्यपचितिर्न च हेम्नः ॥४८६॥

शुनकः

उच्छिष्टपत्रनिचये निजजातिवर्गे-
र्युद्धं कुरुष्व कलहप्रिय सारमेय ।
पूज्यं विलोक्य नरदेवगृहे करीन्द्रं
मा रोदनं कुरु फलं न हि तेऽस्ति किंचित् ॥४८७॥

द्वारं न प्रजहाति जातु नियतं जार्गात रात्रीरपि
स्वल्पेनापि मुदं प्रयाति किमुत श्वा श्वैव तावानपि ।
सम्पाद्यो महता धनेन सततं भोज्यस्तु सान्त्वैरिति
त्यक्त्वा मत्तगजं पदेऽस्य महति स्थाप्यः किमेतावता ॥४८८॥

पञ्चास्यस्य पराभवाय भषको मांसेन गोर्भूयसा
दध्यन्नैरपि पायसैः प्रतिदिनं संवर्धितोऽन्नेन यः ।
सोऽयं सिंहरवाद् गुहान्तरगताद् भीत्याकुलः संभ्रमात्
हन्ताशावलयं गतो हतविधे लाभः परं गोवधः ॥४८९॥

श्वन् ग्रामसिंह इति सिंहपदं दधासि
लज्जां विहाय महतां परिहासपात्रम् ।
नैच्यं क्व याति तव सा गुरुता कथं नु
कण्ठीरवस्य धृतिरीश्वरता च लभ्या ॥४९०॥

शेषः

युक्तोऽसि भुवनभारे मा वक्रां वितनु कन्धरां शेष ।
त्वय्येकस्मिन् दुःखिनि सुखितानि भवन्ति भुवनानि ॥४९१॥

सङ्गः

छिद्रिणां निकटे वासः कर्तव्ये नैव धीमता ।
वारिहारि घटीपात्रं ताड्यते तत्र झल्लरी ॥४९२॥

मलयाचलसंसर्गान् न वेणुश्चन्दनायते
अन्तःसारविहीनानां रसः केनोपजायते ॥४९३॥

सत्सङ्गो यदि लभ्यः पुण्यफलैः पोषणीय एवासौ ।
पथि पथि सुलभा वृक्षा न लभ्यते कुत्रचिदपि कल्पतरुः ॥४९४॥

समुद्रः

अन्यार्थं कियतीरुवाह महतीर्मन्थाद्रिमर्मव्यथा
मर्यादामतिवर्तते न कतिभिर्वात्याभिरत्याकुलः ।
कुक्षौ क्षोणिभृतो बिभर्ति पयसा पुष्णाति लोकत्रयं
तेनैवाम्बुनिधेर्महत्त्वमधिकं वर्वर्ति सर्वोपरि ॥४९५॥

आस्तां तावदहो समुद्रमहिमा दूरे तु कर्णप्रिय-
स्तीरे यस्य पिपासयैव मरणं प्राप्नोति शीघ्रं जनः ।
तस्मादम्बुनिधेर्वरं लघुसरः कूपोऽथवा वापिका
यत्र स्वीयकरद्वयेन सलिलं पेपीयते स्वेच्छया ॥४९६॥

जलधे श्रयन्ति बहवो बलाहका
दिश जीवनानि सहसा यथोचितम् ।
कलशोद्भवेन करपल्लवोदरे
चुलुकीकृतस्त्वमसि केन याचितः ॥४९७॥

तरङ्गमालिकाभील धिक् ते सागर गर्जितम् ।
यस्य तीरे तृषाक्रान्ताः पान्थाः पृच्छन्ति वापिकाम् ॥४९८॥

निधानं रत्नानां निधिरमृतलक्ष्मीन्दुपयसा-
मितः प्रीतः शेते हरिरिति भजामो जलनिधिम् ।
कथं वा जानीमः शठकमठपाठीनमकर-
ग्रहग्राहात्युग्रक्रकचविकचावान्तरभयम् ॥४९९॥

निष्पीतपीनतिमिराणि मनोहराणि
रत्नानि सन्ति न कियन्ति तवान्तिकेषु ।
एतस्य कौस्तुभमणेर्व्रजतः परन्तु
पाथोनिधे स्मरणमान्तरमावहेथाः ॥५००॥

पीत्वा गर्जन्त्यपस्ते दिशि दिशि जलदास्त्वं शरण्यो गिरीणां
सुत्रामत्रासभाजां त्रिदशविटपिनां जन्मभूमिस्त्वमेव ।
गाम्भीर्यं तच् च तादृक् त्वयि सलिलनिधे किन्तु विज्ञाप्यमेतत्
सर्वोपायेन मैत्रावरुणिमुनिकृपादृष्टयः कांक्षणीयाः ॥५०१॥

पीयूषेण कृतार्थिता दिविषदो लक्ष्म्या हरिः प्रीणितः
चन्द्रार्धेन विभूषितः पशुपतिः कल्पद्रुमैर्वासवः ।
आत्मानं परिमथ्नताप्युदधिना किं किं न तेषां कृतं
तस्यागस्त्यमुनिप्रपीतपयसो नोच्चैः कृतैकाङ्गुलिः ॥५०२॥

पीयूषेण सुराः श्रिया मुररिपुर्मर्यादया मेदिनी
शक्रः कल्परुहैः शशाङ्ककलया श्रीशङ्करस्तोषितः ।
मैनाकादिनगा निजोदरगता यत्नेन संरक्षिताः
मच्छून्यीकरणे घटोद्भवमुनिः केनापि नो वारितः ॥५०३॥

महर्घं श्रीरिति शार्ङ्गभृत् त्रिदशराट् चिन्तामणिर्महर्घमि-
त्यब्जो महर्घमितीश्वरः सुरगणो महर्घं सुधा चास्त्विति ।
सर्वे सन्त्यपहर्तुमेव जलधेः सर्वस्वमेनं रुषा
हन्ताचामति तापसे न गदितुं कोऽप्यस्ति तन् मास्त्विति ॥५०४॥

मा कुरु गुरुतागर्वं लघुरन्यो नास्ति सागर त्वत्तः ।
जलसंग्रहमन्यस्मात् त्वयि सति कुर्वन्ति पोतस्थाः ॥५०५॥

लक्ष्म्या श्रीपुरुषोत्तमो हिमरुचा गौरीप्रियोऽलंकृतो
देवेन्द्रोऽपि विमानवारणहयस्त्रीरत्नकल्पद्रुमैः ।
पीयूषैरमितैस्त्वया दिविषदश्चान्ये कृतार्थीकृताः
श्रीमन् वारिनिधे त्वदीयमहिमा नूनं न वाग्गोचरः ॥५०६॥

शेते यत्र हरिर्वसन्ति गिरयो मज्जन्ति विग्दन्तिनो
मत्स्याः सन्ति तिमिंगिलप्रभृतयो गर्भं दधात्यम्बुदः ।
पर्यायेण खरांशुशीतकिरणावुन्मज्जतो मज्जतः
पाथस्तत्र न संपिबन्ति यदि ते किं दूषणं वारिधेः ॥५०७॥

हंहो वारिनिधे विधेः समुचितं येनासि रत्नाकरो
रत्नं चेदवमन्यसे वद विभो नैतत् पदं विन्दसि ।
पश्यालङ्करणं पुरन्दरपुरे चिन्तामणिः कौस्तुभो
विष्णोर्वक्षसि मीनकेतनरिपोः शीर्षे कलानां निधिः ॥५०८॥

सरः

कासारवर्य कलिताम्बुरुहावतंस
मुक्तासमानजलबिन्दुतरङ्गरङ्ग ।
किं भूषणं तव बकैर्बहुभिः कुरावै-
र्हंसैर्विना कलरवैर्नरदेवपूज्यैः ॥५०९॥

छायाभिर्निबिडाभिराभिरभितः पुष्प्यत्प्रसूनोदरा-
दुन्मीलद्भिरनुत्तमैः परिमलैः स्निग्धैश्च मुग्धैर्दलैः ।
मन्दस्पन्दवता शिवेन मरुता संशीलिताश्चेदिह
क्लान्तिं पान्थजनास्त्यजन्ति सरसस्तीरेऽप्यलं मज्जनैः ॥५१०॥

भो भोः सरस्त्वदुदरान्तरवर्तितस्य
त्वत्पूर्णतातिपरितोषितचित्तवृत्तेः ।
त्वज्जीवनेन सह जीवनमस्य नश्येन्
मीनः क्व जीवति कमाश्रयतेऽतिदीनः ॥५११॥

सर्पः

जानामि नागेन्द्र तव प्रभावं
कण्ठे स्थितो गर्जसि शङ्करस्य ।
स्थानं प्रधानं न बलं प्रधानं
स्थानस्थितः कापुरुषोऽपि सिंहः ॥५१२॥

तावद् गर्जन्ति मण्डूकाः कूपमाश्रित्य निर्भयाः ।
यावत् करिकराकारः कृष्णसर्पो न दृश्यते ॥५१३॥

सुजनानामपि हृदयं पिशुनपरिष्वङ्गमलिनमिह भवति ।
पवनः परागवाही रथ्यासङ्गे रजस्वलो भवति ॥५१४॥

सिंहः

अन्तर्बलान्यहममुष्य मृगाधिपस्य
वाचा निवेद्य कथमद्य लघूकरोमि ।
जानन्ति किन्तु करजक्षतकुम्भिकुम्भ-
निर्मुक्तमौक्तिकमयानि वनान्तराणि ॥५१५॥

अप्यकुर्वन् सटाटोपमगर्जन्नपि केसरी ।
भूभृतः कुरुते शोभां गर्जन्नपि न कुञ्जरः ॥५१६॥

उत्तुङ्गमत्तमातङ्गमस्तकन्यस्तलोचनः ।
आसन्नेऽपि न सारङ्गे करोत्याशां मृगाधिपः ॥५१७॥

उत्प्लुत्य यः शिखरिणं मदकुम्भिकुम्भ-
मुद्भिद्य सानुशतमायतमुल्ललङ्घे ।
पञ्चानने नियतया जरयाभिभूतः
सोयं करौ विलति बृंहति लोहिताक्षः ॥५१८॥

एणालं संभ्रमेण त्यज गवय भयं सैरिभ स्वैरमास्व
क्षोभं मा गास्तरक्षो विहर गिरिभुवि स्वेच्छयैवाच्छभल्ल ।
पारीन्द्रः पारदृश्वा निखिलवनभुवः केवलं मोदतेऽसौ
माद्यत्कुम्भीन्द्रकुम्भस्थलविपुलतटीमुक्तमुक्ताकलापैः ॥५१९॥

काकः पक्षबलेन भूपतिगृहे ग्रासं यदि प्राप्तवान्
किं वा तस्य महत्त्वमस्य लघुता पञ्चाननस्यागता ।
येनाक्रम्य करीन्द्रगण्डयुगलं निर्भिद्य हेलालवाल्
लब्ध्वा ग्रासवरं वराटकधिया मुक्तागणस्त्यज्यते ॥५२०॥

किं पुष्णासि मृगान् मृगावनकुलात् किं वापरं त्रायसे
त्वद्भाग्येन तथाप्यमी वनभुवि स्वैरं चरित्वा तृणम् ।
त्वां राजानमुपासितुं यदि किल श्रद्धां निबध्नन्ति ते
हे हर्यक्ष गुहागृहादपि विनिर्गन्तुं तवाद्य श्रमः ॥५२१॥

कुरङ्गीणां यूथं निभृतमिदमङ्गीकृतमयं
निरातङ्को यन् निर्दयहृदयभावोऽर्वयतु तत् ।
निवेद्यो वा कस्मिन्नयमविनयः केसरियुवा
हठान् मत्तेभानां युवतिषु विधत्ते नखपदम् ॥५२२॥

कोलः केलिमलंकरोतु करिणः क्रीडन्तु कान्तासखाः
कासारे वनकासराः सरभसं मज्जन्त्विह स्वेच्छया ।
अभ्यस्यन्त्विभयोषितश्च हरिणा भूयोऽनुरूपां गतिं
कान्तारान्तरसञ्चरिष्णुरधुना पञ्चाननो वर्तते ।।५२३।।

चिरं शासित्वायं मृगपतिरशेषं मृगकुलं
जराजीर्णो यातः परिभवपदत्वं विधिवशात् ।
उदासीनस्तिष्ठेर्यदि तरुणकण्ठीरव गति-
स्तवाप्येवंरूपा किमु न भविता जम्बुकवृकैः ।।५२४।।

जातः स्तन्यं न जग्राह कण्ठीरवकिशोरकः ।
चक्षुर्व्यापारयामास कुञ्जे कुञ्जरशालिनि ।।५२५।।

जित्वानेकान्यरण्यान्यतिविषमलतागुल्मदुर्गाण्यदूरा-
दायान्तं मां विलज्जा भषकततिरियं बुक्कनैर्धिक्करोति ।
लज्जन्ते हन्तुमेनां मदकरटिघटाकुम्भनिर्भेदरूढ-
क्रीडाधौरेयधारा मम खरनखराः किं करोमि क्व यामि ।।५२६।।

दिङ्नागाः प्रतिपेदिरे प्रथमतो जात्यैव जेतव्यतां
सम्भाव्यस्फुटविक्रमोऽथ वृषभो गौरेव गौरीपतेः ।
विक्रान्ते निकषं करोतु कतमं नाम त्रिलोकीतले
कण्ठेकालकुटुम्बिनीकरुणया सिक्तः स कण्ठीरवः ।।५२७।।

पारीन्द्रशावक न तावकरीतिरेषा
वेषान्तरैर्विहरसि श्वशृगालशावैः ।
कुम्भीन्द्रकुम्भदलनोत्पतनक्रमेच्छां
वंशोचितां न खलु रीतिमुरीकरोषि ।।५२८।।

प्रकटय सहजं मृगेन्द्र वीर्यं
ननु विपिने न तथा करोषि चेत् त्वम् ।
विवधति ननु जम्बुका वृकाश्च
स्ववशमिदं तव जीवनं वनं च ।।५२९।।

भिनत्ति भीमं करिराजकुम्भं
बिभर्ति वेगं पवनादतीव ।
करोति वासं गिरिगह्वरेषु
तथापि सिंहः पुनरेव नान्यः ।।५३०।।

यद्यपि च दैवयोगात् सिंहः पतितोऽतिविस्तरे कूपे ।
तदपि च वाञ्छति सततं करिकुम्भविदारणं मनसि ।।५३१।।

यद्यपि रटति सरोषं मृगपतिपुरतोऽपि मत्तगोमायुः ।
तदपि न कुप्यति सिंहोऽप्यसदृशपुरुषेषु कः कोपः ॥५३२॥

यस्मिन् जीवति सिंहे वनमिदमासीद् दुरासदं द्विरदैः ।
घटयन्ते कटिसूत्रं तस्य सटाभिः शबरशिशवः ॥५३३॥

यूना येन विभिन्नवारणघटाकुम्भोच्चलन्मौक्तिक-
श्रेणीभिः परिपूरितास्तटभुवो भूमीभृतां कोटिशः ।
तस्यैवाद्य निवाससीम्नि कलभाः क्रीडन्ति निःसाध्वसं
पारीन्द्रस्य जरातुरस्य तदहो सन्नो जिगीषारसः ॥५३४॥

वयोऽभिमानादवमानना चेद्
विधीयते फेरुजरत्तरेण ।
हेलाहतानेककरीन्द्रयूनो
हरीन्द्रसूनोर्नहि कापि हानिः ॥५३५॥

वरन्नुन्नतलाङ्गूलात् सटाधूननभीषणात् ।
सिंहात् पादप्रहारोऽपि न शृगालाधिरोहणम् ॥५३६॥

श्वानः सन्त्यभितोऽपि दन्तमुकुलव्यावर्तनोत्पाटित-
स्वैरोत्तानितविड्वराहपृथुकाः किं तैः स्थितैर्वा मृतैः ।
वस्तव्यं गिरिराजमौलिषु विहर्तव्यं पुनः स्वेच्छया
हन्तव्याः करिणो मृगेन्द्र इति च प्राप्तव्यमुच्चैर्यशः ॥५३७॥

स्वैरं सैरिभयूथपैरिह सरः शृङ्गेण विक्षोभितं
तावन् न्यङ्कुकुलं च हुंकृतिशतैर्विद्रावितं द्वीपिभिः ।
हेलाक्षिप्तपदे पराक्रमनिधावुज्जृम्भमाणे हरौ
चित्रं सैव तथैव चित्रलिखितेवासीदरण्यस्थली ॥५३८॥

हेलाविदलितकरिकुल कण्ठीरव कीदृशः प्रकोपोऽयम् ।
लोले बालशृगाले केवलकोलाहलाधारे ॥५३९॥

हे हर्यक्ष सहस्व संप्रति लघुर्गोमायुरग्रे सतां
यत् साधारणवन्यजन्तुमनसा गुंगारवं संव्यधात् ।
नीचानां प्रकृतिर्भ्रमो मुखरता चातः कथं खिद्यसे
शार्दूले द्विरदे मृगे शशकुले कस्ते विपक्षज्वरः ॥५४०॥

सुवर्णम्

आदौ त्वं निकषेण किं च तुलया वक्त्रेण वह्नेर्भवेः
शुद्धात्मापि सुवर्ण खण्डनविधौ नार्तिस्त्वयि श्रीमति ।

कण्ठालिङ्गिनि कर्णचुम्बिनि कुचग्राहिण्यहो सुभ्रुवां
पाणिग्राहिणि मेखलास्पृशि सुखं लोकः कथं पश्यति ।।५४१।।

हेम्नः खेदो न दाहेन छेदेन कषणेन वा ।
तदेव हि परं दुःखं यद् गुञ्जासमतोलनम् ।।५४२।।

सूर्यः

अजस्रं लसत्पद्मिनीवृन्दसङ्गं
मधूनि प्रकामं पिबन्तं मिलिन्दम् ।
रविर्मोचयत्यब्जकारागृहेभ्यो
दयालुर्हि नो दुष्टवद् दोषदर्शी ।।५४३।।

करस्फोटोऽम्बरत्यागः तेजोहानिः सरागता ।
वारुणीसङ्गजावस्था भानुनाप्यनुभूयते ।।५४४।।

दूरं यान्तु निशाचराः शशिकराः क्लेशं लभन्तांतरा–
मुद्योतं कलयन्तु हन्त न चिरं खद्योतका द्योतले ।
ध्वान्तं ध्वंसमुपैतु हंसनिवहः पद्माकरे शाम्यतु
प्राचीपर्वतमौलिमण्डनमणिः सूर्यः समुज्जृम्भते ।।५४५।।

धिक् छ्रीतमोहतिजगज्जनरञ्जनादि
सर्वं भविष्यति रवेरिव चन्द्रतोऽपि ।
किं त्वस्तगामिनि रवौ भविता न जाने
राजीवजीवनविधौ कतमः प्रकारः ।।५४६।।

पततु नभसो गच्छत्वस्तं निमज्जतु वारिधौ
व्रजतु वरुणागारद्वारं प्रभाभिरनावृतः ।
तदपि तरणिर्दत्त्वा पादं शिरस्सु महीभृतां
बलिततिमिरव्रातः प्रातः पुनः सक्रुदेष्यति ।।५४७।।

पूर्वाह्णे प्रतिबोध्य पङ्कजवनान्युत्सार्य नैशं तमः
कृत्वा चन्द्रमसं प्रकाशरहितं निस्तेजसं तेजसा ।
मध्याह्ने सरितां पयः प्रविततैरापीय दीप्तैः करैः
सायाह्ने रविरस्तमेति विवशः किं नानुशोच्यं भवेत् ।।५४८।।

हंसः

एकेन राजहंसेन या शोभा सरसो भवेत् ।
न सा बकसहस्रेण परितस्तीरवासिना ।।५४९।।

एषा पुष्करिणी मराल नलिनैश्छन्ना कुवीथीजलै-
र्यस्यामज्ञतया विधेरकृपया चेद् वस्तुमाकाङ्क्षसे ।
विस्रम्भो बकमण्डलेषु विनयो भेकेषु संबन्धिता
रात्र्यन्धेषु विधीयतां कृपणता कोयष्टिकश्रेणिषु ॥५५०॥

कञ्चिदेव समयं समागमात्
त्वां न विस्मरति शश्वदम्बुजम् ।
मानसे विहर हंस मानसे
मा विमुञ्च पुनरस्य सौहृदम् ॥५५१॥

काके कार्ष्ण्यमलौकिकं धवलता हंसे निसर्गस्थिता
गाम्भीर्ये महदन्तरं वचसि यो भेदः स किं कथ्यते ।
एतावत्सु विशेषणेष्वपि सखे यत्रेदमालोक्यते
के काकाः खलु के च हंसशिशवो देशाय तस्मै नमः ॥५५२॥

पीतं येन पुरा पुरन्दरपुरे रम्भोरुकेलिस्खलन्-
मन्दाराङ्कुरकर्णपूरसुरभि स्वर्गापगायाः पयः ।
सोऽयं मारववारि पामरवधूपादार्पणप्रोच्चलत्-
पङ्कातङ्कितभेकभिन्नमघृणो हंसः समाशंसते ॥५५३॥

बककोयष्टिभिर्जुष्टे पल्वले मानसं कुतः ।
मोदते हि मरालस्य सन्मानसविहारिणः ॥५५४॥

यत्रापि कुत्रापि भवन्ति हंसा
हंसा महीमण्डलमण्डनानि ।
हानिस्तु तेषां हि सरोवराणां
येषां मरालैः सह विप्रयोगः ॥५५५॥

ये वर्धिताः कनकपङ्कजरेणुमध्ये
मन्दाकिनीविमलनीरतरङ्गमध्ये ।
ते साम्प्रतं प्रतिदिनं खलु राजहंसाः
शैवालजालजटिलं जलमाश्रयन्ते ॥५५६॥

सानन्दं बिसिनीबिले विहरसे भुङ्क्षे मृणालीलताः
शश्वन् निन्दसि राजहंस तदपि त्वं किं नु राजीविनीम् ।
एतान् दैववशादुपागतवतो दृष्ट्वैव माध्वीलिहो
माध्वीलाभजुषो महेच्छ मनसि द्वेषो न संयुज्यते ॥५५७॥

सैव सैव सरसी रमणीया यत्र यत्र वलते तव रागः ।
राजहंस रसिक स्मरणीया श्रीमता तदपि मानसकेलिः ॥५५८॥

हा हन्त मानससरःसलिलावतंस
रे राजहंस पयसोः प्रविवेचनाय ।
यच् छक्तिमान् खलु भवान् न तथा किमु स्यात्
किं वा कपोत उत वा कलविङ्कपोतः ॥५५९॥

हंसी वेत्ति परागपिञ्जरतनुः कुत्रापि पद्माकरे
प्रेयान् मे बिसकन्दलीकिसलयं भुङ्क्ते हृयं निर्वृतः ।
नो जानाति तपस्विनी यदनिशं जम्बालमालोडयन्
शैवालाङ्कुरमप्यसौ न लभते हंसो विशीर्णच्छदः ॥५६०॥

हंसोऽध्वगश्रममपोहयितुं दिनान्ते
कारण्डकाकबककङ्ककुलं प्रविष्टः ।
मूकोऽयमित्युपहसन्ति लुनन्ति पक्षान्
नीचाश्रयो हि महतामवमानहेतुः ॥५६१॥

हंसः श्वेतो बकः श्वेतः को भेदो बकहंसयोः ।
क्षीरनीरविभागेन हंसो हंसो बको बकः ॥५६२॥

हे हंस पक्षिप पयः सजलं विवेक्तुं
शक्तस्य सम्प्रति मतिः क्व नु ते प्रयाता ।
कासारवारिणि कलां पतितां यदिन्दो–
रादातुमिच्छसि बिसाङ्कुरवाञ्छया त्वम् ॥५६३॥

हारः

गुणवतस्तव हार न युज्यते
परकलत्रकुचेषु विलुण्ठनम् ।
स्पृशति शीतकरो जघनस्थली–
मुचितमस्ति तदेव कलङ्किनः ॥५६४॥

मुक्ताहार गुणीभूय नोपसर्प्यः स्तनस्त्वया ।
विभवे यस्य काठिन्यं व्यर्थं तदुपसर्पणम् ॥५६५॥

हेमकारः

साधो कुण्डलघटनापरिश्रमादलमविद्धकर्णा पूः ।
वसति दिगम्बरनगरे रजकश्चतुरोऽपि किं कुरुते ॥५६६॥

हे हेमकार परदुःखविहारदक्ष
किं मां प्रतापयसि वारशतानि वह्नौ ।
आतापितेन मम याति गुणातिरेको
धूमस्तवैव वदने किल भस्मपातः ॥५६७॥

(मुद्रितग्रन्थ उपक्रमांशगताः श्लोकाः)

सरस्वतीप्रार्थना

त्वया कृत्ता युद्धे कुपितमनसो सित्रमपि मां
विभिन्दन्तो यान्तीत्यरिगृहमितीलाव दयया ।
पदप्राप्तादित्यः परिवृढ इवानेन हसता
धरानाथेन ब्राह्म्यवतु रथपन् मामविरतम् ॥५६८॥

देवीप्रार्थना

उषसि मागधमङ्गलगायकैर्झटिति जागृहि जागृहि जागृहि ।
अतिदयार्द्रकटाक्षनिरीक्षणैर्जगदिदं जगदम्ब सुखीकुरु ॥५६९॥

शिवप्रार्थना

उदरद्वयभरणभयादर्धाङ्गाहितदारः ।
यदि नैवं तस्यैकसुतः कथमद्यापि कुमारः ॥५७०॥

किरीटे निशेशो ललाटे हुताशो भुजे भोगिराजो गले कालिमा च ।
तनौ कामिनी यस्य तत्तुल्यदेवं न जाने न जाने न जाने न जाने ॥५७१॥

हरिप्रार्थना

वित्तभूचित्तभूमत्तभूपालकोपासनावासनायासनादन्वहम् ।
साधुता सा धुता साधिता साधिता किं तया चिन्तया चिन्तयामो हरिम् ॥५७२॥

अघहरणचणचरणदल गलगहनदलनसरलशर ।
अतरलनतरतनय जय जय दशरथतनय जलजवलनयन ॥५७३॥

कविप्रशंसा

व्यासतु स तु गौतमतु व्यालेन्द्रतु यो न वेत्ति साहित्यम् ।
तं प्रति सम्प्रति कम्प्रति शिरो मदीयं पुरश्च न तिरश्च ॥५७४॥

अनाराध्य कालीमनास्वाद्य गौडीं विना मन्त्रतन्त्रं विना शब्दचौर्यम् ।
प्रबन्धं प्रवक्तुं प्रयोक्तुं प्रशस्तं विरिञ्चिप्रपञ्चे मदन्यः कविः कः ॥५७५॥

कवयति पण्डितराजे कवयन्त्यन्येऽपि विद्वांसः ।
नृत्यति पिनाकपाणौ नृत्यन्त्यन्येऽपि भूतवेतालाः ॥५७६॥

कविताप्रशंसा

परिच्छिन्नः स्वादोऽमृतगुडमधुक्षौद्रपयसां
कदाचिच् चाभ्यासाद् भजति ननु वैरस्यमधिकम् ।

प्रियाबिम्बोष्ठे वा रुचिरकविवाक्येऽप्यनवधि-
र्नवानन्दः कोऽपि स्फुरति तु रसोऽसौ निरुपमः ।।५७७।।

तथापि क्रियते ग्रन्थः सन्ति यद्यपि दुर्जनाः ।।
न हि दस्युभयाल् लोको दैन्यवानेव वर्तते ।।५७८।।

नृपतिप्रशंसा

दिल्लीश्वरो वा जगदीश्वरो वा मनोरथं पूरयितुं समर्थः ।
अन्यैर्नृपालैः परिदीयमानं शाकाय वा स्याल् लवणाय वा स्यात् ।।७९।।

स्थितः स्वर्णपीठे नुतः पण्डितौघैः श्रितः सत्कवीन्द्रै रतः सत्कथासु ।
स तु क्रूरबुद्ध्या युतः क्ष्मापतिश्चेत् ततः किं ततः किं ततः किं ततः किम् ।।५८०।।

न याचे हिन्दूकं पर्वणि दत्तैकताम्रडब्बूकम् ।
याचे मुगल्मुलूकं तृणीकृतस्वर्णचन्द्रकम् ।।५८१।।

लवङ्गीप्रशंसा

न याचे गजालिं न वा वाजिराजिं न वित्तेषु चित्तं मदीयं कदापि ।
इयं सुस्तनी हस्तविन्यस्तकुम्भा लवङ्गी कुरङ्गीदृगङ्गीकरोतु ।।५८२।।

इयं सुस्तनी मस्तकन्यस्तहस्ता कुसुम्भारुणं चारु वासो वसाना ।
अरं भासमानापि रम्भासमाना लवङ्गी कुरङ्गीदृगङ्गीकरोतु ।।५८३।।

इयं सुस्तनी मस्तकन्यस्तकुम्भा कुसुम्भारुणं चारु वासो दधाना ।
समस्तस्य लोकस्य चेतःप्रवृत्तिं गृहीत्वा घटे न्यस्य यातीव भाति ।।५८४।।

यवनी नवनीतकोमलाङ्गी शयनीयं यदि नीयते कदाचित् ।
अवनीतलमेव साधु मन्ये न वनी माघवनी विनोदहेतुः ।।५८५।।

यवनी रमणी विपदः शमनी कमनीयतमा नवनीतसमा ।
उहिऊहिवचोऽमृतपूर्णमुखी स सुखी जगतीह यदङ्कगता ।।५८६।।

मुखं पङ्कजं लोचने खञ्जरीटौ कुचौ श्रीफले विद्युदेवाङ्गयष्टिः ।
यदि प्राणनाथेन हीना सुकेशी ततः किं ततः किं ततः किं ततः किम् ।।५८७।।

कालपीमन्दिरे बालपीनस्तनी जातु पीतासवा लालपीति प्रिया ।
नागराजीमदामोदमेदस्विनी मागरं मा गमः शाहजिल्लाहजी ।।५८८।।

---

(१४) रसगङ्गाधरमात्रस्थपद्यानि

(अवशिष्टांशः)

(१४) रसगङ्गाधरमात्रस्थपद्यानि

(अवशिष्टांशः)

अधरं बिम्बमाज्ञाय मुखमब्जं च तन्वि ते ।
कीराश्च चञ्चरीकाश्च विन्दन्ति परमां मुदम् ॥१॥

अनल्पजाम्बूनददानवर्षं
तथैव हर्षं जनयञ्जनेषु ।
दारिद्र्यघर्मक्षपणक्षमोऽयं
धाराधरो नैव धराधिनाथः ॥२॥

अनल्पतापाः कृतकोटिपापा
गदैकशीर्णा भवदुःखजीर्णाः ।
विलोक्य गङ्गां विचलत्तरङ्गा-
ममी समस्ताः सुखिनो भवन्ति ॥३॥

अनुकूलभावमथवा पराङ्मुखत्वं सहैव नरलोके ।
अन्योऽन्यविहितमन्त्रौ विधिदिल्लीवल्लभौ वहतः ॥४॥

अन्धेन पातभीत्या सञ्चरता विषमविषयेषु ।
दृढमिह मया गृहीता हिमगिरिश्रृङ्गादुपागता गङ्गा ॥५॥

अपकुर्वद्भिरनिशं धृतराष्ट्र तवात्मजैः ।
उप्यन्ते मृत्युबीजानि पाण्डुपुत्रेषु निश्चितम् ॥६॥

अलं हिमानीपरिदीर्णगात्रः
समापितः फाल्गुनसङ्गमेन ।
अत्यन्तमाकाङ्क्षितकृष्णवर्त्मा
भीष्मो महात्माजनि माघतुल्यः ॥७॥

अवाप्य भङ्गं खलु सङ्गराङ्गणे नितान्तमङ्गाधिपतेरमङ्गलम् ।
परप्रभावं मम गाण्डिवं धनुर्विनिन्दतस्ते हृदयं न कम्पते ॥८॥

अविरतचिन्तो लोके वृक इव पिशुनोऽत्र पिशुन इव च वृकः ।
भारतमिव सच्चित्तं सच्चित्तमिवाथ भारतं सकृपम् ॥९॥

अविरलविगलद्दानोदकधारासारसिक्तधरणितलः ।
धनदाप्रमहितमूर्त्तिर्जयतितरां सार्वभौमोऽयम् ॥१०॥

अशीतलोग्रश्चण्डांशुरनुग्रशिशिरः शशी ।
उग्रशीतस्त्वमेकोऽसि राजन् कोपप्रसादयोः ॥११॥

अस्थिमालामयीं दत्त्वा मुण्डमालामयीं तनुम् ।
गृह्णतां त्वत्पुरस्थानां को लाभः स्मरशासन ॥१२॥

अहं लतायाः सदृशीत्यखर्वं गौराङ्गि गर्वं न कदापि यायाः ।
गवेषणेनालमिहापरेषामेषापि तुल्या तव तावदस्ति ॥१३॥

अहन्नेको रणे रामो यातुधानाननेकशः ।
असहाया महात्मानो यान्ति काञ्चन वीरताम् ॥१४॥

अहितव्रत पापात्मन् मैवं मे दर्शयाननम् ।
आत्मानं हन्तुमिच्छामि येन त्वमसि भावितः ॥१५॥

अहीनचन्द्रा लसताननेन
ज्योत्स्नावती चापि शुचिस्मितेन ।
एषा हि योषा सितपक्षदोषा
तोषाय केषां न महीतले स्यात् ॥१६॥

आखण्डलेन नाकः कुण्डलिकुलकुण्डलेन पातालम् ।
नरमण्डन रिपुखण्डन भवता भूमण्डलं विभातितमाम् ॥१७॥

आज्ञा सुमेषोरविलङ्घनीया
किं वा तदीया नवचापयष्टिः ।
वनस्थिता किं वनदेवता वा
शकुन्तला वा मुनिकन्यकेयम् ॥१८॥

आताम्रा सिन्धुकन्याधवचरणनखोल्लासिकान्तिच्छटाभि-
र्ज्योत्स्नाजालैर्जटानां त्रिपुरविजयिनो जातजाम्बूनदश्रीः ।
स्वाभाव्यादच्छमुक्ताफलरचितलसद्गुच्छसच्छायकाया
पायादायासजालादमरसरिदघव्रातजातश्रमान् नः ॥१९॥

आत्मनोऽस्य तपोदानैर्निर्मलीकरणं हि यत् ।
क्षालनं भास्करस्येदं सारसैः सलिलोत्करैः ॥२०॥

आनन्दनेन लोकानामातापहरणेन च ।
कलाधरतया चापि राजन्निन्दूपमो भवान् ॥२१॥

कलाधरस्येव कलावशिष्टा विलूनमाला लवलीलतेव ।
अशोकमूलं परिपूर्णशोका सा रामयोषा चिरमध्युवास ॥२२॥

कलेव सूर्यादमला नवेन्दोः कृशानुपुञ्जात् प्रतिमेव हैमी ।
विनिर्गता यातुनिवासमध्यादध्याबभौ राघवधर्मपत्नी ॥२३॥

काव्यं सुधा रसज्ञानां कामिनां कामिनी सुधा ।
धनं सुधा सलोभानां शान्तिः संन्यासिनां सुधा ॥२४॥

खञ्जनदृशा निकुञ्जं गतवत्या गां गवेषयितुम् ।
अपहारिताः समस्ता गावो हरिवदनपङ्कजालोकात् ॥२५॥

गाढमालिङ्गच सकलां यामिनीं सहतस्थुषीम् ।
निद्रां विहाय स प्रातरालिलिङ्गाथ चेतनाम् ॥२६॥

चराचरजगज्जालसदनं वदनं तव ।
गलद्गगनगाम्भीर्यं वीक्ष्यास्मि हृतचेतना ॥२७॥

चराचरोभयाकारजगत्कारणविग्रहम् ।
कल्पान्तकालसंक्रुद्धं हरं सर्वहरं नुमः ॥२८॥

चूडामणिपदे धत्ते योऽम्बरे रविमागतम् ।
सतां कार्यातिथेयीति बोधयन् गृहमेधिनः ॥२९॥

तं दृष्टवान् प्रथममद्भुतधैर्यवीर्य-
गाम्भीर्यमक्षणविमुक्तसमीपजानिम् ।
वीक्ष्याथ दीनमबलाविरहव्यथार्तं
रामो न वायमिति संशयमाप लोकः ॥३०॥

तद्दर्शनोपायविमर्शनार्थं
मया तदालीसदनं गतेन ।
तत्रैव सालक्ष्यत पक्ष्मलाक्षी
दाक्षायणीमर्चयितुं प्रयाता ॥३१॥

तपस्यतो मुनेर्वक्त्राद् वेदार्थमधिगत्य सः ।
वासुदेवनिविष्टात्मा विवेश परमं पदम् ॥३२॥

तपोनिधे कौशिक रामचन्द्रं
निनीषसे चेन् नय किं विकल्पैः ।
निरन्तरालोकनपुण्यधन्या
भवन्तु वन्या अपि जीवभाजः ॥३३॥

तवाग्रे यदि दारिद्र्यं स्थितं भूप द्विजन्मनाम् ।
शनैः सवितुरप्यग्रे तमः स्थास्यत्यसंशयम् ॥३४॥

तस्मिन् मणिव्रातहतान्धकारे
पुरे निशालोपविधानदक्षे ।
सद्यो वियुक्ता दिवसावसानं
कोकाः सशोकाः कथयन्ति नित्यम् ॥३५॥

तुषारास्तापसव्राते तामसेषु च तापिनः ।
वृगन्तास्ताडकाशत्रोर्भूयासुर्मम भूतये ॥३६॥

त्रासैर्विना विराजन्ते शूराः सन्मणयो यथा ।
न दानेन विना भान्ति नृपा लोके द्विपा इव ॥३७॥

त्वयि दृष्टे त्वया दृष्टे भवन्ति जगतीतले ।
महान्तोऽप्यणवो राजन्नणवश्च महत्तराः ॥३८॥

त्वामवश्यं सिसृक्षन् यः सृजति स्म कलाधरम् ।
किं वाच्यं तस्य वैदुष्यं पुराणस्य महामुनेः ॥३९॥

दिवि सूर्यो भुवि त्वं च पाताले पन्नगाग्रणीः ।
दिक्षु दिक्पालवर्गश्च राजपुङ्गव राजते ॥४०॥

दीनद्रुमान् वचोभिः खलनिकरैरनुदिनं दलितान् ।
पल्लवयन्त्युल्लसिता नित्यं तैरेव सज्जनधुरीणाः ॥४१॥

दृश्यतेऽनुदिते यस्मिन्नुदिते नैव दृश्यते ।
जगदेतन् नमस्तस्मै कस्मैचिद् बोधभानवे ॥४२॥

धनुर्विवलनध्वनिश्रवणतत्क्षणाविर्भवन्-
महागुरुवधस्मृतिः श्वसनवेगधूताधरः ।
विलोचनविनिःसरद्बहलविस्फुलिङ्गव्रजो
रघुप्रवरमाक्षिपञ् जयति जामदग्न्यो मुनिः ॥४३॥

धर्मस्यात्मा भागधेयं क्षमायाः सारः सृष्टेर्जीवितं शारदायाः ।
आज्ञा साक्षाद् ब्रह्मणो वेदमूर्तेराकल्पान्तं राजतामेष राजा ॥४४॥

धर्मेण बुद्धिस्तव देव शुद्धा
बुद्ध्या निबद्धा सहसैव लक्ष्मीः ।
लक्ष्म्या च तुष्टा भुवि सर्वलोका
लोकैश्च नीता भुवनेषु कीर्तिः ॥४५॥

न कपोतकपोतकं तव स्पृशतु श्येन मनागपि स्पृहा ।
इदमद्य मया समर्पितं भवते चारुतरं कलेवरम् ॥४६॥

न कपोत भवन्तमण्वपि स्पृशतु श्येनसमुद्भवं भयम् ।
इदमद्य मया तृणीकृतं भवदायुःकुशलं कलेवरम् ॥४७॥

नखकिरणपरम्पराभिरामं किमपि पदाम्बुरुहद्वयं मुरारेः ।
अभिनवसुरदीर्घिकाप्रवाहप्रकरपरीतमिव स्फुटं चकासे ॥४८॥

नखैर्विदारितान्त्राणां शवानां पूयशोणितम् ।
आननेष्वनुलिम्पन्ति हृष्टा वेतालयोषितः ॥४९॥

न भवानिह मे लक्ष्यः क्षत्रवर्णविलोपनः ।
के वा विटपिनो राम कुलाचलभिदः पवेः ॥५०॥

न भाति रमणीयोऽपि वैराग्येण विना यतिः ।
वैदुष्येण विना विप्रो नरलोकस्त्वया विना ॥५१॥

नरैर्वरगतिप्रदेत्यथ सुरैः स्वकीयापगे-
त्युदारतरसिद्धिदेत्यखिलसिद्धसंघैरपि ।
हरेस्तनुरिति श्रिता मुनिभिरस्तसङ्गैरियं
तनोतु मम शं तनोः सपदि शन्तनोरङ्गना ॥५२॥

न वयं कवयस्तव स्तवं
नृप कुर्वीमहि यन् मृषाक्षरम् ।
रणसीम्नि तवावलोकने
तरुणार्को दिनकौशिकायते ॥५३॥

नान्यास्ति किं भूमितले सुरूपा
सीतैव वा किं भवतोऽनुरूपा ।
आकर्षता चन्दनशाखिशाखां
प्रबोधितोऽयं भवता फणीन्द्रः ॥५४॥

नार्यः स यो न स्वहितं समीक्षते
न तद्धितं यन् न परानुतोषणम् ।
न ते परे यैर्नहि साधुताश्रिता
न साधुता सा नहि यत्र माधवः ॥५५॥

न्यञ्चति बाल्ये सुदृशः समुदञ्चति गण्डसीम्नि पाण्डिमनि ।
मालिन्यमाविरासीद् राकाधिपलवलिकनकानाम् ॥५६॥

परिहरतु धरां फणिप्रवीरः सुखमयतां कमठोऽपि तां विहाय ।
अहमिह पुरुहूत पक्षकोणे निखिलमिदं जगदक्लमं वहामि ॥५७॥

पाण्डित्येन प्रचण्डेन येन माद्यन्ति दुर्जनाः ।
तेनैव सज्जना रूढा यान्ति शान्तिमनुत्तमाम् ।।५८।।

पूर्णमसुरैं रसातलममरैः स्वर्गो वसुन्धरा च नरैः ।
रघुवंशवीरतुलना तथापि खलु जगति निरवकाशैव ।।५९।।

प्राणानर्पय सीतां वा गृध्रांस्तर्पय वा द्विजान् ।
यमं भजस्व रामं वा यथेच्छसि तथा चर ।।६०।।

प्रियो हृदयवर्ती मे न मां मुञ्चति जातुचित् ।
उत्तरे नावकाशोऽस्ति दूरतस्ते मनोरथः ।।६१।।

भगवद्वदनाम्भोजं पश्यन्त्या अप्यहर्निशम् ।
तृष्णाधिकमुदेति स्म गोपसीमन्तिनीदृशः ।।६२।।

भवद्द्वारि क्रुध्यज्जयविजयदण्डाहतिदलत्-
किरीटास्ते कीटा इव विधिमहेन्द्रप्रभृतयः ।
वितिष्ठन्ते युष्मन्नयनपरिपातोत्कलिकया
वराकाः के तत्र क्षपितमुर नाकाधिपतयः ।।६३।।

भाग्यं ते शाल्मलितरो वद किं परिकथ्यते ।
द्विजैः फलाशया युक्तैः सेव्यसे यदहर्दिवम् ।।६४।।

भास्करसूनावस्तं याते जाते च पाण्डवोत्कर्षे ।
दुर्योधनस्य जीवित कथमिव नाद्यापि निर्यासि ।।६५।।

भुजो भगवतो भाति चञ्चंश्चाणूरचूर्णने ।
जगन्मण्डलसंहारे वेगवानिव धूर्जटिः ।।६६।।

महर्षेर्व्यासपुत्रस्य श्रावं श्रावं वचःसुधाम् ।
अभिमन्युसुतो राजा परां मुदमवाप्तवान् ।।६७।।

महीभृतां खलु गणे रत्नसानुरिव स्थितः ।
त्वं काव्ये वसुधाधीश वृषपर्वेव राजसे ।।६८।।

मुनिः श्ववदयं भाति सततं पर्यटन् महीम् ।
विनिवृत्तक्रियाजातः श्वापि लोके शुकायते ।।६९।।

यथा तवाननं चन्द्रस्तथा हासोऽपि चन्द्रिका ।
यथा चन्द्रसमश्चन्द्रस्तथा त्वं सदृशी तव ।।७०।।

यदि ते चरणाम्बुजं हृदा
वहतो मे न हतो विपद्गणः ।
अथ चण्डकरेण मण्डिते
दिनमध्येऽपि जितं तमोगणैः ॥७१॥

यदि सा मिथिलेन्द्रनन्दिनी नितरामेव न विद्यते भुवि ।
अथ मे कथमस्ति जीवितं न विनालम्बनमाश्रितस्थितिः ॥७२॥

यद्यनुष्णो भवेद् वह्निर्यद्यशीतं भवेज् जलम् ।
मन्ये दृढव्रतो रामस्तदा स्यादप्यसत्यवाक् ॥७३॥

यश्चरणत्राणीकृतकमलासनपन्नगेन्द्रलोकयुगः ।
सर्वाङ्गावरणपटीकृतकनकाण्डः स वामनो जयति ॥७४॥

ये त्वां ध्यायन्ति सततं त एव कृतिनां वराः ।
मुधा गतं पुराराते भवदन्यधियां जनुः ॥७५॥

रणाङ्गणे रावणवैरिणो विभोः शराः समन्ताद् वलिता विरेजिरे ।
निदाघमध्यन्दिनवर्तिनोऽम्बरे सहस्रभानोः प्रखराः करा इव ॥७६॥

रणे दीनान् देवान् दशवदन विद्राव्य वहति
प्रभावप्रागल्भ्यं त्वयि तु मम कोऽयं परिकरः ।
ललाटोद्यज्ज्वालाकवलितजगज्जालविभवो
भवो मे कोदण्डच्युतविशिखवेगं कलयतु ॥७७॥

रराज राजराजस्य राजहंसः करस्थितः ।
हस्तनक्षत्रसंसक्त इव पूर्णो निशाकरः ॥७८॥

राघवविरहज्वालासन्तापितसह्यशैलशिखरेषु ।
शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय ॥७९॥

राजा दुर्योधनो नाम्ना सर्वसत्त्वभयङ्करः ।
दीपानामिव साधूनां झञ्झावात इवाभवत् ॥८०॥

राजा युधिष्ठिरो नाम्ना सर्वधर्मसमाश्रयः ।
द्रुमाणामिव लोकानां मधुमास इवाभवत् ॥८१॥

राजेव सम्भृतं कोषं केदारमिव कर्षकः ।
भवन्तं त्रायतां नित्यं भयेभ्यो भगवान् भवः ॥८२॥

रामं स्निग्धतरश्यामं विलोक्य वनमण्डले ।
धाराधरधिया धीरं नृत्यन्ति स्म शिखावलाः ॥८३॥

रामं स्निग्धतरश्यामं विलोक्य वनमण्डले ।
प्रायो धाराधरोऽयं स्यादिति नृत्यन्ति केकिनः ॥८४॥

रामायमाणः श्रीरामः सीता सीतामनोहरा ।
ममान्तःकरणे नित्यं विहरेतां जगद्गुरू ॥८५॥

रामो विजयते यस्य क्षणात् सामर्षवीक्षणात् ।
दावाग्निदग्धकान्तारलीलां लङ्कापुरी दधौ ॥८६॥

रूपवत्यपि च क्रूरा कामिनी दुःखदायिनी ।
अन्तःकाटवसम्पूर्णा सुपक्वेवेन्द्रवारुणी ॥८७॥

रोगस्य ते चिकित्सां निदानमालोच्य सुन्दरि करिष्ये ।
मा हन्त कातरा भूः रसक्रियायां नितान्तनिपुणोऽस्मि ॥८८॥

लीलया विहितसिन्धुबन्धनः सोऽयमेति रघुवंशनन्दनः ।
दर्पदुर्विलसितो दशाननः कुत्र यामि निकटे कुलक्षयः ॥८९॥

वासयति हीनसत्त्वानतिसत्त्वानुद्धतान् विवासयति ।
त्रासयति सकलशत्रून् नीतिविदामग्रणीर्नराधिपतिः ॥९०॥

विचारिते महिमनि त्वदीये नित्यनिर्मले ।
परमात्मन् गगनमप्याधत्ते परमाणुताम् ॥९१॥

वृन्दापितृगहनचरौ कुसुमायुधजननहननशक्तिधरौ ।
अरिशूललाञ्छितकरौ भीतिं मे हरिहरौ हरताम् ॥९२॥

व्यानम्राश्चलिताश्चैव स्फारिताः परमाकुलाः ।
पाण्डुपुत्रेषु पाञ्चाल्याः पतन्ति प्रथमा दृशः ॥९३॥

शशभृद्धनुर्लसत्करा
गगनाम्भोरुहमालिकाधराः ।
तनयैः सह भाविजन्मनां
तव खेलन्ति नरेन्द्र वैरिणः ॥९४॥

श्यामं यज्ञोपवीतं तव किमिति मषीसङ्गमात् कुत्र जातः
सोऽयं शीतांशुकन्यापयसि कथमभूत् तज्जलं कज्जलाक्तम् ।
व्याकुप्यन्नूरदीनक्षितिरमणरिपुक्षोणिभृत्पक्ष्मलाक्षी-
लक्षाक्षीणाश्रुधारासमुदितसरितां सर्वतः सङ्गमेन ॥९५॥

सदा जयानुषङ्गाणामङ्गानां सङ्गरस्थलम् ।
रङ्गाङ्गणमिवाभाति तत्तत्तुरगताण्डवैः ॥९६॥

सरोजतामथ सतां शिशिरतंवताधुना ।
वर्भतां सर्वधर्माणां राज्ञानेन विर्दभितम् ॥९७॥

साब्धिद्वीपकुलाचलां वसुमतीमाक्रम्य सप्तान्तरां
सर्वां द्यामपि सस्मितेन हरिणा मन्दं समालोकितः ।
प्रादुर्भूतपरप्रमोदविदलद्रोमाञ्चितस्तत्क्षणं
व्यानम्रीकृतकन्धरोऽसुरवरो मौलिं पुरो न्यस्तवान् ॥९८॥

सिन्दूरैः परिपूरितं किमथवा लाक्षारसैः क्षालितं
लिप्तं वा किमु कुङ्कुमद्रवभरैरेतन् महीमण्डलम् ।
सन्देहं जनयन् नृणामिति परित्रातत्रिलोकस्त्विषां
व्रातः प्रातरुपातनोतु भवतां भव्यानि भासां निधेः ॥९९॥

सुधेव वाणी वसुधेव मूर्तिः सुधाकरश्रीसदृशी च कीर्तिः ।
पयोधिकल्पा मतिरासफेन्दोर्महीतलेऽन्यस्य नहीति मन्ये ॥१००॥

स्थितेऽपि सूर्ये पद्मिन्यो वर्तन्ते मधुपैः सह ।
अस्तं गते तु सुतरां स्त्रीणां कः प्रत्ययो भुवि ॥१०१॥

स्पृशति त्वयि यदि चापं स्वापं प्रापन् न केऽपि नरपालाः ।
शोणे तु नयनकोणे को नेपालेन्द्र तव सुखं स्वपितु ॥१०२॥

हालाहलसमो मन्युरनुकम्पा सुधोपमा ।
कीर्तिस्ते चन्द्रसदृशी भटास्तु मकरोद्भटाः ॥१०३॥

INDEX OF VERSES AND PROSE PASSAGES

INDEX OF VERSES AND PROSE PASSAGES

[The References are to pages and verses]

अ

आ

इ

ई

उ

ऊ

ऋ

ए

औ

क

ख

ग

घ

च

छ

ज

त

द

ध

न

प

म

य

ल

व

श

स

ह

ERRATA

Page, Verse and Line	For	read
24.15 c	-तरणि-	-सरणि-
53.21	२२ (No. of the verse)	२१
53.22	२३ (No. of the verse)	२२
114.17 (Commentary, beginning)	विशेषणीभूतानां . . .	अत्रोत्प्रेक्ष्यमाणस्य सर्वग्रहालम्बनत्वस्य समानाधिकरणेषु धर्मेषु तत्तद्ग्रहाश्रिताङ्कत्वेषु विशेषणीभूतैस्तत्तद्ग्रहैः सह विषयस्य राज्ञः कल्याणाश्रयत्वादिषु विशेषणीभतानां.........
128.52 b	उत्तार्यमाणोऽपि	उत्तार्यमाणेऽपि
137.130 b	वद्धिर्यथा	वृद्धिर्यथा
174.443 a	क्षत्रगर्भे	क्षेत्रगर्भे
177.469	५६९ (No. of the verse)	४६९

SANSKRIT ACADEMY SERIES

General Editor

Dr. ARYENDRA SHARMA, M.A., D.Phil.,
Professor of Sanskrit, Osmania University,
and Director of the Sanskrit Academy.

PUBLISHED

No. 1. JÑĀNACATURVIṀŚĪ of Naracandropādhyāya (An early work on Astronomy-Astrology, published for the first time)—Price Rs. 1.50

No. 2. PAṆḌITARĀJA-KĀVYA-SAṄGRAHA (Complete Poetical Works of Paṇḍitarāja Jagannātha, published for the first time in a single volume)—Price Rs. 6.00, bound Rs. 8.00

IN PRESS

No. 3. SAṀSKṚTA-KAVI-JĪVITAM (Lives of Sanskrit Poets and Authors, in Sanskrit), by Pt. Malladi Suryanarayana Shastri.

No. 4. A DESCRIPTIVE CATALOGUE OF SANSKRIT MANUSCRIPTS IN THE OSMANIA UNIVERSITY LIBRARY, Vol. I (Vedic Literature).
Compiled by Shri K. Sitaramaiya, M.A.

No. 5. KRIYĀSVARALAKṢAṆAM—YOHIBHĀṢYAM (A treatise on Vedic Accent, published for the first time). Edited by Dr. Aryendra Sharma and Shri K. Sitaramaiya.

No. 6. ṚGARTHASĀRA (An unpublished commentary on selected verses of the Ṛgveda) Part I—Mantras and Commentary; Part II—English Translation with Grammatical and Exegetical Notes.

UNDER PREPARATION

No. 7. A DESCRIPTIVE CATALOGUE OF SANSKRIT MANUSCRIPTS IN THE OSMANIA UNIVERSITY LIBRARY, Vol. II (Jyautiṣa, Vaidyaka, Kāvya, Alaṁkāra etc.). Compiled by Shri K. Sitaramaiya, M.A.

No. 8. A HISTORICAL GRAMMAR OF SANSKRIT, by Dr. Aryendra Sharma.

No. 9. A COMPANION TO CLASSICAL SANSKRIT LITERATURE (A comprehensive reference book, containing all necessary information concerning works, authors, allusions etc.)

No. 10. MADANARATNAPRADĪPA—DĀNODYOTA (An important and extensive digest on Dharmaśāstra).

POPULAR SERIES (in Press)

No. 11. STORIES FROM SANSKRIT LITERATURE (in English, in several parts.)

No. 12. GEMS FROM SANSKRIT LITERATURE (An Anthology of Sanskrit Gnomic Poetry, with translation in English).